श्रीमत्+वाग्भटविरचिते अष्टाङ्गहृदये सूत्रस्थानम्।

प्रथमः+अध्यायः

रागादिरोगान् सततानुषक्तान्
अशेषकायप्रसृतान् अशेषान्।
औत्सुक्यमोहारतिदान्+जघान
यः+अपूर्ववैद्याय नमः+अस्तु तस्मै॥1॥
अथ अतः आयुष्कामीयम् अध्यायं व्याख्यास्यामः ।
इति ह स्म+आहुः+आत्रेयादयः+ महर्षयः ।।
आयुः कामयमानेन धर्मार्थसुखसाधनम्।
आयुर्वेदोपदेशेषु विधेयः परमादरः॥2॥
ब्रह्मा स्मृत्वा+आयुषः+ वेदं प्रजापतिम्+अजिग्रहत्।
सः+अश्विनौ तौ सहस्राक्षं सः+अत्रिपुत्रादिकान्+मुनीन्॥3॥
ते+अग्निवेशादिकान्+ते तु पृथक् तन्त्राणि तेनिरे।
तेभ्यः+अतिविप्रकीर्णेभ्यः प्रायः सारतरोच्चयः॥4॥
क्रियते+अष्टाङ्गहृदयं न+अतिसंक्षेपविस्तरम्।
कायबालग्रहोर्ध्वाङ्गशल्यदंष्ट्राजरावृषान्॥5॥
अष्टौ+अङ्गानि तस्य+आहुः+चिकित्सा येषु संश्रिता।
वायुः पित्तं कफः+च+इति त्रयः+ दोषाः समासतः॥6॥
विकृताविकृता देहं घ्नन्ति ते वर्तयन्ति च।
ते व्यापिनः+अपि हृन्नाभ्योः+अधोमध्योर्ध्वसंश्रयाः॥7॥
वयोहोरात्रिभुक्तानां ते+अन्तमध्यादिगाः क्रमात्।
तैः+भवेत्+विषमः+तीक्ष्णः+ मन्दः+च+अग्निः समैः समः॥8॥
कोष्ठः क्रूरः+ मृदुः+मध्यः+ मध्यः स्यात्+तैः समैः+अपि।
शुक्रार्तवस्थैः+जन्मादौ विषेण+इव विषक्रिमेः॥9॥
तैः+च तिस्रः प्रकृतयः+हीनमध्योत्तमाः पृथक्।
समधातुः समस्तासु श्रेष्ठा निन्द्या द्विदोषजाः॥10॥
तत्र रूक्षः+ लघुः शीतः खरः सूक्ष्मः+चलः+अनिलः।
पित्तं सस्नेहतीक्ष्णोष्णं लघु विस्रं सरं द्रवम्॥11॥
स्निग्धः शीतः+ गुरुः+मन्दः श्लक्ष्णः+ मृत्स्नः स्थिरः कफः।
संसर्गः सन्निपातः+च तत्+द्वित्रिक्षयकोपतः॥12॥
रसासृङ्मांसमेदोस्थिमज्जशुक्राणि धातवः।
सप्त दूष्याः मलाः+ मूत्रशकृत्स्वेदादयः+अपि च॥13॥

वृद्धिः समानैः सर्वेषां विपरीतैः+विपर्ययः।
रसाः स्वाद्वम्ललवणतिक्तोषणकषायकाः॥14॥
षट्+ द्रव्यम्+आश्रिताः+ते च यथापूर्वं बलावहाः।
तत्र+आद्याः+ मारुतं घ्नन्ति त्रयः+तिक्तादयः कफम्॥
कषायतिक्तमधुराः पित्तम्+अन्ये तु कुर्वते।
शमनं कोपनं स्वस्थहितं द्रव्यम्+इति त्रिधा॥16॥
उष्णशीतगुणोत्कर्षात्+तत्र वीर्यं द्विधा स्मृतम्।
त्रिधा विपाकः+ द्रव्यस्य स्वाद्वम्लकटुकात्मकः॥17॥
गुरुमन्दहिमस्निग्धश्लक्ष्णसान्द्रमृदुस्थिराः।
गुणाः ससूक्ष्मविशदाः+ विंशतिः सविपर्ययाः॥18॥
कालार्थकर्मणां योगः+ हीनमिथ्यातिमात्रकः।
सम्यक्+योगः+च विज्ञेयः+ रोगारोग्यैककारणम्॥19॥
रोगः+तु दोषवैषम्यं दोषसाम्यम्+अरोगता।
निजागन्तुविभागेन तत्र रोगाः+ द्विधा स्मृताः॥20॥
तेषां कायमनोभेदात्+अधिष्ठानम्+अपि द्विधा।
रजः+तमः+च मनसः+ द्वौ च दोषौ+उदाहृतौ॥21॥
दर्शनस्पर्शनप्रश्नैः परीक्षेत च रोगिणम्।
रोगं निदानप्राग्रूपलक्षणोपशयाप्तिभिः॥22॥
भूमिदेहप्रभेदेन देशम्+आहुः+इह द्विधाः।
जाङ्गलं वातभूयिष्ठम्+अनूपं तु कफोल्वणम्॥23॥
साधारणं सममलं त्रिधा भूदेशम्+आदिशेत्।
क्षणादिः+व्याध्यवस्था च कालः+ भेषजयोगकृत्॥24॥
शोधनं शमनं च+इति समासात्+औषधं द्विधा।
शरीरजानां दोषाणां क्रमेण 'परमौषधम्'॥25॥
वस्तिः+विरेकः+ वमनं तथा तैलं घृतं मधु।
धीधैर्यात्मादिविज्ञानं 'मनोदोषौषधं' परम्॥26॥
भिषक्+ द्रव्याणि+उपस्थाता रोगी पादचतुष्टयम्।
चिकित्सितस्य निर्दिष्टं प्रत्येकं तत्+चतुर्गुणम्॥27॥
दक्षः+तीर्थात्तशास्त्रार्थः+ दृष्टकर्मा शुचिः+भिषक्।
बहुकल्पं बहुगुणं सम्पन्नं योग्यम्+औषधम्॥28॥
अनुरक्तः शुचिः+दक्षः+ बुद्धिमान् परिचारकः।
आढ्यः+ रोगी भिषग्वश्यः+ ज्ञापकः सत्त्ववान्+अपि॥29॥

(साध्यः+असाध्यः+ इति व्याधिः+द्विधा तौ तु पुनः+द्विधा।
सुसाध्यः कृच्छ्रसाध्यः+च याप्यः+ यः+च+अनुपक्रमः॥1॥)

सर्वौषधक्षमे देहे यूनः पुंसः+ जितात्मनः।
अमर्मगः+अल्पहेत्वग्ररूपरूपः+अनुपद्रवः॥30॥

अतुल्यदूष्यदेशर्तुप्रकृतिः पादसम्पदि।
ग्रहेषु+अनुगुणेषु+एकदोषमार्गः+ नवः 'सुखः'॥31॥

शस्त्रादिसाधनः कृच्छ्रः सङ्करे च ततः+ गदः।
शेषत्वात्+आयुषः+ 'याप्यः' पथ्याभ्यासात्+विपर्यये॥32॥

अनुपक्रमः+ एव स्यात्+स्थितः+अत्यन्तविपर्यये।
औत्सुक्यमोहारतिकृत्+ दृष्टरिष्टः+अक्षनाशनः॥33॥

त्यजेत्+आर्तं भिषग्भूपैः+द्विष्टं तेषां द्विषं द्विषम्।
हीनोपकरणं व्यग्रम्+अविधेयं गतायुषम्॥34॥

चण्डं शोकातुरं भीरुं कृतघ्नं वैद्यमानिनम्।
तन्त्रस्य+अस्य परं च+अतः+ वक्ष्यते+अध्यायसङ्ग्रहः॥35॥

आयुष्कामदिनर्त्वीहारोगानुत्पादनद्रवाः।
अन्नज्ञानान्नसंरक्षामात्राद्रव्यरसाश्रयाः॥36॥

दोषादिज्ञानतद्भेदतच्चिकित्साद्व्युपक्रमाः।
शुद्ध्यादिस्नेहनस्वेदरेकास्थापननावनम्॥37॥

धूमगण्डूषदृक्सेकतृप्तियन्त्रकशस्त्रकम्।
शिराविधिः शल्यविधिः शस्त्रक्षाराग्निकर्मिकौ॥38॥

सूत्रस्थानम्+इमे+अध्यायाः त्रिंशत् शारीरम्+उच्यते।
गर्भावक्रान्तितद्व्यापदङ्गमर्मविभागिकम्॥39॥

विकृतिः+दूतजं षष्ठं निदानं सार्वरोगिकम्।
ज्वरासृक्श्वासयक्ष्मादिमदाद्यर्शोतिसारिणाम्॥40॥

मूत्राघातप्रमेहाणां विद्रध्याद्युदरस्य च
पाण्डुकुष्ठानिलार्तानां वातास्रस्य च 'षोडश'॥41॥

चिकित्सितं ज्वरे रक्ते कासे श्वासे च यक्ष्मणि।
वमौ मदात्यये+अर्शःसु विशि द्वौ द्वौ च मूत्रिते॥42॥

विद्रधौ गुल्मजठरपाण्डुशोफविसर्पिषु।
कुष्ठश्वित्रानिलव्याधिवातास्रेषु चिकित्सितम्॥43॥

द्वाविंशतिः+इमे+अध्यायाः कल्पसिद्धिः+अतः परम्।
कल्पः+ वमेः+विरेकस्य तत्सिद्धिः+बस्तिकल्पना॥44॥

सिद्धिः+बस्त्यापदां षष्ठः+ द्रव्यकल्पः अतः+ उत्तरम्।
बालोपचारे तद्व्याधौ तद्ग्रहे द्वौ च भूतगे॥45॥
उन्मादे+अथ स्मृतिभ्रंशे द्वौ द्वौ वर्त्मसु सन्धिषु।
दृक्तमोलिङ्गनाशेषु त्रयः+ द्वौ द्वौ च सर्वगे॥46॥
कर्णनासामुखशिरोव्रणे भङ्गे भगन्दरे।
ग्रन्थ्यादौ क्षुद्ररोगेषु गुह्यरोगे पृथक्+द्वयम्॥47॥
विषे भुजङ्गे कीटेषु मूषकेषु रसायने।
चत्वारिंशः+अनपत्यानाम्+अध्यायः+ बीजपोषणः॥48॥
इति+अध्यायशतं विशं षड्भिः स्थानैः+उदीरितम्॥48 1/2॥
इति श्रीवैद्यपतिसिंहगुप्तसूनुश्रीमद्वाग्भटविरचितायाम्+अष्टाङ्गहृदयसंहितायां सूत्रस्थाने आयुष्कामीयः+ नाम प्रथमः+अध्यायः॥1॥

द्वितीयः+अध्यायः

अथ+अतः+ दिनचर्याध्यायं व्याख्यास्यामः।
इति ह स्म+आहुः+आत्रेयादयः+ महर्षयः।
ब्रह्मे मुहूर्त्ते उत्तिष्ठेत्+स्वस्थः+ रक्षार्थम्+आयुषः।
शरीरचिन्तां निर्वर्त्य कृतशौचविधिः+ततः॥1॥
अर्कन्यग्रोधखदिरकरञ्जककुभादिजम्।
प्रातः+भुक्त्वा च मृदु+अग्रं कषायकटुतिक्तकम्॥2॥
कनीन्यग्रसमस्थूलं प्रगुणं द्वादशाङ्गुलम्।
भक्षयेत्+दन्तपवनं दन्तमांसानि+अबाधयन्॥3॥
न+अद्यात्+अजीर्णवमथुश्वासकासज्वरार्दिती।
तृष्णास्यपाकहृन्नेत्रशिरःकर्णामयी च तत्॥4॥
सौवीरम्+अञ्जनं नित्यं हितम्+अक्ष्णोः+ततः+ भजेत्।
चक्षुः+तेजोमयं तस्य विशेषात् श्लेष्मतः+ भयम्॥5॥
योजयेत्+सप्तरात्रे+अस्मात्+स्रावणार्थं रसाञ्जनम्।
ततः+ नावनगण्डूषधूमताम्बूलभाक्+भवेत्॥6॥
ताम्बूलं क्षतपित्तास्ररूक्षोत्कुपितचक्षुषाम्।
विषमूर्च्छामदार्तानाम्+अपथ्यं शोषिणाम्+अपि॥7॥
अभ्यङ्गम्+आचरेत्+नित्यं सः+ जराश्रमवातहा।
दृष्टिप्रसादपुष्ट्यायुः स्वप्नसुत्वक्त्वदार्ढ्यकृत्॥8॥
शिरःश्रवणपादेषु तं विशेषेण शीलयेत्।
वर्ज्यः+अभ्यङ्गः कफग्रस्तकृतसंशुद्ध्यजीर्णिभिः॥9॥

लाघवं कर्मसामर्थ्यं दीप्तः+अग्निः+मेदसः क्षयः।
विभक्तघनगात्रत्वं व्यायामात्+उपजायते॥10॥
वातपित्तामयी बालः+ वृद्धः+अजीर्णी च तं त्यजेत्।
अर्धशक्त्या निषेव्यः+तु बलिभिः स्निग्धभोजिभिः॥11॥
शीतकाले वसन्ते च मन्दम्+एव ततः+अन्यदा।
तं कृत्वा+अनुसुखं देहं मर्दयेत्+च समन्ततः॥12॥
तृष्णा क्षयः प्रतमकः+ रक्तपित्तं श्रमः क्लमः।
अतिव्यायामतः कासः+ ज्वरः+छर्दिः+च जायते॥13॥
व्यायामजागराध्वस्त्रीहास्यभाष्यादि साहसम्।
गजं सिंहः+ इव+आकर्षन् भजन्+अति विनश्यति॥14॥
उद्वर्तनं कफहरं मेदसः प्रविलायनम्।
स्थिरीकरणम्+अङ्गानां त्वक्प्रसादकरं परम्॥15॥
दीपनं वृष्यम्+आयुष्यं 'स्नानम्'+ऊर्जाबलप्रदम्।
कण्डूमलश्रमस्वेदतन्द्रातृड्दाहपाप्मजित्॥16॥
उष्णाम्बुना+अधःकायस्य परिषेकः+ बलावहः।
तेन+एव तु+उत्तमाङ्गस्य बलहृत्+केशचक्षुषाम्॥17॥
स्नानम्+अर्दितनेत्रास्यकर्णरोगातिसारिषु।
आध्मानपीनसाजीर्णभुक्तवत्सु च गर्हितम्॥18॥
जीर्णे हितं मितं च+अद्यात्+न वेगान्+ईरयेत्+बलात्।
न वेगितः+अन्यकार्यः स्यात्+न+अजित्वा साध्यम्+आमयम्॥19॥
सुखार्थाः सर्वभूतानां मताः सर्वाः प्रवृत्तयः।
सुखं च न विना धर्मात्+तस्मात्+धर्मपरः+ भवेत्॥20॥
भक्त्या कल्याणमित्राणि सेवेत+इतरदूरगः।
हिंसास्तेयान्यथाकामं पैशुन्यं परुषानृते॥21॥
सम्भिन्नालापं व्यापादम्+अभिध्या दृग्विपर्ययम्।
पापं कर्म+इति दशधा कायवाङ्मानसैः+त्यजेत्॥22॥
अवृत्तिव्याधिशोकार्तान्+अनुवर्तेत शक्तितः।
आत्मवत्+सततं पश्येत्+अपि कीटपिपीलिकम्॥23॥
अर्चयेत्+ देवगोविप्रवृद्धवैद्यनृपातिथीन्।
विमुखात्+न+अर्थिनः कुर्यात्+न+अवमन्येत न+आक्षिपेत्॥24॥
उपकारप्रधानः स्यात्+अपकारपरे+अपि+अरौ।
सम्पद्विपत्सु+एकमनाः हेतौ+ईर्ष्येत्+फले न तु॥25॥

काले हितं मितं ब्रूयात्+अविसंवादि पेशलम्।

पूर्वाभिभाषी सुमुखः+सुशीलः करुणामृदुः॥26॥

न+एकः सुखी न सर्वत्र विश्रब्धः+ न च शङ्कितः।

न कञ्चित्+आत्मनः शत्रुं न+आत्मानं कस्यचित्+रिपुम्॥27॥

प्रकाशयेत्+न+अपमानं न च निःस्नेहतां प्रभोः।

जनस्य+आशयम्+आलक्ष्य यः+ यथा परितुष्यति॥28॥

तं तथा+एव+अनुवर्तेत पराराधनपण्डितः।

न पीडयेत्+इन्द्रियाणि न च+एतानि+अतिलालयेत्॥29॥

त्रिवर्गशून्यं न+आरम्भं भजेत्+तम् च+अविरोधयन्।

अनुयायात्+प्रतिपदं सर्वधर्मेषु मध्यमाम्॥30॥

नीचरोमनखश्मश्रुः+निर्मलाङ्घ्रिमलायनः।

स्नानशीलः सुसुरभिः सुवेषः+अनुल्बणोज्ज्वलः॥31॥

धारयेत्+सततं रत्नसिद्धमन्त्रमहौषधीः।

सातपत्रपदत्राणः+ विचरेत्+युगमात्रदृक्॥32॥

निशि च+आत्ययिके कार्ये दण्डी मौली सहायवान्।

चैत्यपूज्यध्वजाशस्तच्छायाभस्मतुषाशुचीन्॥33॥

न+आक्रामेत्+शर्करालोष्टबलिस्नानभुवः+न च।

नदीं तरेत्+न बाहुभ्यां न+अग्निस्कन्धम्+अभिव्रजेत्॥34॥

सन्दिग्धनावं वृक्षं च न+आरोहेत्+दुष्टयानवत्।

न+असंवृतमुखः कुर्यात्+क्षुतिहास्यविजृम्भणम्॥35॥

नासिकां न विकुष्णीयात्+न+अकस्मात्+विलिखेत्+भुवम्।

न+अङ्गैः+चेष्टेत विगुणं न+आसीत+उत्कटकः+चिरम्॥36॥

देहवाक्चेतसां चेष्टाः प्राक् श्रमात्+विनिवर्तयेत्।

न+उर्ध्वजानुः+चिरं तिष्ठेत्+नक्तं सेवेत न द्रुमम्॥37॥

तथा चत्वरचैत्यान्तश्चतुष्पथसुरालयान्।

सूनाटवीशून्यगृहश्मशानानि दिवा+अपि न॥38॥

सर्वथा+ईक्षेत न+आदित्यं न भारं शिरसा वहेत्।

न+ईक्षेत प्रततं सूक्ष्मं दीप्तामेध्याप्रियाणि च॥39॥

मद्यविक्रयसन्धानदानादानानि न+आचरेत्।

पुरोवातातपरजस्तुषारपरुषानिलान्॥40॥

अनृजुः क्षवथूद्गारकासस्वप्नान्नमैथुनम्।

कूलच्छाया नृपद्विष्ट व्यालदंष्ट्रिविषाणिनः॥41॥

हीनानार्यातिनिपुणसेवां विग्रहम्+उत्तमैः।

सन्ध्यासु+अभ्यवहारस्त्रीस्वप्नाध्ययनचिन्तनम्॥42॥

शत्रुसत्रगणाकीर्णगणिकापणिकाशनम्।

गात्रवक्त्रनखैः+वाद्यं हस्तकेशावधूननम्॥43॥

तोयाग्निपूज्यमध्येन यानं धूमं शवाश्रयम्।

मद्यातिसक्तिं विश्रम्भस्वातन्त्र्ये स्त्रीषु च त्यजेत्॥44॥

आचार्यः सर्वचेष्टासु लोकः+ एव हि धीमतः।

अनुकुर्यात्+तम्+एव+अतः+ लौकिकार्थे परीक्षकः॥45॥

आर्द्रसन्तानता त्यागः कायवाक्चेतसां दमः।

स्वार्थबुद्धिः परार्थेषु पर्याप्तम्+इति सद्व्रतम्॥46॥

नक्तंदिनानि मे यान्ति कथम्भूतस्य सम्प्रति।

दुःखभाक्+न भवति+एव नित्यं सन्निहितस्मृतिः॥47॥

इति+आचारः समासेन यं प्राप्नोति समाचरन्।

आयुः+आरोग्यम्+ऐश्वर्यं यशः+ लोकान्+च शाश्वतान्॥48॥

इति श्रीवैद्यपतिसिंहगुप्तसूनुश्रीमद्वाग्भटविरचितायाम्+अष्टाङ्गहृदयसंहितायां सूत्रस्थाने दिनचर्या नाम द्वितीयः+अध्यायः॥2॥

तृतीयः+अध्यायः

अथ+अतः+ऋतुचर्याध्यायं व्याख्यास्यामः।

इति ह स्म+आहुः+आत्रेयादयः+ महर्षयः।

मासैः+द्विसंख्यैः+माघाद्यैः क्रमात् षट्+ऋतवः स्मृताः।

शिशिरः+अथ वसन्तः+च ग्रीष्मः+ वर्षाशरद्धिमाः॥1॥

शिशिराद्याः+त्रिभिः+तैः+तु विद्यात्+अयनम्+उत्तरम्।

आदानं च तदादत्ते नृणां प्रतिदिनं बलम्॥2॥

तस्मिन् हि+अत्यर्थतीक्ष्णोष्णरूक्षा मार्गस्वभावतः।

आदित्यपवनाः सौम्यान् क्षपयन्ति गुणान् भुवः॥3॥

तिक्तः कषायः कटुकः+ बलिनः+अत्र रसाः क्रमात्।

तस्मात्+आदानम्+आग्नेयम् ऋतवः+ दक्षिणायनम्॥4॥

वर्षादयः+ विसर्गः+च यत्+बलं विसृजति+अयम्।

सौम्यत्वात्+अत्र सोमः+ हि बलवान् हीयते रविः॥5॥

मेघवृष्ट्यनिलैः शीतैः शान्ततापे महीतले।

स्निग्धाः+च+इह+अम्ललवणमधुराः+ बलिनः+ रसाः॥6॥

शीते+अग्र्यं वृष्टिघर्मे+अल्पं बलं मध्यं तु शेषयोः।

बलिनः शीतसंरोधात्+हेमन्ते प्रबलः+अनलः॥7॥
भवति+अल्पेन्धनः+ धातून् सः+ पचेत्+वायुना+ईरीतः।
अतः+ हिमे+अस्मिन्+सेवेत स्वाद्वम्ललवणान् रसान्॥8॥
दैर्ध्यात्+निशानाम्+एतर्हि प्रातः+एव बुभुक्षितः।
अवश्यकार्यं सम्भाव्य यथा+उक्तं शीलयेत्+अनु॥9॥
वातघ्नतैलैः+अभ्यङ्गं मूर्ध्नि तैलं विमर्दनम्।
नियुद्धं कुशलैः सार्धं पादाघातं च युक्तितः॥10॥
कषायापहृतस्नेहः+ततः स्नातः+ यथाविधि।
कुङ्कुमेन सदर्पेण प्रदिग्धः+अगुरुधूपितः॥11॥
रसान् स्निग्धान् पलं पुष्टं गौडम्+अच्छसुरां सुराम्।
गोधूमपिष्टमाषेक्षुक्षीरोत्थविकृतीः शुभाः॥12॥
नवम्+अन्नं वसां तैलं शौचकार्ये सुखोदकम्।
प्रावाराजिनकौशेयप्रवेणीकौचवास्तृतम्॥13॥
उष्णस्वभावैः+लघुभिः प्रावृतः शयनं भजेत्।
युक्त्या+अर्ककिरणान् स्वेदं पादत्राणं च सर्वदा॥14॥
पीवरोरुस्तनश्रोण्यः समदाः प्रमदाः प्रियाः।
हरन्ति शीतम्+उष्णाङ्ग्यः+ धूपकुङ्कुमयौवनैः॥15॥
अङ्गारतापसंतप्तगर्भभूवेश्मचारिणः।
शीतपारुष्यजनितः+ न दोषः+ जातु जायते॥16॥
अयम्+एव विधिः कार्यः शिशिरे+अपि विशेषतः।
तदा हि शीतम्+अधिकं रौक्ष्यं च+आदानकालजम्॥17॥
कफः+चितः+ हि शिशिरे वसन्ते+अर्कांशुतापितः।
हत्वा+अग्निं कुरुते रोगान्+अतः+तम्+ त्वरया जयेत्॥18॥
तीक्ष्णैः+वमननस्य+आद्यैः+लघुरूक्षैः+च भोजनैः।
व्यायामोद्वर्तनाघातैः+जित्वा श्लेष्माणम्+उल्बणम्॥19॥
स्नातः+अनुलिप्तः कर्पूरचन्दनागुरुकुङ्कुमैः।
पुराणयवगोधूमक्षौद्रजाङ्गलशूल्यभुक्॥20॥
सहकाररसोन्मिश्रान्+आस्वाद्य प्रियया+अर्पितान्।
प्रियास्यसङ्गसुरभीन् प्रियानेत्रोत्पलाङ्कितान्॥21॥
सौमनस्यकृतः+ हृद्यान्+वयस्यैः सहितः पिबेत्।
निर्गदान्+आसवारिष्टसीधुमार्द्वीकमाधवान्॥22॥
शृङ्गवेराम्बु साराम्बु मध्वम्बु जलदाम्बु च।

दक्षिणानिलशीतेषु परितः+ जलवाहिषु॥23॥
अदृष्टनष्टसूर्येषु मणिकुट्टिमकान्तिषु।
परपुष्टविघुष्टेषु कामकर्मान्तभूमिषु॥24॥
विचित्रपुष्पवृक्षेषु काननेषु सुगन्धिषु।
गोष्ठीकथाभिः+चित्राभिः+मध्याह्नं गमयेत्+सुखी॥25॥
गुरुशीतदिवास्वप्नस्निग्धाम्लमधुरान्+त्यजेत्।
तीक्ष्णांशुरतितीक्ष्णांशुर्ग्रीष्मे संक्षिपति+इव यत्॥26॥
प्रत्यहं क्षीयते श्लेष्मा तेन वायुः+च वर्धते।
अतः+अस्मिन्+पटुकट्वम्लव्यायामार्ककरान्+त्यजेत्॥27॥
भजेत्+मधुरम्+एव+अन्नं लघु स्निग्धं हिमं द्रवम्।
सुशीततोयसिक्ताङ्गः+ लिह्यात्+सक्तून् सर्शकरान्॥28॥
मद्यं न पेयं पेयं वा स्वल्पं सुबहुवारि वा।
अन्यथा शोफशैथिल्यदाहमोहान् करोति तत्॥29॥
कुन्देन्दुधवलं शालिम्+अश्नीयात्+जाङ्गलैः पलैः।
पिबेत्+रसं न+अतिघनं रसालां रागखाण्डवौ॥30॥
पानकं पञ्चसारं वा नवमृद्भाजने स्थितम्।
मोचचोचदलैः+युक्तं साम्लं मृण्मयशुक्तिभिः॥31॥
पाटलावासितं च+अम्भः सकर्पूरं सुशीतलम्।
शशाङ्ककिरणान् भक्ष्यान् रजन्यां भक्षयन् पिबेत्॥32॥
ससितं माहिषं क्षीरं चन्द्रनक्षत्रशीतलम्।
अभ्रङ्कषमहाशालतालरुद्धोष्णरश्मिषु॥33॥
वनेषु माधवीश्लिष्टद्राक्षास्तबकशालिषु।
सुगन्धिहिमपानीयसिच्यमानपटालिके॥34॥
कायमाने चिते चूतप्रवालफललुम्बिभिः।
कदलीदलकह्लारमृणालकमलोत्पलैः॥35॥
कोमलैः कल्पिते तल्पे हसत्कुसुमपल्लवे।
मध्यंदिने+अर्कतापार्तः स्वप्यात्+धारागृहे+अथवा॥36॥
पुस्तस्त्रीस्तनहस्तास्यप्रवृत्तोशीरवारिणि।
निशाकरकराकीर्णे सौधपृष्ठे निशासु च॥37॥
आसना स्वस्थचित्तस्य चन्दनार्द्रस्य मालिनः।
निवृत्तकामतन्त्रस्य सुसूक्ष्मतनुवाससः॥38॥
जलार्द्राः+तालवृन्तानि विस्तृताः पद्मिनीपुटाः।

उत्क्षेपाः+च मृदूत्क्षेपाः जलवर्षिहिमानिलाः॥39॥
कर्पूरमल्लिकामालाः+ हाराः सहरिचन्दनाः।
मनोहरकलालापाः शिशवः सारिकाः शुकाः॥40॥
मृणालवलयाः कान्ताः प्रोत्फुल्लकमलोज्ज्वलाः।
जङ्गमाः+ इव पद्मिन्यः+ हरन्ति दयिताः क्लमम्॥41॥
आदानग्लानवपुषाम्+अग्निः सन्नः+अपि सीदति।
वर्षासु दोषैः+दुष्यन्ति ते+अम्बुलम्बाम्बुदे+अम्बरे॥42॥
सतुषारेण मरुता सहसा शीतलेन च।
भूबाष्पेण+अम्लपाकेन मलिनेन च वारिणा॥43॥
वह्निना+एव च मन्देन तेषु+इति+अन्योन्यदूषिषु।
भजेत्+साधारणं सर्वम्+ऊष्मणः+तेजनं च यत्॥44॥
आस्थापनं शुद्धतनुः+जीर्णं धान्यं रसान् कृतान्।
जाङ्गलं पिशितं यूषान् मध्वरिष्टं चिरन्तनम्॥45॥
मस्तु सौवर्चलाढ्यं वा पञ्चकोलावचूर्णितम्।
दिव्यं कौपं शृतं च+अम्भः+ भोजनं तु+अतिदुर्दिने॥46॥
व्यक्ताम्ललवणस्नेहं संशुष्कं क्षौद्रवत्+लघु।
अपादचारी सुरभिः सततं धूपिताम्बरः॥47॥
हर्म्यपृष्ठे वसेत्+बाष्पशीतशीकरवर्जिते।
नदीजलोदमन्थाहः स्वप्नायासातपान्+त्यजेत्॥48॥
वर्षाशीतोचिताङ्गानां सहसा+एव+अर्करश्मिभिः।
तप्तानां सञ्चितं वृष्टौ पित्तं शरदि कुप्यति॥49॥
तज्जयाय घृतं तिक्तं विरेकः+ रक्तमोक्षणम्।
तिक्तं स्वादु कषायं च क्षुधितः+अन्नं भजेत्+लघु॥50॥
शालिमुद्गसिताधात्रीपटोलमधुजाङ्गलम्।
तप्तं तप्तांशुकिरणैः शीतं शीतांशुरश्मिभिः॥51॥
समन्तात्+अपि+अहोरात्रम्+अगस्त्योदयनिर्विषम्।
शुचि हंसोदकं नाम निर्मलं मलजित्+जलम्॥52॥
न+अभिष्यन्दि न वा रूक्षं पानादिषु+अमृतोपमम्।
चन्दनोशीरकर्पूरमुक्तास्रग्वसनोज्ज्वलः॥53॥
सौधेषु सौधधवलां चन्द्रिकां रजनीमुखे।
तुषारक्षारसौहित्यदधितैलवसातपान्॥54॥
तीक्ष्णमद्यदिवास्वप्नपुरोवातान् परित्यजेत्।

शीते वर्षासु च+अद्यान्+त्रीन्+वसन्ते+अन्त्यान् रसान्+भजेत्॥55॥
स्वादुं निदाघे शरदि स्वादुतिक्तकषायकान्।
शरद्वसन्तयोः रूक्षं शीतं घर्मघनान्तयोः॥56॥
अन्नपानं समासेन विपरीतमतः+अन्यदा।
नित्यं सर्वरसाभ्यासः स्वस्वाधिक्यम्+ऋतौ+ऋतौ॥57॥
ऋत्वोः+अन्त्यादिसप्ताहौ+ऋतुसन्धिः+इति स्मृतः।
तत्र पूर्वः+ विधिः+त्याज्यः सेवनीयः+अपरः क्रमात्॥58॥
असात्म्यजा हि रोगाः स्युः सहसा त्यागशीलनात्॥58 1/2॥
इति श्रीवैद्यपतिसिंहगुप्तसूनुश्रीमद्वाग्भटविरचित्तायाम्+अष्टाङ्गहृदसंहितायां सूत्रस्थाने ऋतुचर्या नाम तृतीयः+अध्यायः॥

## चतुर्थः+अध्यायः

अथ+अतः रोगानुत्पादनीयाध्यायं व्याख्यास्यामः।
इति ह स्म+आहुः+आत्रेयादयः+ महर्षयः।
वेगात्+न धारयेत्+वातविण्मूत्रक्षवतृट्क्षुधाम्।
निद्राकासश्रमश्वासजृम्भाश्रुच्छर्दिरेतसाम्॥1॥
अधोवातस्य रोधेन गुल्मोदावर्तरुक्क्लमाः।
वातमूत्रशकृत्सङ्गदृष्ट्यग्निवधहृद्गदाः॥2॥
शकृतः पिण्डिकोद्वेष्टप्रतिश्यायशिरोरुजः।
ऊर्ध्ववायुः परीकर्तः+ हृदयस्य+उपरोधनम्॥4॥
मुखेन विट्प्रवृत्तिः+च पूर्वोक्ताः+च+आमयाः स्मृताः।
अङ्गभङ्गाश्मरीवस्तिमेढ्रवंक्षणवेदनाः॥5॥
मूत्रस्य रोधात्+पूर्वे च प्रायः+ रोगाः+तदौषधम्।
वर्त्यभ्यङ्गावगाहाः+च स्वेदनं बस्तिकर्म च॥6॥
अन्नपानं च विड्भेदि विड्रोधोत्थेषु यक्ष्मसु।
मूत्रजेषु तु पाने च प्राग्भक्तं शस्यते घृतम्॥7॥
जीर्णान्तिकं च+उत्तमया मात्रया योजनाद्वयम्।
अवपीडकम्+एतत्+च संज्ञितं धारणात्+पुनः॥8॥
उद्गारस्य+अरुचिः कम्पः+ विबन्धः+ हृदयोरसोः।
आध्मानकासहिध्माः+च हिध्मावत्+तत्र भेषजम्॥9॥
शिरोर्तीन्द्रियदौर्बल्यमन्यास्तम्भार्दितं क्षुतेः।
तीक्ष्णधूमाञ्जनाघ्राणनावनार्कविलोकनैः॥10॥
प्रवर्तयेत्+क्षुतिं सक्तां स्नेहस्वेदौ च शीलयेत्।
शोषाङ्गसादबाधिर्यसम्मोहभ्रमहृद्गदाः॥11॥

तृष्णाया निग्रहात्+तत्र शीतः सर्वः+ विधिः+हितः।
अङ्गभङ्गारुचिग्लानिकार्श्यशूलभ्रमाः क्षुधः॥12॥
तत्र योज्यं लघु स्निग्धम्+उष्णम्+अल्पं च भोजनम्।
निद्रायाः मोहमूर्धाक्षिगौरवालस्यजृम्भिकाः॥13॥
अङ्गमर्दः+च तत्र+इष्टः स्वप्नः संवाहनानि च।
कासस्य रोधात्+तद्वृद्धिः श्वासारुचिहृदामयाः॥14॥
शोषः+ हिध्मा च कार्यः+अत्र कासहा सुतरां विधिः।
गुल्महृद्रोगसम्मोहाः श्रमश्वासात्+विधारितात्॥15॥
हितं विश्रमणं तत्र वातघ्नः+च क्रियाक्रमः।
जृम्भायाः क्षववत्+रोगाः सर्वः+च+अनिलजित्+विधिः॥16॥
पीनसाक्षिशिरोहृद्रुङ्मन्यास्तम्भारुचिभ्रमाः।
सगुल्माः+ बाष्पतः+तत्र स्वप्नः+ मद्यं प्रियाः कथाः॥17॥
विसर्पकोठकुष्ठाक्षिकण्डूपाण्ड्वामयज्वराः।
सकासश्वासहृल्लासव्यङ्गश्वयथवः+ वमेः॥18॥
गण्डूषधूमानाहाराः+ रूक्षं भुक्त्वा तदुद्वमः।
व्यायामः स्रुतिः+अस्रस्य शस्तं च+अत्र विरेचनम्॥19॥
सक्षारलवणं तैलम्+अभ्यङ्गार्थं च शस्यते।
शुक्रात्+तत्स्रवणं गुह्यवेदनाश्वयथुज्वराः॥20॥
हृद्व्यथा मूत्रसङ्गाङ्गभङ्गवृद्ध्यश्मषण्ढताः।
ताम्रचूडसुराशालिबस्त्यभ्यङ्गावगाहनम्॥21॥
बस्तिशुद्धिकरैः सिद्धं भजेत्+क्षीरं प्रियाः स्त्रियः।
तृट्शूलार्तं त्यजेत् क्षीणं विड्वमं वेगरोधिनम्॥22॥
रोगाः सर्वे+अपि जायन्ते वेगोदीरणधारणैः।
निर्दिष्टं साधनं तत्र भूयिष्ठं ये तु तान् प्रति॥23॥
ततः+च+अनेकधा प्रायः पवनः+ यत्+प्रकुप्यति।
अन्नपानौषधं तस्य युञ्जीता+अतः+अनुलोमनम्॥24॥
धारयेत्+तु सदा वेगान् हितैषी प्रेत्य च+इह च।
लोभेर्ष्याद्वेषमात्सर्यरागादीनां जितेन्द्रियः॥25॥
यतेत च यथाकालं मलानां शोधनं प्रति।
अत्यर्थसञ्चिताः+ते हि क्रुद्धाः स्युः+जीवितच्छिदः॥26॥
दोषाः कदाचित्+कुप्यन्ति जिताः+ लङ्घनपाचनैः।
ये तु संशोधनैः शुद्धाः+ न तेषां पुनः+उद्भवः॥27॥

यथाक्रमं यथायोगम्+अतः+ ऊर्ध्वं प्रयोजयेत्।
रसायनानि सिद्धानि वृष्ययोगान्+च कालवित्॥28॥
भेषजक्षपिते पथ्यम्+आहारैः+बृंहणं क्रमात्।
शालिषष्टिकगोधूममुद्गमांसघृतादिभिः॥29॥
हृद्यदीपनभैषज्यसंयोगात्+रुचिपक्तिदैः।
साभ्यङ्गोद्वर्तनस्नाननिरूहस्नेहबस्तिभिः॥30॥
तथा सः+ लभते शर्म सर्वपावकपाटवम्।
धीवर्णेन्द्रियवैमल्यं वृषतां दैर्ध्यम्+आयुषः॥31॥
ये भूतविषवाय्वग्निक्षतभङ्गादिसम्भवाः।
रागद्वेषभयाद्याः+च ते स्युः+आगन्तवः+ गदाः॥32॥
त्यागः प्रज्ञापराधानाम्+इन्द्रियोपशमः स्मृतिः।
देशकालात्मविज्ञानं सद्वृत्तस्य+अनुवर्तनम्॥33॥
अथर्वविहिता शान्तिः प्रतिकूलग्रहार्चनम्।
भूताद्यस्पर्शनोपायः+ निर्दिष्टः+च पृथक् पृथक्॥
अनुत्पत्यै समासेन विधिः+एषः प्रदर्शितः।
निजागन्तुविकाराणाम्+उत्पन्नानां च शान्तये॥34॥
शीतोद्भवं दोषचयं वसन्ते
विशोधयन् ग्रीष्मजम्+अभ्रकाले।
घनात्यये वार्षिकम्+आशु सम्यक्
प्राप्नोति रोगान्+ऋतुजान्+न जातु॥35॥
नित्यं हिताहारविहारसेवी
समीक्ष्यकारी विषयेषु+असक्तः।
दाता समः सत्यपरः क्षमावान्
आप्तोपसेवी च भवति+अरोगः॥36॥
इति श्रीवैद्यपतिसिंहगुप्तसूनुश्रीमद्वाग्भटविरचितायाम्+अष्टाङ्गहृदयसंहितायां सूत्रस्थाने रोगानुत्पादनीयः+ नाम चतुर्थः+अध्यायः॥4।
पञ्चमः+अध्यायः
अथ+अतः+ द्रवद्रव्यविज्ञानीयम्+अध्यायं व्याख्यास्यामः
इति ह स्म+आहुः+आत्रेयादयः+ महर्षयः।
जीवनं तर्पणं हृद्यं ह्लादि बुद्धिप्रबोधनम्।
तन्वव्यक्तरसं मृष्टं शीतं लघ्वमृतोपमम्॥1॥
गङ्गाम्बु नभसः+ भ्रष्टं स्पृष्टं तु+अर्केन्दुमारुतैः।

हिताहितत्वे तद्भूयः+ देशकालौ+अपेक्षते॥2॥

येन+अभिवृष्टम्+अमलं शाल्यन्नं राजते स्थितम् ।

अक्लिन्नम्+अविवर्णं च तत्+पेयं गाङ्गम् अन्यथा॥3॥

सामुद्रं तत्+न पातव्यं मासात्+आश्वयुजात्+विना।

ऐन्द्रम्+अम्बु सुपात्रस्थम्+अविपन्नं सदा पिबेत्॥4॥

तदभावे च भूमिष्ठम्+आन्तरिक्षानुकारि यत्।

शुचिपृथ्वसितश्वेते देशे+अर्कपवनाहतम्॥5॥

न पिबेत्+पङ्कशैवालतृणपर्णाविलास्तृतम्।

सूर्येन्दुपवनादृष्टम्+अभिवृष्टं घनं गुरु॥6॥

फेनिलं जन्तुमत्+तप्तं दन्तग्राहि+अतिशैत्यतः।

अनार्तवं च यद्दिव्यम्+आर्तवं प्रथमं च यत्॥7॥

लूतादितन्तुविण्मूत्रविषसंश्लेषदूषितम्।

पश्चिमोदधिगाः शीघ्रवहा याः+च+अमलोदकाः॥8॥

पथ्याः समासात्+ताः+नद्यः+ विपरीताः+तु+अतः+अन्यथा।

उपलास्फालनाक्षेपविच्छेदैः खेदितोदकाः॥9॥

हिमवन्मलयोद्भूताः पथ्याः+ताः+ एव च स्थिराः।

कृमिश्लीपदहृत्कण्ठशिरोरोगान् प्रकुर्वते॥10॥

प्राच्यावन्त्यपरान्तोत्था दुर्नामानि महेन्द्रजाः।

उदरश्लीपदातङ्कान् सह्यविन्ध्योद्भवाः पुनः॥11॥

कुष्ठपाण्डुशिरोरोगान् दोषघ्न्यः पारियात्रजाः।

बलपौरुषकारिण्यः सागराम्भः+त्रिदोषकृत्॥12॥

विद्यात्+कूपतडागादीन् जाङ्गलानूपशैलतः।

न+अम्बु पेयम्+अशक्त्या वा स्वल्पम्+अल्पाग्निगुल्मिभिः॥13॥

पाण्डूदरातिसारार्शोग्रहणीशोषशोथिभिः।

ऋते शरन्निदाघाभ्यां पिबेत्+स्वस्थः+अपि च+अल्पशः॥14॥

समस्थूलकृशाः+ भुक्तमध्यान्तप्रथमाम्बुपाः।

शीतं मदात्ययग्लानिमूर्च्छाच्छर्दिश्रमभ्रमान्॥15॥

तृष्णोष्णदाहपित्तास्रविषाणि+अम्बु नियच्छति।

दीपनं पाचनं कण्ठ्यं लघूष्णं बस्तिशोधनम्॥16॥

हिध्माध्मानानिलश्लेष्मसद्यः शुद्धिः+नवज्वरे।

कासामपीनसश्वासपार्श्वरुक्षु च शस्यते॥17॥

अनभिष्यन्दि लघु च तोयं क्वथितशीतलम्।

पित्तयुक्ते हितं दोषे व्युषितं तत्+त्रिदोषकृत्॥18॥
नारिकेलोदकं स्निग्धं स्वादु वृष्यं हिमं लघु।
तृष्णापित्तानिलहरं दीपनं बस्तिशोधनम्॥19॥
वर्षासु दिव्यनादेये परं तोये वरावरे।
स्वादुपाकरसं स्निग्धम्+ओजस्यं धातुवर्धनम्॥20॥
वातपित्तहरं वृष्यं श्लेष्मलं गुरु शीतलम्।
प्रायः पयः+अत्र गव्यं तु जीवनीयं रसायनम्॥21॥
क्षतक्षीणहितं मेध्यं बल्यं स्तन्यकरं सरम्।
श्रमभ्रममदालक्ष्मीश्वासकासातितृट्क्षुधः॥22॥
जीर्णज्वरं मूत्रकृच्छ्रं रक्तपित्तं च नाशयेत्।
हितम्+अत्यग्न्यनिद्रेभ्यः+ गरीयः+ माहिषं हिमम्॥23॥
अल्पाम्बुपानव्यायामकटुतिक्ताशनैः+लघु।
आजं शोषज्वरश्वासरक्तपित्तातिसारजित्॥24॥
ईषद्रूक्षोष्णलवणमौष्ट्रकं दीपनं लघु।
शस्तं वातकफानाहकृमिशोफोदरार्शसाम्॥25॥
मानुषं वातपित्तासृगभिघाताक्षिरोगजित्।
तर्पणाश्चोतनैः+नस्यैः अहृद्यं तु+उष्णम्+आविकम्॥26॥
वातव्याधिहरं हिध्माश्वासपित्तकफप्रदम्।
हस्तिन्याः स्थैर्यकृत्+ बाढम्+उष्णं तु+एकशफं लघु॥27॥
शाखावातहरं साम्ललवणं जडताकरम्।
पयः+अभिष्यन्दि गुर्वामं युक्त्या शृतम्+अतः+अन्यथा॥28॥
भवेत्+गरीयः+अतिश्रृतं धारोष्णम्+अमृतोपमम्।
अम्लपाकरसं ग्राहि गुरूष्णं दधि वातजित्॥29॥
मेदः शुक्रबलश्लेष्मपित्तरक्ताग्निशोफकृत्।
रोचिष्णु शस्तमरुचौ शीतके विषमज्वरे॥30॥
पीनसे मूत्रकृच्छ्रे च रूक्षं तु ग्रहणीगदे।
न+एव+अद्यात्+निशि न+एव+उष्णं वसन्तोष्णशरत्सु न॥31॥
न+अमुद्गसूपं न+अक्षौद्रं तत्+न+अघृतसितोपलम्।
न च+अनामलकं न+अपि नित्यं नः+मन्दम्+अन्यथा॥32॥
ज्वरासृक्पित्तवीसर्पकुष्ठपाण्डुभ्रमप्रदम्।
तक्रं लघु कषायाम्लं दीपनं कफवातजित्॥33॥
शोफोदरार्शोग्रहणीदोषमूत्रग्रहारुचीः।

प्लीहगुल्मघृतव्यापद्गरपाण्ड्वामयान् जयेत्॥34॥
तद्वत्+मस्तु सरं स्रोतः शोधि विष्टम्भजित्+लघु।
नवनीतं नवं वृष्यं शीतं वर्णबलाग्निकृत्॥35॥
सङ्ग्राहि वातपित्तासृक्क्षयार्शः+अर्दितकासजित्।
क्षीरोद्भवं तु सङ्ग्राहि रक्तपित्ताक्षिरोगजित्॥36॥
शस्तं धीस्मृतिमेधाग्निबलायुः शुक्रचक्षुषाम्।
बालवृद्धप्रजाकान्तिसौकुमार्यस्वरार्थिनाम्॥37॥
क्षतक्षीणपरीसर्पशस्त्राग्निग्लपितात्मनाम्।
वातपित्तविषोन्मादशोषालक्ष्मीज्वरापहम्॥38॥
स्नेहानाम्+उत्तमं शीतं वयसः स्थापनं परम्।
सहस्रवीर्यं विधिभिः+धृतं कर्मसहस्रकृत्॥39॥
मदापस्मारमूर्च्छायशिरः कर्णाक्षियोनिजान्।
पुराणं जयति व्याधीन् व्रणशोधनरोपणम्॥40॥
बल्याः किलाटपीयूषकूर्चिकामोरणादयः।
शुक्रनिद्राकफकराः+ विष्टम्भिगुरुदोषलाः॥41॥
गव्ये क्षीरघृते श्रेष्ठे निन्दिते च+अविसम्भवे।
इक्षोः रसः+ गुरुः स्निग्धः+ बृंहणः कफमूत्रकृत्॥42॥
वृष्यः शीतः+अस्रपित्तघ्नः स्वादुपाकरसः+ रसः।
सः+अग्रे सलवणः+ दन्तपीडितः शर्करासमः॥43॥
मूलाग्रजन्तुजग्धादिपीडनात्+मलसङ्करात्।
किञ्चित्कालं विधृत्या च विकृतिं याति यान्त्रिकः॥44॥
विदाही गुरुविष्टम्भी तेन+असौ तत्र पौण्ड्रकः।
शैत्यप्रसादमाधुर्यैः+वरः+तम्+अनु वांशिकः॥45॥
शतपर्वककान्तारनैपालाद्याः+ततः क्रमात्।
सक्षाराः सकषायाः+च सोष्णाः किञ्चित्+विदाहिनः॥46॥
फाणितं गुर्वभिष्यन्दि चयकृत्+मूत्रशोधनम्।
न+अतिश्लेष्मकरः+ धौतः सृष्टमूत्रशकृत्+गुडः॥47॥
प्रभूतकृमिमज्जासृङ्मेदोमांसकफः+अपरः।
हृद्यः पुराणः पथ्यः+च नवः श्लेषमाग्निसादकृत्॥48॥
वृष्याः क्षीणक्षतहिताः+ रक्तपित्तानिलापहाः।
मत्स्यण्डिकाखण्डसिताः क्रमेण गुणवत्तमाः॥49॥
तद्गुणा तिक्तमधुरा कषाया यासशर्करा।

दाहतृट्छर्दिमूर्च्छासृक्पित्तघ्न्यः सर्वशर्कराः॥50॥
शर्करेक्षुविकाराणां फाणितं च वरावरे।
चक्षुष्यं छेदि तृट्श्लेष्मविषहिध्मास्रपित्तनुत्॥51॥
मेहकुष्ठकृमिच्छार्दश्वासकासातिसारजित्।
व्रणशोधनसन्धानरोपणं वातलं मधु॥52॥
रूक्षं कषायमधुरं तत्तुल्या मधुशर्करा।
उष्णम्+उष्णार्तम्+उष्णे च युक्तं च+उष्णैः+निहन्ति तत्॥53॥
प्रच्छर्दने निरूहे च मधूष्णं न निवार्यते।
अलब्धपाकमाश्वेव तयोः+यस्मात्+निवर्तते॥54॥
तैलं स्वयोनिवत्+तत्र मुख्यं तीक्ष्णं व्यवायि च।
त्वग्दोषकृत्+अचक्षुष्यं सूक्ष्मोष्णं कफकृत्+न च॥55॥
कृशानां बृंहणाया+अलं स्थूलानां कर्शनाय च।
बद्धविट्कं कृमिघ्नं च संस्कारात्सर्वरोगजित्॥56॥
सतिक्तोषणमैरण्डं तैलं स्वादु सरं गुरु।
वर्ध्मगुल्मानिलकफानुदर विषमज्वरम्॥57॥
रुक्शोफौ च कटीगुह्यकोष्ठपृष्ठाश्रयौ जयेत्।
तीक्ष्णोष्णं पिच्छिलं विस्रं रक्तैरण्डोद्भवं तु+अति॥58॥
कटूष्णं सार्षपं तीक्ष्णं कफशुक्रानिलापहम्।
लघु पित्तास्रकृत् कोठकुष्ठार्शोव्रणजन्तुजित्॥59॥
आक्षं स्वादु हिमं केश्यं गुरु पित्तानिलापहम्।
न+अत्युष्णं निम्बजं तिक्तं कृमिकुष्ठकफप्रणुत्॥60॥
उमाकुसुम्भजं च+उष्णं त्वग्दोषकफपित्तकृत्।
वसा मज्जा च वातघ्नौ बलपित्तकफप्रदौ॥61॥
मांसानुगस्वरूपौ च विद्यात्+मेदः+अपि तौ+इव।
दीपनं रोचनं मद्यं तीक्ष्णोष्णं तुष्टिपुष्टिदम्॥62॥
सस्वादुतिक्तकटुकम्+अम्लपाकरसं सरम्।
सकषायं स्वरारोग्यप्रतिभावर्णकृत्+लघु॥63॥
नष्टनिद्रा+अतिनिद्रेभ्यः+ हितं पित्तास्रदूषणम्।
कृशस्थूलहितं रूक्षं सूक्ष्मं स्रोतोविशोधनम्॥64॥
वातश्लेष्महरं युक्त्या पीतं विषवत्+अन्यथा।
गुरु त्रिदोषजननं नवं जीर्णम्+अतः+अन्यथा॥65॥
पेयं न+उष्णोपचारेण न विरिक्तक्षुधातुरैः।

न+अत्यर्थतीक्ष्णमृद्वल्पसम्भारं कलुषं न च॥66॥
गुल्मोदरार्शोग्रहणीशोषहृत् स्नेहनी गुरुः।
सुरानिलघ्नी मेदः+असृक् स्तन्यमूत्रकफावहा॥67॥
तद्गुणा वारुणी हृद्या लघुः+तीक्ष्णा निहन्ति च।
शूलकासवमिश्वासविबन्धाध्मानपीनसान्॥68॥
न+अतितीव्रमदा लध्वी पथ्या बैभीतकी सुरा।
व्रणे पाण्ड्वामये कुष्ठे न च+अत्यर्थं विरुध्यते॥69॥
विष्टम्भिनी यवसुरा गुर्वी रूक्षा त्रिदोषला।
यथाद्रव्यगुणः+अरिष्टः सर्वमद्यगुणाधिकः॥70॥
ग्रहणीपाण्डुकुष्ठार्शः शोफशोषोदरज्वरान्।
हन्ति गुल्मकृमिप्लीह्नः कषायकटुवातलः॥71॥
मार्द्वीकं लेखनं हृद्यं न+अत्युष्णं मधुरं सरम्।
अल्पपित्तानिलं पाण्डुमेहार्शः कृमिनाशनम्॥72॥
अस्मात्+अल्पान्तरगुणं खार्जूरं वातलं गुरु।
शार्करः सुरभिः स्वादुः+हृद्यः+ न+अतिमदः+ लघुः॥73॥
सृष्टमूत्रशकृद्वातः+ गौडः+तर्पणदीपनः।
वातपित्तकरः सीधुः स्नेहश्लेष्मविकारहा॥74॥
मेदःशोफोदरार्शोघ्नः+तत्र पक्वरसः+ वरः।
छेदी मध्वासवः+तीक्ष्णः+ मेहपीनसकासजित्॥75॥
रक्तपित्तकफोत्क्लेदि शुक्तं वातानुलोमनम्।
भृशोष्णतीक्ष्णरूक्षाम्लं हृद्यं रुचिकरं सरम्॥76॥
दीपनं शिशिरस्पर्शं पाण्डुदृक्कृमिनाशनम्।
गुडेक्षुमद्यमार्द्वीकशुक्तं लघु यथोत्तरम्॥77॥
कन्दमूलफलाद्यं च तद्वत्+विद्यात्+तदा+आसुतम्।
शाण्डाकी च+आसुतं च+अन्यत्+कालाम्लं रोचनं लघु॥78॥
धान्याम्लं भेदि तीक्ष्णोष्णं पित्तकृत्स्पर्शशीतलम्।
श्रमक्लमहरं रुच्यं दीपनं बस्तिशूलनुत्॥79॥
शस्तम्+आस्थापने हृद्यं लघु वातकफापहम्।
एभिः+एव गुणैः+युक्ते सौवीरकतुषोदके॥80॥
कृमिहृद्रोगगुल्मार्शः पाण्डुरोगनिबर्हणे।
ते क्रमात्+वितुषैः+विद्यात्+सतुषैः+च यवैः कृते॥81॥
मूत्रं गोजाविमहिषीगजाश्वोष्ट्रखरोद्भवम्।

पित्तलं रूक्षतीक्ष्णोष्णं लवणानुरसं कटु॥82॥

कृमिशोफोदरानाहशूलपाण्डुकफानिलान्।

गुल्मारुचिविषश्वित्रकुष्ठार्शांसि जयेत्+लघु॥83॥

तोयक्षीरेक्षुतैलानां वर्गैः+मद्यस्य च क्रमात्।

इति द्रवैकदेशः+अयं यथास्थूलम्+उदाहृतः॥84॥

इति श्रीवैद्यपतिसिंहगुप्तसूनुश्रीमद्वाग्भटविरचितायाम्+अष्टाङ्गहृदयसंहितायां सूत्रस्थाने द्रवद्रव्यविज्ञानीयः+ नाम पञ्चमः+अध्यायः॥5॥

षष्ठः+अध्यायाः

अथ+अतः+अन्नस्वरूपविज्ञानीयम्+अध्यायं व्याख्यास्यामः।

इति ह स्म+आहुः+आत्रेयादयः+ महर्षयः।

रक्तः+ महान् सकलमः+तूर्णकः शकुनाहृतः।

सारामुखः+ दीर्घशूकः+ रोध्रशूकः सुगन्धिकः॥1॥

पुण्ड्रः पाण्डुः पुण्डरीकः प्रमोदः+ गौरसारिवौ।

काञ्चनः+ महिषः शूकः+ दूषकः कुसुमाण्डकः॥2॥

लाङ्गला लोहबालाख्याः कर्दमाः शीतभीरुकाः।

पतङ्गाः+तपनीयाः+च ये च+अन्ये शालयः शुभाः॥3॥

स्वादुपाकरसाः स्निग्धाः+ वृष्याः+ बद्धाल्पवर्चसः।

कषायानुरसाः पथ्याः+ लघवः+ मूत्रलाः+ हिमाः॥4॥

शूकजेषु वरः+तत्र रक्तः+तृष्णात्रिदोषहा।

महान्+तस्य+अनु कलमः+तं च+अपि+अनु ततः परे॥5॥

यवकाः+ हायनाः पांसुबाष्पनैषधकादयः।

स्वादूष्णाः+ गुरवः स्निग्धाः पाके+अम्लाः श्लेष्मपित्तलाः॥6॥

सृष्टमूत्रपुरीषाः+च पूर्वं पूर्वं च निन्दिताः।

स्निग्धः+ ग्राही लघुः स्वादुः+त्रिदोषघ्नः स्थिरः+ हिमः॥7॥

षष्टिकः+ व्रीहिषु श्रेष्ठः+ गौरः+च+असितगौरतः।

ततः क्रमान्महाव्रीहिकृष्णव्रीहिजतूमुखाः॥8॥

कुक्कुटाण्डकलावाख्यपारावतकशूकराः।

वरकोद्दालकोज्ज्वालचीनशारददर्दुराः॥9॥

गन्धनाः कुरुविन्दाः+च गुणैः+अल्पान्तराः स्मृताः।

स्वादुः+अम्लविपाकः+अन्यः+ व्रीहिः पित्तकरोगुरुः॥10॥

बहुमूत्रपुरीषोष्मा त्रिदोषः+तु+एव पाटलः।

कङ्गुकोद्रवनीवारश्यामाकादि हिमं लघु॥11॥

तृणधान्यं पवनकृत्+लेखनं कफपित्तहृत्।
भग्नसन्धानकृत्+तत्र प्रियङ्गुः+बृहणी गुरुः॥12॥
कोरदूषः परं ग्राही स्पर्शशीतः+ विषापहः।
रूक्षः शीतः+ गुरुः स्वादुः सरः+ विड्वातकृद्यवः॥13॥
वृष्यः स्थैर्यकरः+ मूत्रमेदः पित्तकफान् जयेत्।
पीनसश्वासकासोरुस्तम्भकण्ठत्वगामयान्॥14॥
न्यूनः+ यवात्+अनुयवः रूक्षोष्णः+ वंशजः+ यवः।
वृष्यः शीतः+ गुरुः स्निग्धः+ जीवनः+ वातपित्तहा॥15॥
सन्धानकारी मधुरः+ गोधूमः स्थैर्यकृत्सरः।
पथ्या नन्दीमुखी शीता कषायमधुरा लघुः॥16॥
मुद्गाढकीमसूरादि शिम्बीधान्यं विबन्धकृत्।
कषायं स्वादु सङ्ग्राहि कटुपाकं हिमं लघु॥17॥
मेदःश्लेष्मास्रपित्तेषु हितं लेपोपसेकयोः।
वरः+अत्र मुद्गः+अल्पचलः कालयः+तु+अतिवातलः॥18॥
राजमाषः+अनिलकरः+ रूक्षः+ बहुशकृद्गुरुः।
उष्णाः कुलत्थाः पाके+अम्लाः शुक्राश्मश्वासपीनसान्॥19॥
कासार्शः कफवातान्+च घ्नन्ति पित्तास्रदाः परम्।
निष्पावः+ वातपित्तास्रस्तन्यमूत्रकरः+ गुरुः॥20॥
सरः+ विदाही दृक्शुक्रकफशोफविषापहः।
माषः स्निग्धः+ बलश्लेष्ममलपित्तकरः सरः॥21॥
गुरूष्णः+अनिलहा स्वादुः शुक्रवृद्धिविरेककृत्।
फलानि माषवत्+विद्यात् काकाण्डोलात्मगुप्तयोः॥22॥
उष्णः+त्वच्यः+ हिमः स्पर्शे केश्यः+ बल्यः+तिलः+ गुरुः।
अल्पमूत्रः कटुः पाके मेधा+अग्निकफपित्तकृत्॥23।
स्निग्धोमा स्वादुतिक्तोष्णा कफपित्तकरी गुरुः।
दृक्शुक्रहृत्कटुः पाके तद्वत्+बीजं कुसुम्भजम्॥24॥
माषः+अत्र सर्वेषु+अवरः+ यवकः शूकजेषु च।
नवं धान्यम्+अभिष्यन्दि लघु संवत्सरोषितम्॥25॥
शीघ्रजन्मं तथा सूप्यं निस्तुषं युक्तिभर्जितम्।
मण्डपेयाविलेपीनाम्+ओदनस्य च लाघवम्॥26॥
यथापूर्वं शिवः+तत्र मण्डः+ वातानुलोमनः।
तृड्ग्लानिदोषशेषघ्नः पाचनः+ धातुसाम्यकृत्॥27॥

स्रोतोमार्दवकृत्स्वेदी सन्धुक्षयति च+अनलम्।
क्षुत्तृष्णाग्लानिदौर्बल्यकुक्षिरोगज्वरापहा॥28॥
मलानुलोमनी पथ्या पेया दीपनपाचनी।
विलेपी ग्राहिणी हृद्या तृष्णाघ्नी दीपनी हिता॥29॥
व्रणाक्षिरोगसंशुद्धदुर्बलस्नेहपायिनाम्।
सुधौतः प्रस्रुतः स्विन्नः+अत्यक्तोष्मा च+ओदनः+ लघुः॥30॥
यः+च+आग्नेयौषधक्वाथसाधितः+ भृष्टतण्डुलः।
विपरीतः+ गुरुः क्षीरमांसाद्यैः+यः+च साधितः॥31॥
इति द्रव्यक्रियायोगमानाद्यैः सर्वम्+आदिशेत्।
बृंहणः प्रीणनः+ वृष्यः+चक्षुष्यः+ व्रणहा रसः॥32॥
मौद्गः+तु पथ्यः संशुद्ध व्रणकण्ठाक्षिरोगिणाम्।
वातानुलोमी कौलत्थः+ गुल्मतूनीप्रतूनिजित्॥33॥
तिलपिण्याकविकृतिः शुष्कशाकं विरूढकम्।
शाण्डाकीवटकं दृग्घ्नं दोषलं ग्लपनं गुरु॥34॥
रसाला बृंहणी वृष्या स्निग्धा बल्या रुचिप्रदा।
श्रमक्षुत्तृट्क्लमहरं पानकं प्रीणनं गुरु॥35॥
विष्टम्भि मूत्रलं हृद्यं यथाद्रव्यगुणं च तत्।
लाजाः+तृट्छर्द्यतीसारमेहमेदः कफच्छिदः॥36॥
कासपित्तोपशमना दीपना लघवः+ हिमाः।
पृथुका गुरवः+ बल्याः कफविष्टम्भकारिणः॥37॥
धाना विष्टम्भिनी रूक्षा तर्पणी लेखनी गुरुः।
सक्तवः+ लघवः क्षुत्तृट्श्रमनेत्रामयव्रणान्॥38॥
घ्नन्ति सन्तर्पणाः पानात्सद्यः+ एव बलप्रदाः।
न+उदकान्तरितान्न द्विः+न निशायां न केवलान्॥39॥
न भुक्त्वा न द्विजैः+छित्त्वा सक्तूनद्यात्+न वा बहून्।
पिण्याकः+ ग्लपनः+ रूक्षः+ विष्टम्भी दृष्टिदूषणः॥40॥
वेसवारः+ गुरुः स्निग्धः+ बलोपचयवर्धनः।
मुद्गादिजास्तु गुरवः+ यथाद्रव्यगुणानुगाः॥41॥
कुकूलकर्परभ्राष्ट्रकन्द्वङ्गारविपाचितान्।
एकयोनील्लघून्विद्यात्+अपूपान्+उत्तरोत्तरम्॥42॥
हरिणैणकुरङ्गर्क्षगोकर्णमृगमातृकाः।
शशशम्बरचारुष्कशरभाद्याः+ मृगाः स्मृताः॥43॥

लाववार्तीकवार्तीः+अरक्तवर्त्मककुक्कुभाः।
कपिञ्जलोपचक्राख्यचकोरकुरुबाहवः॥44॥
वर्तकः+ वर्तिका च+एव तित्तिरिः क्रकरः शिखी।
ताम्रचूडाख्यबकरगोनर्दगिरिवर्तिकाः॥45॥
तथा शारपदेन्द्राभवरटाद्याः+च विष्किराः।
जीवञ्जीवकदात्यूहभृङ्गाह्वशुकसारिकाः॥46॥
लट्वाकोकिलहारीतकपोतचटकादयः।
प्रतुदाः भेकगोधाहिश्वाविदाद्या विलेशयाः॥47॥
गोखराश्वतरोष्ट्राश्वद्वीपिसिंहर्क्षवानराः।
मार्जारमूषकव्याघ्रवृकबभ्रुतरक्षवः॥48॥
लोपाकजम्बुकश्येनचाषवान्तादवायसाः।
शशघ्नीभासकुररगृध्रोलूककुलिङ्गकाः॥49॥
धूमिका मधुहा च+इति प्रसहाः+ मृगपक्षिणः।
वराहमहिषन्यङ्कुरुरुरोहितवारणाः॥50॥
सृमरः+चमरः खड्गः+ गवयः+च महामृगाः।
हंससारसकादम्बबककारण्डवप्लवाः॥51॥
बलाकोत्क्रोशचक्राह्वमद्गुक्रौञ्चादयः+अप्चराः।
मत्स्या रोहितपाठीनकूर्मकुम्भीरकर्कटाः॥42॥
शुक्तिशङ्खोद्रशम्बूकशफरीवर्मिचन्द्रिकाः।
चुलूकीनक्रमकरशिशुमारतिमिङ्गिलाः॥53॥
राजीचिलिचिमाद्याः+च मांसम्+इति+आहुः+अष्टधा।
(मृग्यं वैष्किरिकं किञ्च प्रातुदं च बिलेशयम्।
प्रासहं च महामृग्यम्+अप्चरं मात्स्यम्+अष्टधा॥1॥)
योनिष्वजावी व्यामिश्रगोचरत्वात्+अनिश्चिते॥54॥
आद्यान्त्या जाङ्गलानूपा मध्यौ साधारणौ स्मृतौ।
तत्र बद्धमलाः शीताः+ लघवः+ जाङ्गलाः+ हिताः॥55॥
पित्तोत्तरे वातमध्ये सन्निपाते कफानुगे।
दीपनः कटुकः पाके ग्राही रूक्षः+ हिमः शशः॥56॥
ईषदुष्णगुरुस्निग्धा बृंहणाः+ वर्तकादयः।
तित्तिरिः+तेषु+अपि वरः+ मेधाग्निबलशुक्रकृत्॥57॥
ग्राही वर्ण्यः+अनिलोद्रिक्तसन्निपातहरः परम्।
न+अतिपथ्यः शिखी पथ्यः श्रोत्रस्वरवयोदृशाम्॥58॥

तद्वत्+च कुक्कुटः+ वृष्यः ग्राम्यः+तु श्लेष्मलः+ गुरुः।
मेधानलकराः+ हृद्याः क्रकराः सोपचक्रकाः॥59॥
गुरुः सलवणः काणकपोतः सर्वदोषकृत्।
चटकाः श्लेष्मलाः स्निग्धाः+ वातघ्नाः शुक्रलाः परम्॥60॥
गुरूष्णस्निग्धमधुरा वर्गाः+च+अतः+ यथा+उत्तरम्।
मूत्रशुक्रकृतः+ बल्याः+ वातघ्नाः कफपित्तलाः॥61॥
शीताः+ महामृगाः+तेषु क्रव्यात्+अप्रसहाः पुनः।
लवणानुरसाः पाके कटुका मांसवर्धनाः॥62॥
जीर्णार्शोग्रहणीदोषशोषार्तानां परं हिताः।
न+अतिशीतगुरुस्निग्धं मांसम्+आजम्+अदोषलम्॥63॥
शरीरधातुसामान्यात्+अनभिष्यन्दि बृंहणम्।
विपरीतम्+अतः+ ज्ञेयम्+आविकं बृंहणं तु तत्॥64॥
शुष्ककासश्रमात्यग्निविषमज्वरपीनसान्।
कार्श्यं केवलवातान्+च गोमांसं सन्नियच्छति॥65॥
उष्णः+ गरीयान्+महिषः स्वप्नदार्ढ्यबृहत्त्वकृत्।
तद्वत्+वराहः श्रमहा रुचिशुक्रबलप्रदः॥66॥
मत्स्याः परं कफकराः चिलिचीमः+त्रिदोषकृत्।
लावरोहितगोधैणाः स्वे स्वे वर्गे वराः परम्॥67॥
मांसं सद्योहतं शुद्धं वयःस्थं च भजेत् त्यजेत्।
मृतं कृशं भृशं मेद्यं व्याधिवारिविषैः+हतम्॥68॥
पुंस्त्रियोः पूर्वपश्चार्धे गुरुणी गर्भीणी गुरुः।।
लघुर्योषित्+चतुष्पात्सु विहङ्गेषु पुनः पुमान्॥69॥
शिरः स्कन्धोरुपृष्ठस्य कट्याः सक्थ्नोः+च गौरवम्।
तथा+आमपक्वाशययोः+यथापूर्वं विनिर्दिशेत्॥70॥
शोणितप्रभृतीनां च धातूनाम्+उत्तरोत्तरम्।
मांसाद्गरीयः+ वृषणमेढ्रवृक्कयकृद्गुदम्॥71॥
शाकं पाठाशठीसूषासुनिषण्णसतीनजम्।
त्रिदोषघ्नं लघु ग्राहि सराजक्षववास्तुकम्॥72॥
सुनिषण्णः+अग्निकृत् वृष्यः+तेषु राजक्षवः परम्।
ग्रहण्यर्शोविकारघ्नः वर्चोभेदि तु वास्तुकम्॥73॥
हन्ति दोषत्रयं कुष्ठं वृष्या सोष्णा रसायनी।
काकमाची सरा स्वर्या च+आङ्गेर्यम्लाग्निदीपनी॥74॥

ग्रहणि+अर्शः+अनिलश्लेष्माहितोष्णा ग्राहिणी लघुः।
पटोलसप्तलारिष्टशार्ङ्गेष्टावल्गुजामृताः॥75॥
वेत्राग्रबृहतीवासा कुतिलीतिलपर्णिकाः।
मण्डूकपर्णीकर्कोटकारवेल्लकपर्पटाः॥76॥
नाडीकलायं गोजिह्वा वार्ताकं वनतिक्तकम्।
करीरं कुलकं नन्दी कुचैला शकुलादनी॥77॥
कटिल्लं केम्बुकं शीतं सकोशातककर्कशम्।
तिक्तं पाके कटु ग्राहि वातलं कफपित्तजित्॥78॥
हृद्यं पटोलं कृमिनुत्स्वादुपाकं रुचिप्रदम्।
पित्तलं दीपनं भेदि वातघ्नं बृहतीद्वयम्॥79॥
वृषं तु वमिकासघ्नं रक्तपित्तहरं परम्।
कारवेल्लं सकटुकं दीपनं कफजित्+परम्॥80॥
वार्ताकं कटु तिक्तोष्णं मधुरं कफवातजित्।
सक्षारम्+अग्निजननं हृद्यं रुच्यम्+अपित्तलम्॥81॥
करीरमाध्मानकरं कषायं स्वादु तिक्तकम्।
कोशातकावल्गुजकौ भेदिनौ+अग्निदीपनौ॥82॥
तण्डुलीयः+ हिमः+ रूक्षः स्वादुपाकरसः+ लघुः।
मदपित्तविषास्रघ्नः मुञ्जातं वातपित्तजित्॥83॥
स्निग्धं शीतं गुरु स्वादु बृंहणं शुक्रकृत्+परम्।
गुर्वी सरा तु पालङ्क्या मदघ्नी च+अपि+उपोदका॥84॥
पालङ्क्यावत्स्मृतः+चञ्चुः सः+ तु सङ्ग्रहणात्मकः।
विदारी वातपित्तघ्नी मूत्रला स्वादुशीतला॥85॥
जीवनी बृंहणी कण्ठ्या गुर्वी वृष्या रसायनम्।
चक्षुष्या सर्वदोषघ्नी जीवन्ती मधुरा हिमा॥86॥
कूष्माण्डतुम्बकालिङ्गकर्कार्वेर्वारुतिण्डिशम्।
तथा त्रपुसचीनाकचिर्भटं कफवातकृत्॥87॥
भेदि विष्टम्भ्यभिष्यन्दि स्वादुपाकरसं गुरु।
वल्लीफलानां प्रवरं कूष्माण्डं वातपित्तजित्॥88॥
बस्तिशुद्धिकरं वृष्यम् त्रपुसं तु+अतिमूत्रलम्।
तुम्बं रूक्षतरं ग्राहि कालिङ्गैः+वारुचिः+भटम्॥89॥
बालं पित्तहरं शीतं विद्यात्+पक्वम्+अतः+अन्यथा।
शीर्णवृन्तं तु सक्षारं पित्तलं कफवातजित्॥90॥

रोचनं दीपनं हृद्यमष्ठीलानाहनुत्+लघु।
मृणालबिसशालूककुमुदोत्पलकन्दकम्॥91॥
नन्दीमाषककेलूटशृङ्गाटककशेरुकम्।
क्रौञ्चादनं कलोड्यं च रूक्षं ग्राहि हिमं गुरु॥92॥
कलम्बनालिकामार्षकुटिञ्जरकुतुम्बकम्।
चिल्लीलट्वाकलोणीकाकुरूटकगवेधुकम्॥93॥
जीवन्तझुञ्झ्वेडगजयवशाकसुवर्चलाः।
आलुकानि च सर्वाणि तथा सूप्यानि लक्ष्मणम्॥94॥
स्वादु रूक्षं सलवणं वातश्लेष्मकरं गुरु।
शीतलं सृष्टविण्मूत्रं प्रायः+ विष्टभ्य जीर्यति॥95॥
स्विन्नं निष्पीडितरसं स्नेहाढ्यं न+अतिदोषलम्।
लघुपत्रा तु या चिल्ली सा वास्तुकसमा मता॥96॥
तर्कारीवरणं स्वादु सतिक्तं कफवातजित्।
वर्षाभ्वौ कालशाकं च सक्षारं कटुतिक्तकम्॥97॥
दीपनं भेदनं हन्ति गरशोफकफानिलान्।
दीपनाः कफवातघ्नाः+चिरिबिल्वाङ्कुराः सराः॥98॥
शतावर्यङ्कुराः+तिक्ताः+ वृष्याः+ दोषत्रयापहाः।
रूक्षः+ वंशकरीरः+तु विदाही वातपित्तलः॥99॥
पत्तूरः+ दीपनः+तिक्तः प्लीहार्शः कफवातजित्।
कृमिकासकफोत्क्लेदान् कासमर्दः+ जयेत्+सरः॥100॥
रूक्षोष्णम्+अम्लं कौसुम्भं गुरु पित्तकरं सरम्।
गुरूष्णं सार्षपं बद्धविण्मूत्रं सर्वदोषकृत्॥101॥
यत्+ बालम्+अव्यक्तरसं किञ्चित्क्षारं सतिक्तकम्।
तन्मूलकं दोषहरं लघु सोष्णं नियच्छति॥102॥
गुल्मकासक्षयश्वासव्रणनेत्रगलामयान्।
ज्वराग्निसादोदावर्तपीनसाः+च महत्+पुनः॥103॥
रसे पाके च कटुकम्+उष्णवीर्यं त्रिदोषकृत्।
गुरुः+अभिष्यन्दि च स्निग्धसिद्धं तत्+अपि वातजित्॥104॥
वातश्लेष्महरं शुष्कं सर्वम् आमं तु दोषलम्।
कटूष्णः+ वातकफहा पिण्डालुः पित्तवर्धनः॥105॥
कुठेरशिग्रुसुरससुमुखासुरिभूः+तृणम्।
फणिज्जार्जकजम्बीरप्रभृति ग्राहि शालनम्॥106॥

विदाहि कटु रूक्षोष्णं हृद्यं दीपनरोचनम्।
दृक्शुक्रकृमिहृत्तीक्ष्णं दोषोत्क्लेशकरं लघु॥107॥
हिध्माकासविषश्वासपार्श्वरुक्पूतिगन्धहा।
सुरसः सुमुखः+ न+अतिविदाही गरशोफहा॥108॥
आर्द्रिका तिक्तमधुरा मूत्रला न च पित्तकृत्।
लशुनः+ भृशतीक्ष्णोष्णः कटुपाकरसः सरः॥109॥
हृद्यः केश्यः+ गुरुः+वृष्यः स्निग्धः+ रोचनदीपनः।
भग्नसन्धानकृद्बल्यः+ रक्तपित्तप्रदूषणः॥110॥
किलासकुष्ठगुल्मार्शोमेहक्रिमिकफानिलान्।
सहिध्मापीनसश्वासकासान् हन्ति रसायनम्॥111॥
पलाण्डुः+तद्गुणन्यूनः श्लेष्मलः+ न+अतिपित्तलः।
कफवातार्शसां पथ्यः स्वेदे+अभ्यवहृतौ तथा॥112॥
तीक्ष्णः+ गृञ्जनकः+ ग्राही पित्तिनां हितकृत्+न सः।
दीपनः सूरणः+ रुच्यः कफघ्नः+ विशदः+ लघुः॥113॥
विशेषादर्शसां पथ्यः भूकन्दः+तु+अतिदोषलः।
पत्रे पुष्पे फले नाले कन्दे च गुरुता क्रमात्॥114॥
वरा शाकेषु जीवन्ती सार्षपं तु+अवरं परम्।
द्राक्षा फलोत्तमा वृष्या चक्षुष्या सृष्टमूत्रविट्॥115॥
स्वादुपाकरसा स्निग्धा सकषाया हिमा गुरुः।
निहन्ति+अनिलपित्तास्रतिक्तास्यत्वमदात्ययान्॥116॥
तृष्णाकासश्रमश्वासस्वरभेदक्षतक्षयान्।
उद्रिक्तपित्तान्+जयति त्रीन्+दोषान्+स्वादु दाडिमम्॥117॥
पित्ताविरोधि न+अत्युष्णम्+अम्लं वातकफापहम्।
सर्वं हृद्यं लघु स्निग्धं ग्राहि रोचनदीपनम्॥118॥
मोचखर्जूरपनसनारिकेलपरूषकम्।
आम्राततालकाश्मर्यराजादनमधूकजम्॥119॥
सौवीरबदराङ्कोल्लफल्गुश्लेष्मातकोद्भवम्।
वातामाभिषुकाक्षोडमुकूलकनिकोचकम्॥120॥
उरुमाणं प्रियालं च बृंहणं गुरु शीतलम्।
दाहक्षतक्षयहरं रक्तपित्तप्रसादनम्॥121॥
स्वादुपाकरसं स्निग्धं विष्टम्भि कफशुक्रकृत्।
फलं तु पित्तलं तालं सरं काश्मर्यजं हिमम्॥122॥

शकृत्+मूत्रविबन्धघ्नं केश्यं मेध्यं रसायनम्।
वातामाद्युष्णवीर्यं तु कफपित्तकरं सरम्॥123॥
परं वातहरं स्निग्धम्+अनुष्णं तु प्रियालजम्।
प्रियालमज्जा मधुरः+ वृष्यः पित्तानिलापहः॥124॥
कोलमज्जा गुणैः+तद्वत्+तृट्छर्दिः कासजित्+च सः।
पक्वं सुदुर्जरं बिल्वं दोषलं पूतिमारुतम्॥125॥
दीपनं कफवातघ्नं बालं ग्राहि+उभयं च तत्।
कपित्थम्+आमं कण्ठघ्नं दोषलं दोषघाति तु॥126॥
पक्वं हिध्मावमथुजित् सर्वं ग्राहि विषापहम्।
जाम्बवं गुरु विष्टम्भि शीतलं भृशवातलम्॥127॥
सङ्ग्राहि मूत्रशकृतोः+अकण्ठ्यं कफपित्तजित्।
वातपित्तास्रकृद्बालं बद्धास्थि कफपित्तकृत्॥128॥
गुर्वाम्रं वातजित्पक्वं स्वाद्वम्लं कफशुक्रकृत्।
वृक्षाम्लं ग्राहि रूक्षोष्णं वातश्लेष्महरं लघु॥129॥
शम्या गुरूष्णं केशघ्नं रूक्षं पीलु तु पित्तलम्।
कफवातहरं भेदि प्लीहार्शः कृमिगुल्मनुत्॥130॥
सतिक्तं स्वादु यत्पीलु न+अत्युष्णं तत्+त्रिदोषजित्।
त्वक्तिक्तकटुका स्निग्धा मातुलुङ्गस्य वातजित्॥131॥
बृंहणं मधुरं मांसं वातपित्तहरं गुरु।
लघु तत्केसरं कासश्वासहिध्मामदात्ययान्॥132॥
आस्यशोषानिलश्लेष्मविबन्धच्छर्द्यरोचकान्।
गुल्मोदरार्शः शूलानि मन्दाग्नित्वं च नाशयेत्॥133॥
भल्लातकस्य त्वङ्मांसं बृंहणं स्वादु शीतलम्।
तदस्थ्यग्निसमं मेध्यं कफवातहरं परम्॥134॥
स्वाद्वम्लं शीतम्+उष्णं च द्विधा पालेवतं गुरु।
रुच्यम्+अत्यग्निशमनम् रुच्यं मधुरम्+आरुकम्॥135॥
पक्वम्+आशु जरां याति न+अत्युष्णगुरुदोषलम्।
द्राक्षापरूषकं चार्द्रम्+अम्लं पित्तकफप्रदम्॥136॥
गुरूष्णवीर्यं वातघ्नं सरं सकरमर्दकम्।
तथा+अम्लं कोलकर्कन्धुलकुचाम्रातकारुकम्॥137॥
ऐरावतं दन्तशठं सतूदं मृगलिण्डिकम्।
न+अतिपित्तकरं पक्वं शुष्कं च करमर्दकम्॥138॥

दीपनं भेदनं शुष्कम्+अम्लीकाकोलयोः फलम्।
तृष्णाश्रमक्लमच्छेदि लघ्विष्टं कफवातयोः॥139॥
फलानाम्+अवरं तत्र लकुचं सर्वदोषकृत्।
हिमानलोष्णदुर्वातव्याललालादिदूषितम्॥140॥
जन्तुजुष्टं जले मग्नम्+अभूमिजम्+अनार्तवम्।
अन्यधान्ययुतं हीनवीर्यं जीर्णतया+अति च॥141॥
धान्यं त्यजेत्+तथा शाकं रूक्षसिद्धम्+अकोमलम्।
असञ्जातरसं तद्वत्+शुष्कं च+अन्यत्र मूलकात्॥142॥
प्रायेण फलम्+अपि+एवं तथा+आमं बिल्ववर्जितम्।
विष्यन्दि लवणं सर्वं सूक्ष्मं सृष्टमलं मृदुः॥143॥
वातघ्नं पाकि तीक्ष्णोष्णं रोचनं कफपित्तकृत्।
सैन्धवं तत्र सुस्वादु वृष्यं हृद्यं त्रिदोषनुत्॥144॥
लघ्वनुष्णं दृशः पथ्यम्+अविदाह्यग्निदीपनम्।
लघु सौवर्चलं हृद्यं सुगन्ध्युद्गारशोधनम्॥145॥
कटुपाकं विबन्धघ्नं दीपनीयं रुचिप्रदम्।
ऊर्ध्वाधः कफवातानुलोमनं दीपनं बिडम्॥146॥
विबन्धान्+आह विष्टम्भशूलगौरवनाशनम्।
विपाके स्वादु सामुद्रं गुरु श्लेष्मविवर्धनम्॥147॥
सतिक्तकटुकक्षारं तीक्ष्णम्+उत्क्लेदि च+औद्भिदम्।
कृष्णे सौवर्चलगुणा लवणे गन्धवर्जिताः॥148॥
रोमकं लघु पांसूत्थं सक्षारं श्लेष्मलं गुरु।
लवणानां प्रयोगे तु सैन्धवादि प्रयोजयेत्॥149॥
गुल्महृद्ग्रहणीपाण्डुप्लीहानाहगलामयान्।
श्वासार्शः कफकासान्+च शमयेत्+यवशूकजः॥150॥
क्षारः सर्वः+च परमं तीक्ष्णोष्णः कृमिजित्+लघुः।
पित्तासृग्दूषणः पाकी छेद्यहृद्यः+ विदारणः॥151॥
अपथ्यः कटुलावण्यात्+शुक्रौजः केशचक्षुषाम्।
हिङ्गु वातकफान्+आह शूलघ्नं पित्तकोपनम्॥152॥
कटुपाकरसं रुच्यं दीपनं पाचनं लघु।
कषाया मधुरा पाके रूक्षा विलवणा लघुः॥153॥
दीपनी पाचनी मेध्या वयसः स्थापनी परम्।
उष्णवीर्या सरायुष्या बुद्धीन्द्रियबलप्रदा॥154॥

कुष्ठवैवर्ण्यवैस्वर्यपुराणविषमज्वारान्।
शिरः+अक्षिपाण्डुहृद्रोगकामलाग्रहणीगदान्॥155॥
सशोषशोफातीसारमेदमोहवमिक्रिमीन्।
श्वासकासप्रसेकार्शः प्लीहान्+आह गरोदरम्॥156॥
विबन्धं स्रोतसां गुल्मम्+ऊरुस्तम्भम्+अरोचकम्।
हरीतकी जयेत्+व्याधीन्+तान्+तान्+च कफवातजान्॥157॥
तद्वत्+आमलकं शीतम्+अम्लं पित्तकफापहम्।
कटु पाके हिमं केश्यम्+अक्षम्+ईषत्+च तद्गुणम्॥158॥
इयं रसायनवरा त्रिफला+अक्ष्यामयापहा।
रोपणी त्वग्गदक्लेदमेदोमेहकफास्रजित्॥159॥
सकेसरं चतुर्जातं त्वक्पत्रैलं त्रिजातकम्।
पित्तप्रकोपि तीक्ष्णोष्णं रूक्षं रोचनदीपनम्॥160॥
रसे पाके च कटुकं कफघ्नं मरिचं लघु।
श्लेष्मला स्वादुशीतार्द्रा गुर्वी स्निग्धा च पिप्पली॥161॥
सा शुष्का विपरीता+अतः स्निग्धा वृष्या रसे कटुः।
स्वादुपाकानिलश्लेष्मश्वासकासापहा सरा॥162॥
न ताम्+अत्युपयुञ्जीत रसायनविधिं विना।
नागरं दीपनं वृष्यं ग्राहि हृद्यं विबन्धनुत्॥163॥
रुच्यं लघु स्वादुपाकं स्निग्धोष्णं कफवातजित्।
तद्वत्+आर्द्रकम्+एतत्+च त्रयं त्रिकटुकं जयेत्॥164॥
स्थौल्याग्निसदनश्वासकासश्लीपदपीनसान्।
चविका पिप्पलीमूलं मरिचाल्पान्तरं गुणैः॥165॥
चित्रकः+अग्निसमः पाके शोफार्शः कृमिकुष्ठहा।
पञ्चकोलकम्+एतत्+च मरिचेन विना स्मृतम्॥166॥
गुल्मप्लीहोदरान्+आह शूलघ्नं दीपनं परम्।
बिल्वकाश्मर्यतर्कारीपाटलाटिण्टुकैः+महत्॥167॥
जयेत्+कषायतिक्तोष्णं पञ्चमूलं कफानिलौ।
ह्रस्वं बृहत्यंशुमतीद्वयगोक्षुरकैः स्मृतम्॥168॥
स्वादुपाकरसं न+अतिशीतोष्णं सर्वदोषजित्।
बलापुनर्नवैरण्डशूर्पपर्णीद्वयेन तु॥169॥
मध्यमं कफवातघ्नं न+अतिपित्तकरं सरम्।
अभीरुवीराजीवन्तीजीवकर्षभकैः स्मृतम्॥170॥

जीवनाख्यं तु चक्षुष्यं वृष्यं पित्तानिलापहम्।
तृणाख्यं पित्तजिद्दर्भकासेक्षुशरशालिभिः॥171॥
शूकशिम्बीजपक्वान्नमांसशाकफलौषधैः।
वर्गितैः+अन्नलेशः+अयम्+उक्तः+ नित्योपयोगिकः॥172॥
इति श्रीवैद्यपतिसिंहगुप्तसूनुश्रीमद्वाग्भटविरचितायाम्+अष्टाङ्गहृदयसंहितायां सूत्रस्थाने+अन्नरूपविज्ञानीयः+ नाम षष्ठः+अध्यायः।
सप्तमः+अध्यायः
अथ+अतः+अन्नरक्षाध्यायं व्याख्यास्यामः।
इति ह स्म+आहुः+आत्रेयादयः+ महर्षयः।
राजा राजगृहासन्ने प्राणाचर्यं निवेशयेत्।
सर्वदा सः+ भवति+एवं सर्वत्र प्रतिजागृविः॥1॥
अन्नपानं विषात्+रक्षेत्+विशेषेण महीपतेः।
योगक्षेमौ तदायत्तौ धर्माद्याः+ यन्निबन्धनाः
ओदनः+ विषवान् सान्द्रः+ याति+अविस्राव्यताम्+इव।
चिरेण पच्यते पक्वः+ भवेत्+पर्युषितोपमः॥3॥
मयूरकण्ठतुल्योष्मा मोहमूर्च्छाप्रसेककृत्।
हीयते वर्णगन्धाद्यैः क्लिद्यते चन्द्रिकाचितः॥4॥
व्यञ्जनानि+आशु शुष्यन्ति ध्यामक्वाथानि तत्र च।
हीना+अतिरिक्ता विकृता छाया दृश्येत न+एव वा॥5॥
फेनोर्ध्वराजीसीमन्ततन्तुबुद्बुदसम्भवः।
विच्छिन्नविरसा रागाः खाण्डवाः शाकम्+आमिषम्॥6॥
नीला राजी रसे ताम्रा क्षीरे दधनि दृश्यते।
श्यावा+आपीतासिता तक्रे घृते पानीयसन्निभा॥7॥
मस्तुनि स्यात्कपोताभा राजी कृष्णा तुषोदके।
काली मद्याम्भसोः क्षौद्रे हरित्तैले+अरुणोपमा॥8॥
पाकः फलानाम्+आमानां पक्वानां परिकोथनम्।
द्रव्याणाम्+आर्द्रशुष्काणां स्यातां म्लानिविवर्णते॥9॥
मृदूनां कठिनानां च भवेत्+स्पर्शविपर्ययः।
माल्यस्य स्फुटिताग्रत्वं म्लानिः+गन्धान्तरोद्भवः॥10॥
ध्याममण्डलता वस्त्रे शदनं तन्तुपक्ष्मणाम्।
धातुमौक्तिककाष्ठाश्मरत्नादिषु मलाक्तता॥11॥
स्नेहस्पर्शप्रभाहानिः सप्रभत्वं तु मृण्मये।

विषदः श्यावशुष्कास्यः+ विलक्षः+ वीक्षते दिशः॥12॥
स्वेदवेपथुमान्+त्रस्तः+ भीतः स्खलति जृम्भते।
प्राप्यान्नं सविषं तु+अग्निः+एकावर्तः स्फुटत्यति॥13॥
शिखिकण्ठाभधूमार्चिः+अनर्चिः+वा+उग्रगन्धवान्।
म्रियन्ते मक्षिकाः प्राश्य काकः क्षामस्वरः+ भवेत्॥14॥
उत्क्रोशन्ति च दृष्ट्वा+एतत्+शुकदात्यूहसारिकाः।
हंसः प्रस्खलति ग्लानिः+जीवन्+जीवस्य जायते॥15॥
चकोरस्य+अक्षिवैराग्यं क्रौञ्चस्य स्यात्+मदोदयः।
कपोतपरभृद्दक्षचक्रवाका जहति+असून्॥16॥
उद्वेगं याति मार्जारः शकृत्+मुञ्चति वानरः।
हृष्येत्+मयूरः+तद्दृष्ट्या मन्दतेजः+ भवेत्+विषम्॥17॥
इति+अन्नं विषवत्+ज्ञात्वा त्यजेत्+एवं प्रयत्नतः।
यथा तेन विपद्येरन्+अपि न क्षुद्रजन्तवः॥18॥
स्पृष्टे तु कण्डूदाहोषाज्वरार्तिस्फोटसुप्तयः।
नखरोमच्युतिः शोफः सेकाद्या विषनाशनाः॥19॥
शस्ताः+तत्र प्रलेपाः+च सेव्यचन्दनपद्मकैः।
ससोमवल्कतालीसपत्रकुष्ठामृतानतैः॥20॥
लाला जिह्वोष्ठयोः+जाड्यम्+ऊषा चिमिचिमायनम्।
दन्तहर्षः+ रसाज्ञत्वं हनुस्तम्भः+च वक्त्रगे॥21॥
सेव्याद्यैः+तत्र गण्डूषाः सर्वं च विषजित्+हितम्।
आमाशयगते स्वेदमूर्छाध्मानमदभ्रमाः॥22॥
रोमहर्षः+ वमिः+दाहः+चक्षुः+हृदयरोधनम्।
बिन्दुभिः+च+आचयः+अङ्गानां पक्वाशयगते पुनः॥23॥
अनेकवर्णं वमति मूत्रयति+अतिसार्यते।
तन्द्रा कृशत्वं पाण्डुत्वम्+उदरं बलसङ्क्षयः॥24॥
तयोः+वान्तविरिक्तस्य हरिद्रे कटभीं गुडम्।
सिन्दुवारितनिष्पावबाष्पिकाशतपर्विकाः॥25॥
तण्डुलीयकमूलानि कुक्कुटाण्डम्+अवल्गुजम्।
नौ+अनाञ्जनपानेषु योजयेत्+विषशान्तये॥26॥
विषभुक्ताय दद्यात्+च शुद्धाय+उर्ध्वम्+अधः+तथा।
सूक्ष्मं ताम्ररजः काले सक्षौद्रं हृद्विशोधनम्॥27॥
शुद्धे हृदि ततः शाणं हेमचूर्णस्य दापयेत्।

न सज्जते हेमपाङ्गे पद्मपत्रे+अम्बुवत्+विषम्॥28॥
जायते विपुलं च+आयुः+गरे+अपि+एष विधिः स्मृतः।
विरुद्धम्+अपि च+आहारं विद्यात्+विषगरोपमम्॥29॥
आनूपम्+आमिषं माषक्षौद्रक्षीरविरूढकैः।
विरुध्यते सह बिसैः+मूलकेन गुडेन वा॥30॥
विशेषात्+पयसा मत्स्या मत्स्येषु+अपि चिलीचिमः।
विरुद्धम्+अम्लं पयसा सह सर्वं फलं तथा॥31॥
तद्वत्कुलत्थवरककङ्गुवल्लमकुष्टकाः।
भक्षयित्वा हरितकं मूलकादि पयः+त्यजेत्॥32॥
वाराहं श्वाविधा न+अद्यात्+दध्ना पृषतकुक्कुटौ।
आममांसानि पित्तेन माषसूपेन मूलकम्॥33॥
अविं कुसुम्भशाकेन बिसैः सह विरूढकम्।
माषसूपगुडक्षीरदध्याज्यैर्लाकुचं फलम्॥34॥
फलं कदल्याः+तक्रेण दध्ना तालफलेन वा।
कणोषणाभ्यां मधुना काकमाचीं गुडेन वा॥35॥
सिद्धां वा मत्स्यपचने पचने नागरस्य वा।
सिद्धाम्+अन्यत्र वा पात्रे कामात्+ताम्+उषितां निशाम्॥36॥
मत्स्यनिस्तलनस्नेहे साधिताः पिप्पलीः+त्यजेत्।
कांस्ये दशाहम्+उषितं सर्पिः+उष्णं तु+अरुष्करे॥37॥
भासः+ विरुध्यते शूल्यः कम्पिल्लः+तक्रसाधितः।
ऐकध्यं पायससुराकृशराः परिवर्जयेत्॥38॥
मधुसर्पिर्वसातैलपानीयानि द्विशस्त्रिशः।
एकत्र वा समांशानि विरुध्यन्ते परस्परम्॥39॥
भिन्नांशे अपि मध्वाज्ये दिव्यवार्यनुपानतः।
मधुपुष्करबीजं च मधुमैरेयशार्करम्॥40॥
मन्थानुपानः क्षैरेयः+ हारिद्रः कटुतैलवान्।
उपोदिका+अतिसाराय तिलकल्केन साधिता॥41॥
बलाका वारुणीयुक्ता कुल्माषैः+च विरुध्यते।
भृष्टा वराहवसया सा+एव सद्यः+ निहन्ति+असून्॥42॥
तद्वत्+तित्तिरिपत्राढ्यगोधालावकपिञ्जलाः।
ऐरण्डेन+अग्निना सिद्धाः+तत्तैलेन विमूर्च्छिताः॥43॥
हारीतमांसं हारिद्रशूलकप्रोतपाचितम्।

हरिद्रावह्निना सद्यः+ व्यापादयति जीवितम्॥44॥
भस्मपांशुपरिध्वस्तं तत्+एव च समाक्षिकम्।
यत्+किञ्चित्+दोषम्+उत्क्लेश्य न हरेत्+तत्+समासतः॥45॥
विरुद्धं शुद्धिः+अत्र+इष्टा शमः+ वा तद्विरोधिभिः।
द्रव्यैः+तैः+एव वा पूर्वं शरीरस्य+अभिसंस्कृतिः॥46॥
व्यायामस्निग्धदीप्ताग्निवयःस्थबलशालिनाम्।
विरोधि+अपि न पीडायै सात्म्यम्+अल्पं च भोजनम्॥47॥
पादेन+अपथ्यम्+अभ्यस्तं पादपादेन वा त्यजेत्।
निषेवेत हितं तद्वत्+एकद्वित्र्यन्तरीकृतम्॥48॥
अपथ्यम्+अपि हि त्यक्तं शीलितं पथ्यम्+एव वा।
सात्म्यासात्म्यविकाराय जायते सहसा+अन्यथा॥49॥
क्रमेण+अपचिताः+ दोषाः क्रमेण+उपचिताः+ गुणाः।
सन्तः+ यान्ति+अपुनः+भावम्+अप्रकम्प्या भवन्ति च॥50॥
अत्यन्तसन्निधानानां दोषाणां दूषणात्मनाम्।
अहितैः+दूषणं भूयः+ न विद्वान् कर्तुम्+अर्हति॥51॥
आहारशयनाब्रह्मचर्यैः+युक्त्या प्रयोजितैः।
शरीरं धार्यते नित्यम्+आगारम्+इव धारणैः॥52॥
आहारः+ वर्णितः+तत्र तत्र तत्र च वक्ष्यते।
निद्रायत्तं सुखं दुःखं पुष्टिः कार्श्यं बलाबलम्॥53॥
वृषता क्लीबता ज्ञानम्+अज्ञानं जीवितं न च।
अकाले+अतिप्रसङ्गात्+च न च निद्रा निषेविता॥54॥
सुखायुषी पराकुर्यात् कालरात्रिः+इव+अपरा।
रात्रौ जागरणं रूक्षं स्निग्धं प्रस्वपनं दिवा॥55॥
अरूक्षम्+अनभिष्यन्दि तु+आसीनप्रचलायितम्।
ग्रीष्मे वायुचयादानरौक्ष्यरात्र्यल्पभावतः॥56॥
दिवास्वप्नः+ हितः+अन्यस्मिन् कफपित्तकरः+ हि सः।
मुक्त्वा तु भाष्ययानाध्वमद्यस्त्रीभारकर्मभिः॥57॥
क्रोधशोकभयैः क्लान्तान् श्वासहिध्मातिसारिणः।
वृद्धबालाबलक्षीणक्षततृट्शूलपीडितान्॥58॥
अजीर्ण्यभिहतोन्मत्तान् दिवास्वप्नोचितान्+अपि।
धातुसाम्यं तथा हि+एषां श्लेष्मा च+अङ्गानि पुष्यति॥59॥
बहुमेदः कफाः स्वप्युः स्नेहनित्याः+च न+अहनि।

विषार्तः कण्ठरोगी च न+एव जातु निशासु+अपि॥60॥
अकालशयनात्+मोहज्वरस्तैमित्यपीनसाः।
शिरोरुक्शोफहृल्लासस्रोतोरोधाग्निमन्दताः॥61॥
तत्र+उपवासवमनस्वेदनावनम्+औषधम्।
योजयेत्+अतिनिद्रायां तीक्ष्णं प्रच्छर्दनाञ्जनम्॥62॥
नावनं लङ्घनं चिन्तां व्यवायं शोकभीक्रुधः।
एभिः+एव च निद्रायाः+ नाशः श्लेष्मातिसङ्क्षयात्॥63॥
निद्रानाशात्+अङ्गमर्दशिरोगौरवजृम्भिकाः।
जाड्यग्लानिभ्रमापक्तितन्द्राः+ रोगाः+च वातजाः॥64॥
यथाकालम्+अतः+ निद्रां रात्रौ सेवेत सात्म्यतः।
असात्म्यात्+जागरात्+अर्धं प्रातः स्वप्यात्+अभुक्तवान्॥65॥
शीलयेत्+मन्दनिद्रः+तु क्षीरमद्यरसान् दधि।
अभ्यङ्गोद्वर्तनस्नानम्+ऊर्धकर्णाक्षितर्पणम्॥66॥
कान्ताबाहुलताश्लेषः+ निर्वृतिः कृतकृत्यता।
मनः+अनुकूलाः+ विषयाः कामं निद्रासुखप्रदाः॥67॥
ब्रह्मचर्यरतेः+ग्राम्यसुखनिःस्पृहचेतसः।
निद्रा सन्तोषतृप्तस्य स्वं कालं न+अतिवर्तते॥68॥
ग्राम्यधर्मे त्यजेत्+नारीम्+अनुत्तानां रजस्वलाम्।
अप्रियाम्+अप्रियाचारां दुष्टसङ्कीर्णमेहनाम्॥69॥
अतिस्थूलकृशां सूता गर्भिणीम्+अन्ययोषितम्।
वर्णिनीम्+अन्ययोनिं च गुरुदेवनृपालयम्॥70॥
चैत्यश्मशानायतनचत्वराम्बुचतुष्पथम्।
पर्वाणि+अनङ्गं दिवसं शिरोहृदयताडनम्॥71॥
अत्याशितः+अधृतिः क्षुद्वान् दुःस्थिताङ्गः पिपासितः।
बालः+ वृद्धः+अन्यवेगार्तः+त्यजेत्+रोगी च मैथुनम्॥72॥
सेवेत कामतः कामं तृप्तः+ वाजीकृतां हिमे।
त्र्यहात्+वसन्तशरदोः पक्षात्+वर्षानिदाघयोः॥73॥
भ्रमक्लमोरुदौर्बल्यबलधात्विन्द्रियक्षयाः।
अपर्वमरणं च स्यात्+अन्यथा गच्छतः स्त्रियम्॥74॥
स्मृतिमेधायुरारोग्यपुष्टीन्द्रिययशोबलैः।
अधिका मन्दजरसः+ भवन्ति स्त्रीषु संयताः॥75॥
स्नानानुलेपनहिमानिलखण्डखाद्य

शीताम्बुदुग्धरसयूषसुराप्रसन्नाः।
सेवेत च+अनु शयनं विरतौ रतस्य
तस्य+एवम्+आशु वपुषः पुनः+एति धाम॥76॥
श्रुतचरितसमृद्धे कर्मदक्षे दयालौ
भिषजि निरनुबन्धं देहरक्षां निवेश्य।
भवति विपुलतेजः स्वास्थ्यकीर्तिप्रभावः
स्वकुशलफलभोगी भूमिपालः+चिरायुः॥77॥

इति श्रीवैद्यपतिसिंहगुप्तसूनुश्रीमद्वाग्भटविरचितायाम्+अष्टाङ्गहृदयसंहितायां सूत्रस्थाने+अन्नरक्षा नाम सप्तमः+अध्यायः॥7॥

अष्टमः+अध्यायाः।

अथ+अतः+ मात्राशितीयम्+अध्यायं व्याख्यास्यामः।
इति ह स्म+आहुः+आत्रेयादयः+ महर्षयः।
मात्राशी सर्वकालं स्यात्+मात्रा हि+अग्नेः प्रवर्तिका।
मात्रां द्रव्याणि+अपेक्षन्ते गुरूणि+अपि लघूनि+अपि॥1॥
गुरूणाम्+अर्धसौहित्यं लघूनां न+अतितृप्तता।
मात्राप्रमाणं निर्दिष्टं सुखं यावत्+विजीर्यति॥2॥
भोजनं हीनमात्रं तु न बलोपचयौजसे।
सर्वेषां वातरोगाणां हेतुतां च प्रपद्यते॥3॥
अतिमात्रं पुनः सर्वान्+आशु दोषान् प्रकोपयेत्।
पीड्यमाना हि वाताद्या युगपत्+तेन कोपिताः॥4॥
आमेन+अन्नेन दुष्टेन तत्+एव+आविश्य कुर्वते।
विष्टम्भयन्तः+अलसकं च्यावयन्तः+ विसूचिकाम्॥5॥
अधरोत्तरमार्गाभ्यां सहसा+एव+अजितात्मनः।
प्रयाति न+उर्ध्वं न+अधस्तात्+आहारः+ न च पच्यते॥6॥
आमाशये+अलसीभूतः+तेन सः+अलसकः स्मृतः।
विविधैः+वेदनोद्भेदैः+वाय्वादिभृशकोपतः॥7॥
सूचीभिः+इव गात्राणि विध्यति+इति विसूचिका।
तत्र शूलभ्रमानाहकम्पस्तम्भादयः+अनिलात्॥8॥
पित्तात्+ज्वरातिसारान्तर्दाहतृट्प्रलयादयः।
कफात्+शर्द्यङ्गगुरुतावाक्सङ्गष्ठीवनादयः॥9॥
विशेषात्+दुर्बलस्य+अल्पवह्नेः+वेगविधारिणः।
पीडितं मारुतेन+अन्नं श्लेष्मणा रुद्धम्+अन्तरा॥10।

अलसं क्षोभितं दोषैः शल्यत्वेन+एव संस्थितम्।
शूलादीन् कुरुते तीव्रान्+छर्द्यतीसारवर्जितान्॥11॥
सः+अलसः अत्यर्थदुष्टाः+तु दोषाः+ दुष्टामबद्धखाः।
यान्तः+तिर्यक्तनुं सर्वां दण्डवत्+स्तम्भयन्ति चेत्॥12॥
दण्डकालसकं नाम तं त्यजेत्+आशुकारिणम्।
विरुद्धाध्यशनाजीर्णशीलिनः+ विषलक्षणम्॥13॥
आमदोषं महाघोरं वर्जयेत्+विषसंज्ञकम्।
विषरूपाशुकारित्वात्+विरुद्धोपक्रमत्वतः॥14॥
अथ+आमम्+अलसीभूतं साध्यं त्वरितम्+उल्लिखेत्।
पीत्वा सोग्रापटुफलं वारि+उष्णं योजयेत्+ततः॥15॥
स्वेदनं फलवर्तिं च मलवातानुलोमनीम्।
नाम्यमानानि च+अङ्गानि भृशं स्विन्नानि वेष्टयेत्॥16॥
विसूच्याम्+अतिवृद्धायां पार्ष्ण्योः+दाहः प्रशस्यते।
तत्+अहः+च+उपवास्य+एनं विरिक्तवत्+उपाचरेत्॥17॥
तीव्रार्तिः+अपि न+अजीर्णी पिबेत्+शूलघ्नम्+औषधम्।
आमसन्नः+अनलः+ नालं पक्तुं दोषौषधाशनम्॥18॥
निहन्यात्+अपि च+एतेषां विभ्रमः सहसा+आतुरम्।
जीर्णाशने तु भैषज्यं युञ्ज्यात् स्तब्धगुरूदरे॥19॥
दोषशेषस्य पाकार्थम्+अग्नेः सन्धुक्षणाय च।
शान्तिः+आमविकाराणां भवति तु+अपतर्पणात्॥20॥
त्रिविधं त्रिविधे दोषे तत्+समीक्ष्य प्रयोजयेत्।
तत्र+अल्पे लङ्घनं पथ्यं मध्ये लङ्घनपाचनम्॥21॥
प्रभूते शोधनं तत्+हि मूलात्+उन्मूलयेत्+मलान्।
एवम्+अन्यान्+अपि व्याधीन् स्वनिदानविपर्ययात्॥22॥
चिकित्सेत्+अनुबन्धे तु सति हेतुविपर्ययम्।
त्यक्त्वा यथायथं वैद्यः+ युञ्ज्यात्+व्याधिविपर्ययम्॥23॥
तदर्थकारि वा पक्वे दोषे तु+इद्धे च पावके।
हितम्+अभ्यञ्जनस्नेहपानबस्त्यादि युक्तितः॥24॥
अजीर्णं च कफात्+आमं तत्र शोफः+अक्षिगण्डयोः।
सद्यः+भुक्तः+ इव+उद्गारः प्रसेकोत्क्लेशगौरवम्॥25॥
विष्टब्धम्+अनिलात्+शूलविबन्धाध्मानसादकृत्।
पित्तात्+विदग्धं तृण्मोहभ्रमाम्लोद्गारदाहवत्॥26॥

लङ्घनं कार्यम्+आमे तु विष्टब्धे स्वेदनं भृशम्।
विदग्धे वमनं यत्+वा यथावस्थं हितं भवेत्॥27॥
गरीयसः+ भवेत्+लीनात्+आमात्+एव विलम्बिका।
कफवातानुबद्धा+आमलिङ्गा तत्समसाधना॥28॥
अश्रद्धा हृद्व्यथा शुद्धे+अपि+उद्गारे रसशेषतः।
शयीत किञ्चित्+एव+अत्र सर्वः+च+अनाशितः+ दिवा॥29॥
स्वप्यात्+अजीर्णी सञ्जातबुभुक्षः+अद्यात्+मितं लघु।
विबन्धः+अतिप्रवृत्तिः+वा ग्लानिः+मारुतमूढता॥30॥
अजीर्णलिङ्गं सामान्यं विष्टम्भः+ गौरवं भ्रमः।
न च+अतिमात्रम्+एव+अन्नम्+आमदोषाय केवलम्॥31॥
द्विष्टविष्टम्भिदग्धामगुरुरुक्षहिमाशुचि।
विदाहि शुष्कम्+अत्यम्बुप्लुतं च+अन्नं च जीर्यति॥32॥
उपतप्तेन भुक्तं च शोकक्रोधक्षुदादिभिः।
मिश्रं पथ्यम्+अपथ्यं च भुक्तं समशनं मतम्॥33॥
विद्यात्+अध्यशनं भूयः+ भुक्तस्य+उपरि भोजनम्।
अकाले बहु च+अल्पं वा भुक्तं तु विषमाशनम्॥34॥
त्रीणि+अपि+एतानि मृत्युं वा घोरान् व्याधीन् सृजन्ति वा।
काले सात्म्यं शुचि हितं स्निग्धोष्णं लघु तन्मनाः॥35॥
षड्रसं मधुरप्रायं न+अतिद्रुतविलम्बितम्।
स्नातः क्षुद्वान् विविक्तस्थः+ धौतपादकराननः॥36॥
तर्पयित्वा पितॄन् देवान्+अतिथीन् बालकान् गुरून्।
प्रत्यवेक्ष्य तिरः+च+अपि प्रतिपन्नपरिग्रहान्॥37॥
समीक्ष्य सम्यक्+आत्मानम्+अनिन्दन्+अब्रुवन् द्रवम्।
इष्टम्+इष्टैः सहाश्नीयात्+शुचि भक्तजनाहृतम्॥38॥
भोजनं तृणकेशादिजुष्टम्+उष्णीकृतं पुनः।
शाकावरान्नभूयिष्ठम्+अत्युष्णलवणं त्यजेत्॥39॥
किलाटदधिकूर्चीकाक्षारशुक्तामकमूलकम्।
कृशशुष्कवराहाविगोमत्स्यमहिषामिषम्॥40॥
माषनिष्पावशालूकबिसपिष्टविरूढकम्।
शुष्कशाकानि यवकान् फाणितं च न शीलयेत्॥41॥
शीलयेत्+शालिगोधूमयवषष्टिकजाङ्गलम्।
सुनिषण्णकजीवन्तीबालमूलकवास्तुकम्॥42॥

पथ्यामलकमृद्वीकापटोलीमुद्गशर्कराः।
घृतदिव्योदकक्षीरक्षौद्रदाडिमसैन्धवम्॥43॥
त्रिफलां मधुसर्पिर्भ्यां निशि नेत्रबलाय च।
स्वास्थ्यानुवृत्तिकृत्+यत्+च रोगोच्छेदकरं च यत्॥44॥
बिसेक्षुमोचचोचाम्रमोदकोत्कारिकादिकम्।
अद्यात्+द्रव्यं गुरु स्निग्धं स्वादु मन्दं स्थिरं पुरः॥45॥
विपरीतम्+अतः+च+अन्ते मध्ये+अम्ललवणोत्कटम्।
अन्नेन कुक्षेः+द्वौ+अंशौ पानेन+एकं प्रपूरयेत्॥46॥
आश्रयं पवनादीनां चतुर्थम्+अवशेषयेत्।
अनुपानं हिमं वारि यवगोधूमयोः+हितम्॥47॥
दध्नि मध्ये विषे क्षौद्रे कोष्णं पिष्टमयेषु तु।
शाकमुद्गादिविकृतौ मस्तुतक्राम्लकाञ्जिकम्॥48॥
सुरा कृशानां पुष्ट्यर्थं स्थूलानां तु मधूदकम्।
शोषे मांसरसः+ मद्यं मांसे स्वल्पे च पावके॥49॥
व्याध्यौषधाध्वभाष्यस्त्रीलङ्घनातपकर्मभिः।
क्षीणे वृद्धे च बाले च पयः पथ्यं यथा+अमृतम्॥50॥
विपरीतं यत्+अन्नस्य गुणैः स्यात्+अविरोधि च।
अनुपानं समासेन सर्वदा तत्+प्रशस्यते॥51॥
अनुपानं करोति+ऊर्जां तृप्तिं व्याप्तिं दृढाङ्गताम्।
अन्नसङ्घातशैथिल्यविक्लित्तिजरणानि च॥52॥
न+उर्ध्वजत्रुगदश्वासकासोरःक्षतपीनसे।
गीतभाष्यप्रसङ्गे च स्वरभेदे च तद्धितम्॥53॥
प्रक्लिन्नदेहमेहाक्षिगलरोगव्रणातुराः।
पानं त्यजेयुः सर्वः+च भाष्याध्वशयनं त्यजेत्॥54॥
पीत्वा भुक्त्वा+आतपं वह्निं यानं प्लवनवाहनम्।
प्रसृष्टे विण्मूत्रे हृदि सुविमले दोषे स्वपथगे
विशुद्धे च+उद्गारे क्षुदुपगमने वाते+अनुसरति।
तथा+अग्नौ+उद्रिक्ते विशदकरणे देहे च सुलघौ
प्रयुञ्जीत+आहारं विधिनियमितं कालः सः+ हि मतः॥55॥
इति श्रीवैद्यपतिसिंहगुप्तसूनुश्रीमद्वाग्भटविरचितायाम्+अष्टाङ्गहृदयसंहितायां सूत्रस्थाने मात्राशितीयः+ नाम अष्टमः+अध्यायः॥8॥
नवमः+अध्यायः।

अथ+अतः+ द्रव्यादिविज्ञानीयम्+अध्यायं व्याख्यास्यामः।
इति ह स्म+आहुः+आत्रेयादयः+ महर्षयः।
द्रव्यम्+एव रसादीनां श्रेष्ठं ते हि तदाश्रयाः
पञ्चभूतात्मकं तत्+तु क्ष्मामधिष्ठाय जायते॥1॥
अम्बुयोन्यग्निपवननभसां समवायतः।
तन्निर्वृत्तिः+विशेषः+च व्यपदेशः+तु भूयसा॥2॥
तस्मात्+न+एकरसं द्रव्यं भूतसङ्घातसम्भवात्।
न+एकदोषाः+ततः+ रोगाः+तत्र व्यक्तः+ रसः स्मृतः॥3॥
अव्यक्तः+अनुरसः किञ्चित्+अन्ते व्यक्तः+अपि च+इष्यते।
गुर्वादयः+ गुणाः+ द्रव्ये पृथिव्यादौ रसाश्रये॥4॥
रसेषु व्यपदिश्यन्ते साहचर्योपचारतः।
तत्र द्रव्यं गुरुस्थूलस्थिरगन्धगुणोल्बणम्॥5॥
पार्थिवं गौरवस्थैर्यसङ्घातोपचयावहम्।
द्रवशीतगुरुस्निग्धमन्दसान्द्ररसोल्बणम्॥6॥
आप्यं स्नेहनविष्यन्दक्लेदप्रह्लादबन्धकृत्।
रूक्षतीक्ष्णोष्णविशदसूक्ष्मरूपगुणोल्बणम्॥7॥
आग्नेयं दाहभावर्णप्रकाशपचनात्मकम्।
वायव्यं रूक्षविशदलघुस्पर्शगुणोल्बणम्॥8॥
रौक्ष्यलाघववैशद्यविचारग्लानिकारकम्।
नाभसं सूक्ष्मविशदलघुशब्दगुणोल्बणम्॥9॥
सौषिर्यलाघवकरं जगति+एवम्+अनौषधम्।
न किञ्चित्+विद्यते द्रव्यं वशात्+नानार्थयोगयोः॥10॥
द्रव्यम्+ऊर्ध्वगमं तत्र प्रायः+अग्निपवनोत्कटम्।
अधोगामि च भूयिष्ठं भूमितोयगुणाधिकम्॥11॥
इति द्रव्यं रसान् भेदैः+उत्तरत्र+उपदेक्ष्यते।
वीर्यं पुनः+वदन्ति+एके गुरु स्निग्धं हिमं मृदु॥12॥
लघु रूक्षोष्णतीक्ष्णं च तत्+एवं मतम्+अष्टधा।
चरकः+तु+आह वीर्यं तत् क्रियते येन या क्रिया॥13॥
नावीर्यं कुरुते किञ्चित्+सर्वा वीर्यकृता हि सा।
गुर्वादिषु+एव वीर्याख्या तेन+अन्वर्था+इति वर्ण्यते॥14॥
समग्रगुणसारेषु शक्त्युत्कर्षविवर्तिषु।
व्यवहाराय मुख्यत्वात्+बह्वग्रग्रहणात्+अपि॥15॥

अतः+च विपरीतत्वात्+सम्भवति+अपि न+एव सा।
विवक्ष्यते रसाद्येषु वीर्यं गुर्वादयः+ हि+अतः॥16॥
उष्णं शीतं द्विधा+एव+अन्ये वीर्यम्+आचक्षते+अपि च ।
नानात्मकम्+अपि द्रव्यम्+अग्नीषोमौ महाबलौ॥17॥
व्यक्ताव्यक्तं जगत्+इव न+अतिक्रामति जातुचित्।
तत्र+उष्णं भ्रमतृड्ग्लानिस्वेददाहाशुपाकिताः॥18॥
शमं च वातकफयोः करोति शिशिरं पुनः।
ह्लादनं जीवनं स्तम्भं प्रसादं रक्तपित्तयोः॥19॥
जाठरेण+अग्निना योगात्+यत्+उदेति रसान्तरम्।
रसानां परिणामान्ते सः+ विपाकः+ इति स्मृतः॥20॥
स्वादुः पटुः+च मधुरम्+अम्लः+अम्लं पच्यते रसः।
तिक्तोषणकषायाणां विपाकः प्रायशः कटुः॥21॥
रसैरसौ तुल्यफलः+तत्र द्रव्यं शुभाशुभम्।
किञ्चित्+रसेन कुरुते कर्म पाकेन च+अपरम्॥22॥
गुणान्तरेण वीर्येण प्रभावेण+एव किञ्चन।
यत्+यत्+द्रव्ये रसादीनां बलवत्त्वेन वर्तते॥23॥
अभिभूयेतरान्+तत्+तत्+कारणत्वं प्रपद्यते।
विरुद्धगुणसंयोगे भूयसा+अल्पं हि जीयते॥24॥
रसं विपाकः+तौ वीर्यं प्रभावः+तानि+अपोहति।
बलसाम्ये रसादीनाम्+इति नैसर्गिकं बलम्॥25॥
रसादिसाम्ये यत् कर्म विशिष्टं तत् प्रभावजम्।
दन्ती रसाद्यैः+तुल्या+अपि चित्रकस्य विरेचनी॥26॥
मधुकस्य च मृद्वीका घृतं क्षीरस्य दीपनम्।
इति सामान्यतः कर्म द्रव्यादीनां पुनः+च तत्॥27॥
विचित्रप्रत्ययारब्धद्रव्यभेदेन भिद्यते।
स्वादुः+गुरुः+च गोधूमः+ वातजित् वातकृत्+यवः॥28॥
उष्णा मत्स्याः पयः शीतं कटुः सिंहः+ न शूकरः।28 1/2

इति श्रीवैद्यपतिसिंहगुप्तसूनुश्रीमद्वाग्भटविरचितायाम्+अष्टाङ्गहृदयसंहितायां सूत्रस्थाने द्रव्यादिविज्ञानीयः+ नाम नवमः+अध्यायः॥9॥

दशमः+अध्यायः

अथ+अतः+ रसभेदीयम्+अध्यायं व्याख्यास्यामः।
इति ह स्म+आहुः+आत्रेयादयः+ महर्षयः।

क्ष्माम्भः+अग्निक्ष्माम्बुतेजः खवाय्वग्न्यनिलगः+अनिलैः।
द्वयोल्बणैः क्रमात्+भूतैः+मधुरादिरसोद्भवः॥1॥
तेषां विद्यात्+रसं स्वादुं यः+ वक्त्रम्+अनुलिम्पति।
आस्वाद्यमानः+ देहस्य ह्लादनः+अक्षप्रसादनः॥2॥
प्रियः पिपीलिकादीनाम् अम्लः क्षालयते मुखम्।
हर्षणः+ रोमदन्तानाम्+अक्षिभ्रुवनिकोचनः॥3॥
लवणः स्यन्दयति+आस्यं कपोलगलदाहकृत्।
तिक्तः+ विशदयति+आस्यं रसनं प्रतिहन्ति च॥4॥
उद्वेजयति जिह्वाग्रं कुर्वन्+चिमिचिमां कटुः।
स्रावयति+अक्षिनासास्यं कपोलौ दहति+इव च॥5॥
कषायः+ जडयेत्+जिह्वां कण्ठस्रोतोविबन्धकृत्।
रसानाम्+इति रूपाणि कर्माणि मधुरः+ रसः॥
आजन्मसात्म्यात्+कुरुते धातूनां प्रबलं बलम्।
बालवृद्धक्षतक्षीणवर्णकेशेन्द्रियौजसाम्॥7॥
प्रशस्तः+ बृंहणः कण्ठ्यः स्तन्यसन्धानकृद्गुरुः।
आयुष्यः+ जीवनः स्निग्धः पित्तानिलविषापहः॥8॥
कुरुते+अत्युपयोगेन सः+ मेदः श्लेष्मजान् गदान्।
स्थौल्याग्निसादसन्न्यासमेहगण्डार्बुदादिकान्॥9॥
अम्लः+अग्निदीप्तिकृत्+स्निग्धः+हृद्यः पाचनरोचनः।
उष्णवीर्यः+ हिमस्पर्शः प्रीणनः क्लेदनः+ लघुः॥10॥
करोति कफपित्तास्रं मूढवातानुलोमनः।
सः+अत्यभ्यस्तः+तनोः कुर्यात्+शैथिल्यं तिमिरं भ्रमम्॥11॥
कण्डुपाण्डुत्ववीसर्पशोफविस्फोटतृड्ज्वरान्।
लवणः स्तम्भसङ्घातबन्धविध्मापनः+अग्निकृत्॥12॥
स्नेहनः स्वेदनः+तीक्ष्णः+ रोचनः+छेदभेदकृत्।
सः+अतियुक्तः+अस्रपवनं खलति पलितं वलिम्॥13॥
तृट्कुष्ठविषवीसर्पान् जनयेत्+क्षपयेत्+ बलम्।
तिक्तः स्वयम्+अरोचिष्णुः+अरुचिं कृमितृड्विषम्॥14॥
कुष्ठमूर्च्छाज्वरोत्क्लेशदाहपित्तकफान् जयेत्।
क्लेदमेदोवसामज्जशकृन्मूत्रोपशोषणः॥15॥
लघुः+मेध्यः+ हिमः+ रूक्षः स्तन्यकण्ठविशोधनः।
धातुक्षयानिलव्याधीन्+अतियोगात्+करोति सः॥16॥

कटुः+गलामयोदर्दकुष्ठालसकशोफजित्।
व्रणावसादनः स्नेहमेदक्लेदोपशोषणः॥17॥
दीपनः पाचनः+ रुच्यः शोधनः+अन्नस्य शोषणः।
छिनत्ति बन्धान् स्रोतांसि विवृणोति कफापहः॥18॥
कुरुते सः+अतियोगेन तृष्णां शुक्रबलक्षयम्।
मूर्च्छाम्+आकुञ्चनं कम्पं कटिपृष्ठादिषु व्यथाम्॥19॥
कषायः पित्तकफहा गुरुः+अस्रविशोधनः।
पीडनः+ रोपणः शीतः क्लेदमेदोविशोषणः॥20॥
आमसंस्तम्भनः+ ग्राही रूक्षः+अति त्वक्प्रसादनः।
करोति शीलतः सः+अति विष्टम्भाध्मानहृद्रुजः॥21॥
तृट्कार्श्यपौरुषभ्रंशस्रोतोरोधमलग्रहान्।
घृतहेमगुडाक्षोडमोचचोचपरूषकम्॥22॥
अभीरुवीरापनसराजादनबलात्रयम्।
मेदे चतस्रः पर्णिन्यः+ जीवन्ती जीवकर्षभौ॥23॥
मधूकं मधुकं बिम्बी विदारी श्रावणीयुगम्।
क्षीरशुक्ला तुगाक्षीरी क्षीरिण्यौ काश्मरी सहे॥24॥
क्षीरेक्षुगोक्षुरक्षौद्रद्राक्षादिः+मधुरः+ गणः।
अम्लः+ धात्रीफलाम्लीकामातुलुङ्गाम्लवेतसम्॥25॥
दाडिमं रजतं तक्रं चुक्रं पालेवतं दधि।
आम्रम्+आम्रातकं भव्यं कपित्थं करमर्दकम्॥26॥
वरं सौवर्चलं कृष्णं विडं सामुद्रम्+औद्भिदम्।
रोमकं पांसुजं शीसं क्षारः+च लवणः+ गणः॥27॥
तिक्तः पटोलीत्रायन्तीवालकोशीरचन्दनम्।
भूनिम्बनिम्बकटुकातगरागुरुवत्सकम्॥28॥
नक्तमालद्विरजनीमुस्तमूर्वाटरूषकम्।
पाठापामार्गकांस्यायोगुडूचीधन्वयासकम्॥29॥
पञ्चमूलं महद्व्याघ्र्यौ विशाला+अतिविषा वचा।
कटुकः+ हिङ्गुमरिचकृमिजित्पञ्चकोलकम्॥30॥
कुठेराद्या हरितकाः पित्तं मूत्रम्+अरुष्करम्।
वर्गः कषायः पथ्या+अक्षं शिरीषः खदिरः+ मधु॥31॥
कदम्बोदुम्बरं मुक्ताप्रवालाञ्जनगैरिकम्।
बालं कपित्थं खर्जूरं बिसपद्मोत्पलादि च॥32॥

मधुरं श्लेष्मलं प्रायः+ जीर्णात्+शालियवात्+ऋते

मुद्गात्+गोधूमतः क्षौद्रात्+सिताया जाङ्गलाम्+इषात्॥33॥

प्रायः+अम्लं पित्तजननं दाडिम्+आमलकात्+ऋते।

अपथ्यं लवणं प्रायः+चक्षुषः+अन्यत्र सैन्धवात्॥34॥

तिक्तं कटु च भूयिष्ठम्+अवृष्यं वातकोपनम्।

ऋते+अमृतापटोलीभ्यां शुण्ठीकृष्णारसोनतः॥35॥

कषायं प्रायशः शीतं स्तम्भनं च+अभयां विना।

रसाः कट्वम्ललवणा वीर्येण+उष्णा यथा+उत्तरम्॥36॥

तिक्तः कषायः+ मधुरः+तद्वत्+एव च शीतलाः।

तिक्तः कटुः कषायः+च रूक्षाः+ बद्धमलाः+तथा॥37॥

पट्वम्लमधुराः स्निग्धाः सृष्टविण्मूत्रमारुताः।

पटोः कषायः+तस्मात्+च मधुरः परमं गुरुः॥38॥

लघुः+अम्लः कटुः+तस्मात्+तस्मात्+अपि च तिक्तकः।

संयोगाः सप्तपञ्चाशत्+कल्पना तु त्रिषष्टिधा॥39॥

रसानां यौगिकत्वेन यथास्थूलं विभज्यते।

एकैकहीनाः+तान्+पञ्चदश यान्ति रसाः+ द्विके॥40॥

त्रिके स्वादुः+दशाम्लः षट् त्रीन् पटुः+तिक्तः+ एककम्।

चतुष्केषु दश स्वादुः+चतुरः+अम्लः पटुः सकृत्॥41॥

पञ्चकेषु+एकम्+एव+अम्लः+ मधुरः पञ्च सेवते।

द्रव्यम्+एकं षडास्वादम्+असंयुक्ताः+च षट्+रसाः॥42॥

षट्पञ्चकाः षट् च पृथक्+रसाः स्युः+चतुः+द्विकौ पञ्चदशप्रकारौ।

भेदाः+त्रिका विंशतिः+एकम्+एव द्रव्यं षडास्वादम्+इति त्रिषष्टिः॥43॥

ते रसानुरसतः+ रसभेदाः+तारतम्यपरिकल्पनया च।

सम्भवन्ति गणनां समतीता दोषभेषजवशात्+उपयोज्याः॥44॥

इति श्रीवैद्यतिसिंहगुप्तसूनुश्रीमद्वाग्भटविरचितायाम्+अष्टाङ्गहृदयसंहितायां सूत्रस्थाने रसभेदीयः+ नाम दशमः+अध्यायः॥10॥

एकादशः+अध्यायः।

अथ+अतः+ दोषादिविज्ञानीयम्+अध्यायं व्याख्यास्यामः।

इति ह स्म+आहुः+आत्रेयादयः+ महर्षयः।

दोषधातुमला मूलं सदा देहस्य तं चलः।

उत्साहोच्छ्वासनिश्वासचेष्टावेगप्रवर्तनैः॥1॥

सम्यक्+गत्या च धातूनाम्+अक्षाणां पाटवेन च।

अनुगृह्णाति+अविकृतः पित्तं पक्त्यूष्मदर्शनैः॥2॥
क्षुत्तृड्रुचिप्रभामेधाधीशौर्यतनुमार्दवैः।
श्लेष्मा स्थिरत्वस्निग्धत्वसन्धिबन्धक्षमादिभिः॥3॥
प्रीणनं जीवनं लेपः स्नेहः+ धारणपूरणे।
गर्भोत्पादः+च धातूनां श्रेष्ठं कर्म क्रमात्+स्मृतम्॥4॥
अवष्टम्भः पुरीषस्य मूत्रस्य क्लेदवाहनम्।
स्वेदस्य क्लेदविधृतिः वृद्धः+तु कुरुते+अनिलः॥5॥
कार्श्यकार्ष्ण्योष्णकामत्वकम्पानाहशकृद्ग्रहान्।
बलनिद्रेन्द्रियभ्रंशप्रलापभ्रमदीनताः॥6॥
पीतविण्मूत्रनेत्रत्वक्क्षुत्तृड्दाहाल्पनिद्रताः।
पित्तम् श्लेष्माग्निसदनप्रसेकालस्यगौरवम्॥7॥
श्वैत्यशैत्यश्लथाङ्गत्वं श्वासकासातिनिद्रताः।
रसः+अपि श्लेष्मवत् रक्तं विसर्पप्लीहविद्रधीन्॥8॥
कुष्ठवातास्रपित्तास्रगुल्मोपकुशकामलाः।
व्यङ्गाग्निनाशसम्मोहरक्तत्वङ्नेत्रमूत्रताः॥9॥
मांसं गण्डाः+बुदग्रन्थिगण्डोः+उदरवृद्धिताः।
कण्ठादिषु+अधिमांसं च तद्वत्+मेदः+तथा श्रमम्॥10॥
अल्पे+अपि चेष्टिते श्वासं स्फिक्स्तनोदरलम्बनम्।
अस्थ्यध्यस्थ्यधिदन्तान्+च मज्जा नेत्राङ्गगौरवम्॥11॥
पर्वसु स्थूलमूलानि कुर्यात्+कृच्छ्राणि+अरूंषि च।
अतिस्त्रीकामतां वृद्धं शुक्रं शुक्राश्मरीम्+अपि॥12॥
कुक्षौ+आध्मानम्+आटोपं गौरवं वेदनां शकृत्।
मूत्रं तु बस्तिनिस्तोदं कृते+अपि+अकृतसंज्ञताम्॥13॥
स्वेदः+अतिस्वेददौर्गन्ध्यकण्डूः एवं च लक्षयेत्।
दूषिकादीन्+अपि मलान् बाहुल्यगुरुतादिभिः॥14॥
लिङ्गं क्षीणे+अनिले+अङ्गस्य सादः+अल्पं भाषिते हितम्।
संज्ञामोहः+तथा श्लेष्मवृद्ध्युक्तामयसम्भवः॥15॥
पित्ते मन्दः+अनलः शीतं प्रभाहानिः कफे भ्रमः।
श्लेष्माशयानां शून्यत्वं हृद्द्रवः श्लथसन्धिता॥16॥
रसे रौक्ष्यं श्रमः शोषः+ ग्लानिः शब्दासहिष्णुता।
रक्ते+अम्लशिशिरप्रीतिशिराशैथिल्यरूक्षताः॥17॥
मांसे+अक्षग्लानिगण्डस्फिक्शुष्कतासन्धिवेदनाः।

मेदसि स्वपनं कट्याः प्लीह्नः+ वृद्धिः कृशाङ्गता॥18॥
अस्थ्न्यस्थितोदः शदनं दन्तकेशनखादिषु।
अस्थ्नां मज्जनि सौषिर्यं भ्रमः+तिमिरदर्शनम्॥19॥
शुक्रे चिरात् प्रसिच्येत शुक्रं शोणितम्+एव वा।
तोदः+अत्यर्थं वृषणयोः+मेढ्रं धूमायति+इव च॥20॥
पुरीषे वायुः+अन्त्राणि सशब्दः+ वेष्टयन्+इव।
कुक्षौ भ्रमति याति+ऊर्ध्वं हृत्पार्श्वे पीडयन् भृशम्॥21॥
मूत्रे+अल्पं मूत्रयेत्+कृच्छ्रात्+विवर्णं सास्रम्+एव वा।
स्वेदे रोमच्युतिः स्तब्धरोमता स्फुटनं त्वचः॥22॥
मलानाम्+अतिसूक्ष्माणां दुर्लक्ष्यं लक्षयेत् क्षयम्।
स्वमलायनसंशोषतोदशून्यत्वलाघवैः॥23॥
दोषादीनां यथास्वं च विद्यात्+वृद्धिक्षयौ भिषक्।
क्षयेण विपरीतानां गुणानां वर्धनेन च॥24॥
वृद्धिं मलानां सङ्गात्+च क्षयं च+अति विसर्गतः।
मलोचितत्वात्+ देहस्य क्षयः+ वृद्धेः+तु पीडनः॥25॥
तत्रास्थनि स्थितः+ वायुः पित्तं तु स्वेदरक्तयोः।
श्लेष्मा शेषेषु  तेन+एषाम्+आश्रयाश्रयिणां मिथः॥26॥
यत्+एकस्य तत्+अन्यस्य वर्धनक्षपणौषधम्।
अस्थिमारुतयोः+न+एवं प्रायः+ वृद्धिः+हि तर्पणात्॥27॥
श्लेष्मणा+अनुगता तस्मात् सङ्क्षयः+तद्विपर्ययात्।
वायुना+अनुगतः+अस्मात्+च वृद्धिक्षयसमुद्भवान्॥28॥
विकारान् साधयेत्+शीघ्रं क्रमात्+लङ्घनबृंहणैः।
वायोः+अन्यत्र तत्+जान्+तु तैः+एव+उत्क्रमयोजितैः॥29॥
विशेषात्+रक्तवृद्ध्युत्थान् रक्तस्रुतिविरेचनैः।
मांसवृद्धिभवान् रोगान् शस्त्रक्षाराग्निकर्मभिः॥30॥
स्थौल्यकार्श्योपचारेण मेदोजानस्थिसङ्क्षयात्।
जातान् क्षीरघृतैः+तिक्तसंयुतैः+बस्तिभिः+तथा॥31॥
विड्वृद्धिजानतीसारक्रियया विट्क्षयोद्भवान्।
मेषाजमध्यकुल्माषयवमाषद्वयादिभिः॥32॥
मूत्रवृद्धिक्षयोत्थाः+च मेहकृच्छ्रचिकित्सया।
व्यायामाभ्यञ्जनस्वेदमद्यैः स्वेदक्षयोद्भवान्॥33॥
स्वस्थानस्थस्य कायाग्नेः+अंशाः धातुषु संश्रिताः।

तेषां सादातिदीप्तिभ्यां धातुवृद्धिक्षयोद्भवः॥34॥
पूर्वः+ धातुः परं कुर्यात्+वृद्धः क्षीणः+च तद्विधम्।
दोषाः+ दुष्टाः+ रसैः+धातून् दूषयन्ति+उभये मलान्॥35॥
अधः+ द्वे सप्त शिरसि खानि स्वेदवहानि च।
मलाः+ मलायनानि स्युः+यथास्वं तेषु+अतः+ गदाः॥36॥
ओजः+तु तेजः+ धातूनां शुक्रान्तानां परं स्मृतम्।
हृदयस्थम्+अपि व्यापि देहस्थितिनिबन्धनम्॥37॥
स्निग्धं सोमात्मकं शुद्धम्+ईषत्+लोहितपीतकम्।
यन्नाशे नियतं नाशः+ यस्मिन्+तिष्ठति तिष्ठति॥38॥
निष्पद्यन्ते यतः+ भावाः+ विविधाः+ देहसंश्रयाः।
ओजः क्षीयेत कोपक्षुद्ध्यानशोकश्रमादिभिः॥39॥
बिभेति दुर्बलः+अभीक्ष्णं ध्यायति व्यथितेन्द्रियः।
दुःच्छायः+ दुर्मना रूक्षः+ भवेत्+क्षामः+च तत्क्षये॥40॥
जीवनीयौषधक्षीररसाद्याः+तत्र भेषजम्।
ओजोवृद्धौ हि देहस्य तुष्टिपुष्टिबलोदयः॥41॥
यदन्नं द्वेष्टि यत्+अपि प्रार्थयेत्+अविरोधि तु।
तत्+तत्+त्यजन् समश्नन्+च तौ तौ वृद्धिक्षयौ जयेत्॥42॥
कुर्वते हि रुचिं दोषाः+ विपरीतसमानयोः।
वृद्धाः क्षीणाः+च भूयिष्ठं लक्षयन्ति+अबुधाः+तु न॥43॥
यथाबलं यथास्वं च दोषा वृद्धा वितन्वते।
रूपाणि जहति क्षीणाः समाः स्वं कर्म कुर्वते॥44॥
यः+ एव देहस्य समाः+ विवृद्ध्यै तः+ एव दोषाः+ विषमाः+ वधाय।
यस्मात्+अतः+ते हितचर्यया+एव क्षयात्+विवृद्धेः+इव रक्षणीयाः॥45॥
इति श्रीवैद्यपतिसिंहगुप्तसूनुश्रीमद्वाग्भटविरचितायाम्+अष्टाङ्गहृदयसंहितायां सूत्रस्थाने दोषादिविज्ञानीयः+ नाम+एकादशः+अध्यायः॥11॥

द्वादशः+अध्यायः

अथ+अतः+ दोषभेदीयाध्यायं व्याख्यास्यामः।
इति ह स्म+आहुः+आत्रेयादयः+ महर्षयः।
पक्वाशयकटीसक्थिश्रोत्रास्थिस्पर्शनेन्द्रियम्।
स्थानं वातस्य तत्र+अपि पक्वाधानं विशेषतः॥1॥
नाभिः+आमाशयः स्वेदः+ लसीका रुधिरं रसः।
दृक् स्पर्शनं च पित्तस्य नाभिः+अत्र विशेषतः॥2॥

उरः कण्ठशिरः क्लोमपर्वाणि+आमाशयः+ रसः।
मेदः+ घ्राणं च जिह्वा च कफस्य सुतराम्+उरः॥3॥
प्राणादिभेदात्+पञ्चात्मा वायुः प्राणः+अत्र मूर्धगः।
उरः कण्ठचरः+ बुद्धिहृदयेन्द्रियचित्तधृक्॥4॥
ष्ठीवनक्षवथूद्गारनिःश्वासान्+अप्रवेशकृत्।
उरः स्थानम्+उदानस्य नासानाभिगलान्+चरेत्॥5॥
वाक्प्रवृत्तिप्रयत्नोर्जाबलवर्णस्मृतिक्रियः।
व्यानः+ हृदि स्थितः कृत्स्नदेहचारी महाजवः॥6॥
गत्यपक्षेपणोत्क्षेपनिमेषोन्मेषणादिकाः।
प्रायः सर्वाः क्रियाः+तस्मिन् प्रतिबद्धाः शरीरिणाम्॥7॥
समानः+अग्निसमीपस्थः कोष्ठे चरति सर्वतः।
अन्नं गृह्णाति पचति विवेचयति मुञ्चति॥8॥
अपानः+अपानगः श्रोणिबस्तिमेढ्रोरुगोचरः।
शुक्रार्तवशकृन्मूत्रगर्भनिष्क्रमणक्रियः॥9॥
पित्तं पञ्चात्मकं तत्र पक्वामाशयमध्यगम्।
पञ्चभूतात्मकत्वे+अपि यत्+तैजसगुणोदयात्॥10॥
त्यक्तद्रवत्वं पाकादिकर्मणा+अनलशब्दितम्।
पचति+अन्नं विभजते सारकिट्टौ पृथक् तथा॥11॥
तत्रस्थम्+एव पित्तानां शेषाणाम्+अपि+अनुग्रहम्।
करोति बलदानेन पाचकं नाम तत्+समृतम्॥12॥
आमाशयाश्रयं पित्तं रञ्जकं रसरञ्जनात्।
बुद्धिमेधाभिमानाद्यैः+अभिप्रेतार्थसाधनात्॥13॥
साधकं हृद्गतं पित्तं रूपालोचनतः स्मृतम्।
दृक्स्थम्+आलोचकं त्वक्स्थं भ्राजकं भ्राजनात्+त्वचः॥14॥
श्लेष्मा तु पञ्चधा उरःस्थः सः+ त्रिकस्य स्ववीर्यतः।
हृदयस्य+अन्नवीर्यात्+च तत्स्थः+ एव+अम्बुकर्मणा॥15॥
कफधाम्नां च शेषाणां यत्+करोति+अवलम्बनम्।
अतः+अवलम्बकः श्लेष्मा यः+तु+आमाशयसंस्थितः॥16॥
क्लेदकः सः+अन्नसङ्घातक्लेदनात् रसबोधनात्।
बोधकः+ रसनास्थायी शिरः संस्थः+अक्षतर्पणात्।17॥
तर्पकः सन्धिसंश्लेषात्+श्लेषकः सन्धिषु स्थितः।
इति प्रायेण दोषाणां स्थानानि+अविकृतात्मनाम्॥18॥

व्यापिनाम्+अपि जानीयात्+कर्माणि च पृथक्पृथक्।
उष्णेन युक्ता रूक्षाद्या वायोः कुर्वन्ति सञ्चयम्॥19॥
शीतेन कोपम्+उष्णेन शमं स्निग्धादयः+ गुणाः।
शीतेन युक्ताः+तीक्ष्णाद्याः+चयं पित्तस्य कुर्वते॥20॥
उष्णेन कोपं मन्दाद्याः शमं शीतोपसंहिताः।
शीतेन युक्ताः स्निग्धाद्याः कुर्वते श्लेष्मणः+चयम्॥21॥
उष्णेन कोपं तेन+एव गुणाः+ रूक्षादयः शमम्।
चयः+ वृद्धिः स्वधाम्नि+एव प्रद्वेषः+ वृद्धिहेतुषु॥22॥
विपरीतगुणेच्छा च कोपः+तु+उन्मार्गगामिता।
लिङ्गानां दर्शनं स्वेषाम्+अस्वास्थ्यं रोगसम्भवः॥23॥
स्वस्थानस्थस्य समता विकारासम्भवः शमः।
चयप्रकोपप्रशमा वायोः+ग्रीष्मादिषु त्रिषु॥24॥
वर्षादिषु तु पित्तस्य श्लेष्मणः शिशिरादिषु।
चीयते लघुरूक्षाभिः+ओषधीभिः समीरणः॥25॥
तद्विधः+तद्विधे देहे कालस्य+ओष्ण्यात्+न कुप्यति।
अप्भिः+अम्लविपाकाभिः+ओषधीभिः+च तादृशम्॥26॥
पित्तं याति चयं कोपं न तु कालस्य शैत्यतः।
चीयते स्निग्धशीताभिः+उदकौषधिभिः कफः॥27॥
तुल्ये+अपि काले देहे च स्कन्नत्वात्+न प्रकुप्यति।
इति कालस्वभावः+अयम् आहारादिवशात्+पुनः॥28॥
चयादीन् यान्ति सद्यः+अपि दोषाः काले+अपि वा न तु।
व्याप्नोति सहसा देहम्+आपादतलमस्तकम्॥29॥
निवर्तते तु कुपितः+ मलः+अल्पाल्पं जलौघवत्।
नानारूपैः+असङ्ख्येयैः+विकारैः कुपिताः+ मलाः॥30॥
तापयन्ति तनुं तस्मात्+तद्धेत्वाकृतिसाधनम्।
शक्यं न+एकैकशः+ वक्तुम्+अतः सामान्यम्+उच्यते॥31॥
दोषाः+ एव हि सर्वेषां रोगाणाम्+एककारणम्।
यथा पक्षी परिपतन् सर्वतः सर्वम्+अपि+अहः॥32॥
छायाम्+अत्येति न+आत्मीयां यथा वा कृत्स्नम्+अपि+अदः।
विकारजातं विविधं त्रीन् गुणान्+न+अतिवर्तते॥33॥
तथा स्वधातुवैषम्यनिमित्तम्+अपि सर्वदा।
विकारजातं त्रीन्+दोषान् तेषां कोपे तु कारणम्॥34॥

अर्थैः+असात्म्यैः संयोगः कालः कर्म च दुष्कृतम्।
हीनातिमिथ्यायोगेन भिद्यते तत्+पुनः+त्रिधा॥35॥
हीनः+अर्थेन+इन्द्रियस्य+अल्पः संयोगः स्वेन न+एव वा।
अतियोगः+अतिसंसर्गः सूक्ष्मभासुरभैरवम्॥36॥
अत्यासन्नातिदूरस्थं विप्रियं विकृतादि च।
यत्+अक्ष्णा वीक्ष्यते रूपं मिथ्यायोगः सः+ दारुणः॥37॥
एवम्+अत्युच्चपूत्यादीन्+इन्द्रियार्थान् यथायथम्।
विद्यात् कालः+तु शीतोष्णवर्षाभेदात् त्रिधा मतः॥38॥
सः+ हीनः+ हीनशीतादिः+अतियोगः+अतिलक्षणः।
मिथ्यायोगः+तु निर्दिष्टः+ विपरीतस्वलक्षणः॥39॥
कायवाक्चित्तभेदन कर्म+अपि विभजेत् त्रिधा।
कायादिकर्मणः+ हीना प्रवृत्तिः+हीनसंज्ञकः॥40॥
अतियोगः+अतिवृत्तिः+तु वेगोदीरणधारणम्।
विषमाङ्गक्रियारम्भपतनस्खलनादिकम्॥41॥
भाषणं सामिभुक्तस्य रागद्वेषभयादि च।
कर्म प्राणातिपातादि दशधा यत्+च निन्दितम्॥42॥
मिथ्यायोगः समस्तः+असौ+इह वा+अमुत्र वा कृतम्।
निदानम्+एतत्+दोषाणां कुपिताः+तेन न+एकधा॥43॥
कुर्वन्ति विविधान् व्याधीन् शाखाकोष्ठास्थिसन्धिषु।
शाखा रक्तादयः+त्वक् च बाह्यरोगायनं हि तत्॥44॥
तदाश्रया मषव्यङ्गगण्डालज्यर्बुदादयः।
बहिर्भागाः+च दुर्नामगुल्मशोफादयः+ गदाः॥45॥
अन्तःकोष्ठः+ महास्रोतः+ आमपक्वाशयाश्रयः।
तत्सथानाः च्छर्द्यतीसारकासश्वासोदरज्वराः॥46॥
अन्तर्भागं च शोफार्शोगुल्मवीसर्पविद्रधिः।
शिरोहृदयवस्त्यादिमर्माणि+अस्थ्नां च सन्धयः॥47॥
तन्निबद्धाः शिरास्नायुकण्डराद्याः+च मध्यमः।
रोगमार्गः स्थिताः+तत्र यक्ष्मपक्षवधार्दिताः॥48॥
मूर्धादिरोगाः सन्ध्यस्थित्रिकशूलग्रहादयः।
स्रंसव्यासव्यधस्वापसादरुक्तोदभेदनम्॥49॥
सङ्गाङ्गभङ्गसङ्कोचवर्तहर्षणतर्षणम्।
कम्पपारुष्यसौषिर्यशोषस्पन्दनवेष्टनम्॥50॥

स्तम्भः कषायरसता वर्णः श्यावः+अरुणः+अपि वा।
कर्माणि वायोः पित्तस्य दाहरागोष्मपाकिताः॥51॥
स्वेदः क्लेदः स्रुतिः कोथः सदनं मूर्च्छनं मदः।
कटुकाम्लौ रसौ वर्णः पाण्डुरारुणवर्जितः॥52॥
श्लेष्मणः स्नेहकाठिन्यकण्डूशीतत्वगौरवम्।
बन्धोपलेपस्तैमित्यशोफापक्त्यतिनिद्रताः॥53॥
वर्णः श्वेतः+ रसौ स्वादुलवणौ चिरकारिता।
इति+अशेषामयव्यापि यत्+उक्तं दोषलक्षणम्॥54॥
दर्शनाद्यैः+अवहितः+तत्+सम्यक्+उपलक्षयेत्।
व्याध्यवस्थाविभागज्ञः पश्यन्+आर्तान् प्रतिक्षणम्॥55॥
अभ्यासात्+प्राप्यते दृष्टिः कर्मसिद्धिप्रकाशिनी।
रत्नादिसदसज्ज्ञानं न शास्त्रात्+एव जायते॥56॥
दृष्टापचारजः कश्चित्+कश्चित्+पूर्वापराधजः।
तत्सङ्करात्+भवति+अन्यः+ व्याधिः+एवं त्रिधा स्मृतः॥57॥
यथानिदानं दोषोत्थः कर्मजः+ हेतुभिः+विना।
महारम्भः+अल्पके हेतौ+आतङ्कः+ दोषकर्मजः॥58॥
विपक्षशीलनात्+पूर्वः कर्मजः कर्मसङ्क्षयात्।
गच्छति+उभयजन्मा तु दोषकर्मक्षयात्+क्षयम्॥59॥
द्विधा स्वपरतन्त्रत्वात्+व्याधयः+अन्त्याः पुनः+द्विधा।
पूर्वजाः पूर्वरूपाख्या जाताः पश्चात्+उपद्रवाः॥60॥
यथास्वजन्मोपशयाः स्वतन्त्राः स्पष्टलक्षणाः।
विपरीताः+ततः+अन्ये तु विद्यात्+एवं मलान्+अपि॥61॥
तान्+लक्षयेत्+अवहितः+ विकुर्वाणान् प्रतिज्वरम्।
तेषां प्रधानप्रशमे प्रशमः+अशाम्यतः+तथा॥62॥
पश्चात्+चिकित्सेत्+तूर्णं वा बलवन्तम्+उपद्रवम्।
व्याधिक्लिष्टशरीरस्य पीडाकरतरः+ हि सः॥63॥
विकारनाम्+अकुशलः+ न जिह्रीयात् कदाचन।
न हि सर्वविकाराणां नामतः+अस्ति ध्रुवा स्थितिः॥64॥
सः+ एव कुपतः+ दोषः समुत्थानविशेषतः।
स्थानान्तराणि च प्राप्य विकारान् कुरुते बहून्॥65॥
तस्मात्+विकारप्रकृतीः+अधिष्ठानान्तराणि च।
बुद्ध्वा हेतुविशेषान्+च शीघ्रं कुर्यात्+उपक्रमम्॥66॥

दूष्यं देशं बलं कालम्+अनलं प्रकृतिं वयः।

सत्त्वं सात्म्यं तथा+आहारम्+अवस्थाः+च पृथक्+विधाः॥67॥

सूक्ष्मसूक्ष्माः समीक्ष्य+एषां दोषौषधनिरूपणे।

यः+ वर्तते चिकित्सायां न सः+ स्खलति जातुचित्॥68॥

गुर्वल्पव्याधिसंस्थानं सत्त्वदेहबलाबलात्।

दृश्यते+अपि+अन्यथाकारं तस्मिन्+अवहितः+ भवेत्॥69॥

गुरुं लघुम्+इति व्याधिं कल्पयन्+तु भिषग्ब्रुवः।

अल्पदोषाकलनया पथ्ये विप्रतिपद्यते॥70॥

ततः+अल्पम्+अल्पवीर्यं वा गुरुव्याधौ प्रयोजितम्।

उदीरयेत्तरां रोगान् संशोधनम्+अयोगतः॥71॥

शोधनं तु+अतियोगेन विपरीतं विपर्यये।

क्षिणुयात्+न मलान्+एव केवलं वपुः+अस्यति॥72॥

अतः+अभियुक्तः सततं सर्वम्+आलोच्य सर्वथा।

तथा युञ्जीत भैषज्यम्+आरोग्याय यथा ध्रुवम्॥73॥

वक्ष्यन्ते+अतःपरं दोषाः+ वृद्धिक्षयविभेदतः।

पृथक् त्रीन् विद्धि संसर्गः+त्रिधा तत्र तु तान्+नव॥74॥

त्रीन्+एव समया वृद्ध्या षडेकस्य+अतिशायने।

त्रयोदश समस्तेषु षड् द्व्येकातिशयेन तु॥75।

एकं तुल्याधिकैः षट् च तारतम्यविकल्पनात्।

पञ्चविंशतिम्+इति+एवं वृद्धैः क्षीणैः+च तावतः॥76॥

एकैकवृद्धिसमताक्षयैः षट् ते पुनः+च षट्।

एकक्षयद्वन्द्ववृद्ध्या सविपर्ययया+अपि ते॥77॥

भेदा द्विषष्टिः+निर्दिष्टाः त्रिषष्टः स्वास्थ्यकारणम्॥

संसर्गात्+रसरुधिरादिभिः+तथा+एषां

दोषान्+तु क्षयसमताविवृद्धिभेदैः।

आनन्त्यं तरतमयोगतः+च यातान्

जानीयात्+अवहितमानसः+ यथास्वम्॥78॥

इति श्रीवैद्यपतिसिंहगुप्तसूनुश्रीमद्वाग्भटविरचितायाम्+अष्टाङ्गहृदयसंहितायां सूत्रस्थाने दोषभेदीयः+ नाम द्वादशः+अध्यायाः॥12॥

त्रयोदशः+अध्यायः

अथ+अतः+ दोषोपक्रमणीयम्+अध्यायं व्याख्यास्यामः।

इति ह स्म+आहुः+आत्रेयादयः+ महर्षयः।

वातस्य+उपक्रमः स्नेहः स्वेदः संशोधनं मृदु।
स्वाद्वम्ललवणोष्णानि भोज्यानि+अभ्यङ्गमर्दनम्॥1॥
वेष्टनं त्रासनं सेकः+ मद्यं पैष्टिकगौडिकम्।
स्निग्धोष्णा बस्तयः+ बस्तिनियमः सुखशीलता॥2॥
दीपनैः पाचनैः सिद्धाः स्नेहाः+च+अनेकयोनयः।
विशेषात्+मेद्यपिशितरसतैलानुवासनम्॥3॥
पित्तस्य सर्पिषः पानं स्वादुशीतैः+विरेचनम्।
स्वादुतिक्तकषायाणि भोजनानि+औषधानि च॥4॥
सुगन्धिशीतहृद्यानां गन्धानाम्+उपसेवनम्।
कण्ठेगुणानां हाराणां मणीनाम्+उरसा धृतिः॥5॥
कर्पूरचन्दनोशीरैः+अनुलेपः क्षणे क्षणे।
प्रदोषः+चन्द्रमाः सौधं हारि गीतं हिमः+अनिलः॥6॥
अयन्त्रणसुखं मित्रं पुत्रः सन्दिग्धमुग्धवाक्।
छन्दानुवर्तिनः+ दाराः प्रियाः शीलविभूषिताः॥7॥
शीताम्बुधारागर्भाणि गृहाणि+उद्यानदीर्घिकाः।
सुतीर्थविपुलस्वच्छसलिलाशयसैकते॥8॥
साम्भोजजलतीरान्ते कायमाने द्रुमाकुले।
सौम्या भावाः पयः सर्पिः+विरेकः+च विशेषतः॥9॥
श्लेष्मणः+ विधिना युक्तं तीक्ष्णं वमनरेचनम्।
अन्नं रूक्षाल्पतीक्ष्णोष्णं कटुतिक्तकषायकम्॥10॥
दीर्घकालस्थितं मद्यं रतिप्रीतिः प्रजागरः।
अनेकरूपः+ व्यायामः+चिन्ता रूक्षं विमर्दनम्॥11॥
विशेषात्+वमनं यूषः क्षौद्रं मेदोघ्नम्+औषधम्।
धूमोपवासगण्डूषा निःसुखत्वं सुखाय च॥12॥
उपक्रमः पृथग्दोषान् यः+अयम्+उद्दिश्य कीर्तितः।
संसर्गसन्निपातेषु तं यथास्वं विकल्पयेत्॥13॥
ग्रैष्मः प्रायः+ मरुत्पित्ते वासन्तः कफमारुते।
मरुतः+ योगवाहित्वात् कफपित्ते तु शारदः॥14॥
चयः+ एव जयेत्+दोषं कुपितं तु+अविरोधयन्।
सर्वकोपे बलीयांसं शेषदोषाविरोधतः॥15॥
प्रयोगः शमयेत्+व्याधिम्+एकं यः+अन्यम्+उदीरयेत्।
न+असौ विशुद्धः शुद्धः+तु शमयेत्+यः+ न कोपयेत्॥।16॥

व्यायामात्+ऊष्मणः+तैक्ष्ण्यात्+अहिताचरणात्+अपि।
कोष्ठात्+शाखास्थिमर्माणि द्रुतत्वात्+मारुतस्य च॥17॥
दोषाः+ यान्ति तथा तेभ्यः स्रोतोमुखविशोधनात्।
वृद्ध्या+अभिष्यन्दनात्+पाकात्+कोष्ठं वायोः+च निग्रहात्॥18॥
तत्रस्थाः+च विलम्बेरन् भूयः+ हेतुप्रतीक्षिणः।
ते कालादिबलं लब्ध्वा कुप्यन्ति+अन्याश्रयेषु+अपि॥19॥
तत्र+अन्यस्थानसंस्थेषु तदीयाम्+अबलेषु तु।
कुर्यात्+चिकित्सां स्वाम्+एव बलेन+अन्याभिभाविषु॥20॥
आगन्तुं शमयेत्+दोषं स्थानिनं प्रतिकृत्य वा।
प्रायः+तिर्यग्गता दोषाः क्लेशयन्ति+आतुरान्+चिरम्॥21॥
कुर्यात्+न तेषु त्वरया देहाग्निबलवित् क्रियाम्।
शमयेत्+तान् प्रयोगेन सुखं वा कोष्ठम्+आनयेत्॥22॥
ज्ञात्वा कोष्ठप्रपन्नाः+च यथासन्नं विनिर्हरेत्।
स्रोतोरोधबलभ्रंशगौरवानिलमूढताः॥23॥
आलस्यापक्तिनिष्ठीवमलसङ्गारुचिक्लमाः।
लिङ्गं मलानं सामानां निरामाणां विपर्ययः॥24॥
ऊष्मणः+अल्पबलत्वेन धातुम्+आद्यम्+अपाचितम्।
दुष्टम्+आमाशयगतं रसम्+आमं प्रचक्षते॥25॥
अन्ये दोषेभ्यः+ एव+अतिदुष्टेभ्यः+अन्योन्यमूर्च्छनात्।
कोद्रवेभ्यः+ विषस्य+इव वदन्ति+आमस्य सम्भवम्॥26॥
आमेन तेन सम्पृक्ताः+ दोषाः+ दूष्याः+च दूषिताः।
सामाः+ इति+उपदिश्यन्ते ये च रोगाः+तदुद्भवाः॥27।
सर्वदेहप्रविसृतान् सामान् दोषान् न निर्हरेत्।
लीनान् धातुषु+अनुत्क्लिष्टान् फलात्+आमात्+रसान्+इव॥28॥
आश्रयस्य हि नाशाय ते स्युः+दुर्निर्हरतु+अतः।
पाचनैः+दीपनैः स्नेहैः+तान् स्वेदैः+च परिष्कृतान्॥29॥
शोधयेत्+शोधनैः काले यथासन्नं यथाबलम्।
हन्ति+आशु युक्तं वक्त्रेण द्रव्याम्+आमाशयात्+मलान्॥30॥
घ्राणेन च+ऊर्ध्वजत्रूत्थान् पक्वाधानात्+ गुदेन च।
उत्क्लिष्टान्+अधः+ ऊर्ध्वं वा न च+आमान् वहतः स्वयम्॥31॥
धारयेत्+औषधैः+दोषान् विधृताः+ते हि रोगदाः।
प्रवृत्तान् प्रागतः+ दोषान्+उपेक्षेत हिताशिनः॥32॥

विबद्धान् पाचनैः+तैः+तैः पाचयेत्+निर्हरेत वा।
श्रावणे कार्तिके चैत्रे मासि साधारणे क्रमात्॥33॥
ग्रीष्मवर्षाहिमचितान् वाय्वादीन्+आशु निर्हरेत्।
अत्युष्णवर्षशीता हि ग्रीष्मवर्षाहिमागमाः॥34॥
सन्धौ साधारणे तेषां दुष्टान् दोषान् विशोधयेत्।
स्वस्थवृत्तम्+अभिप्रेत्य व्याधौ व्याधिवशेन तु॥35॥
कृत्वा शीतोष्णवृष्टीनां प्रतीकारं यथायथम्।
प्रयोजयेत्+क्रियां प्राप्तां क्रियाकालं न हापयेत्॥36।
युञ्ज्यात्+अनन्नम्+अन्नादौ मध्ये+अन्ते कवलान्तरे।
ग्रासे ग्रासे मुहुः सान्नं सामुद्गं निशि च+औषधम्॥37॥
कफोद्रेके गदे+अनन्नं बलिनः+ रोगरोगिणोः।
अन्नादौ विगुणे+अपाने समाने मध्य इष्यते॥38॥
व्याने+अन्ते प्रातः+आशस्य सायम्+आशस्य तु+उत्तरे।
ग्रासग्रासान्तयोः प्राणे प्रदुष्टे मातरिश्वनि॥39॥
मुहुः+मुहुः+विषच्छर्दिहिध्मातृट्श्वासकासिषु।
योज्यं सभोज्यं भैषज्यं भोज्यैः+चित्रैः+अरोचके॥40॥
कम्पाक्षेपकहिध्मासु सामुद्गं लघुभोजिनाम्।
ऊर्ध्वजत्रुविकारेषु स्वप्नकाले प्रशस्यते॥41॥
इति श्रीवैद्यपतिसिंहगुप्तसूनुश्रीमद्वाग्भटविरचितायाम्+अष्टाङ्गहृदयसंहितायां सूत्रस्थाने दोषोपक्रमणीयः+ नाम त्रयोदशः+अध्यायः॥13॥

चतुर्दशः+अध्यायः

अथ+अतः+ द्विविधोपक्रमणीयम्+अध्यायं व्याख्यास्यामः।
इति ह स्म+आहुः+आत्रेयादयः+ महर्षयः।
उपक्रम्यस्य हि द्वित्वात्+ द्विधैव+उपक्रमः+ मतः।
एकः सन्तर्पणः+तत्र द्वितीयः+च+अपतर्पणः॥1॥
बृंहणः+ लङ्घनः+च+इति तत्पर्यायौ+उदाहृतौ।
बृंहणं यत्+बृहत्त्वाय लङ्घनं लाघवाय यत्॥2॥
देहस्य भवतः प्रायः+ भौमापम्+इतरेत्+च ते।
स्नेहनं रूक्षणं कर्म स्वेदनं स्तम्भनं च यत्॥3॥
भूतानां तत्+अपि द्वैध्यात्+ द्वितयं न+अतिवर्तते।
शोधनं शमनं च+इति द्विधा तत्र+अपि लङ्घनम्॥4॥
यत्+ईरयेत्+बहिः+दोषान् पञ्चधा शोधनं च तत्।

निरूहः+ वमनं कायशिरोरेकः+अस्रविस्रुतिः॥5॥
न शोधयति यत्+दोषान् समान्+न+उदीरयति+अपि।
समीकरोति विषमान् शमनं तत्+च सप्तधा॥6॥
पाचनं दीपनं क्षुत्तृड्व्यायामातपमारुताः।
बृंहणं शमनं तु+एव वायोः पित्तानिलस्य च॥7॥
बृंहयेत्+ व्याधिभैषज्यमद्यस्त्रीशोककर्शितान्।
भाराध्वोरः क्षतक्षीणरूक्षदुर्बलवातलान्॥8॥
गर्भिणीसूतिकाबालवृद्धान् ग्रीष्मे+अपरान्+अपि।
मांसक्षीरसितासर्पिर्मधुरस्निग्धबस्तिभिः॥9॥
स्वप्नशय्यासुखाभ्यङ्गस्नाननिर्वृतिहर्षणैः।
मेहामदोषातिस्निग्धज्वरोरुस्तम्भकुष्ठिनः॥10॥
विसर्पविद्रधिप्लीहशिरः कण्ठाक्षिरोगिणः।
स्थूलान्+च लङ्घयेत्+नित्यं शिशिरे तु+अपरान्+अपि॥11॥
तत्र संशोधनैः स्थौल्यबलपित्तकफाधिकान्।
आमदोषज्वरच्छर्दिः+अतीसारहृदामयैः॥12॥
विबन्धगौरवोद्गारहृल्लासादिभिः+आतुरान्।
मध्यस्थौल्यादिकान् प्रायः पूर्वं पाचनदीपनैः॥13॥
एभिः+एव+आमयैः+आर्तान् हीनस्थौल्यबलादिकान्।
क्षुत्तृष्णानिग्रहैः+दोषैः+तु+आर्तान् मध्यबलैः+दृढान्॥14॥
समीरणातपायासैः किम्+उत+अल्पबलैः+नरान्।
न बृंहयेत्+लङ्घनीयान् बृंह्यान्+तु मृदु लङ्घयेत्॥15॥
युक्त्या वा देशकालादिबलतः+तान्+उपाचरेत्।
बृंहिते स्यात्+बलं पुष्टिः+तत्साध्यामयसङ्क्षयः॥16॥
विमलेन्द्रियता सर्गः+ मलानां लाघवं रुचिः।
क्षुत्तृट्सहोदयः शुद्धहृदयोद्गारकण्ठता॥17॥
व्याधिमार्दवम्+उत्साहः+तन्द्रानाशः+च लङ्घिते।
अनपेक्षितमात्रादिसेविते कुरुतः+तु ते॥18॥
अतिस्थौल्यातिकार्श्यादीन् वक्ष्यन्ते ते च सौषधाः।
रूपं तैः+एव च ज्ञेयम्+अतिबृंहितलङ्घिते॥19॥
अतिस्थौल्या+अपचीमेहज्वरोदरभगन्दरान्।
कासंसन्न्यासकृच्छ्रामकुष्ठादीन्+अतिदारुणान्॥20॥
तत्र मेदोनिलश्लेष्मनाशनं सर्वम्+इष्यते।

कुलत्थजूर्णश्यामाकयवमुद्गमधूदकम्॥21॥
मस्तुदण्डाहतारिष्टचिन्ताशोधनजागरम्।
मधुना त्रिफलां लिह्यात्+ गुडूचीम्+अभयां घनम्॥22॥
रसाञ्जनस्य महतः पञ्चमूलस्य गुग्गुलोः।
शिलाजतुप्रयोगः+च साग्निमन्थरसः+ हितः॥23॥
विडङ्गं नागरं क्षारः काललोहरजः+ मधु।
यवामलकचूर्णं च योगः+अतिस्थौल्यदोषजित्॥24॥
व्योषकट्वीवराशिग्रुविडङ्गातिविषास्थिराः।
हिङ्गुसौवर्चलाजाजीयवानीधान्यचित्रकाः॥25॥
निशे बृहत्यौ हपुषा पाठा मूलं च केम्बुकात्।
एषां चूर्णं मधु घृतं तैलं च सदृशांशकम्॥26॥
सक्तुभिः षोडशगुणैः+युक्तं पीतं निहन्ति तत्।
अतिस्थौल्यादिकान् सर्वान् रोगान्+अन्यान्+च तद्विधान्॥27॥
हृद्रोगकामलाश्वित्रश्वासकासगलग्रहान्।
बुद्धिमेधास्मृतिकरं सन्नस्य+अग्नेः+च दीपनम्॥28॥
अतिकार्श्यं भ्रमः कासः+तृष्णाधिक्यम्+अरोचकः।
स्नेहाग्निनिद्रादृक्श्रोत्रशुक्रौजः क्षुत्स्वरक्षयः॥29॥
बस्तिहृन्मूर्दजङ्घोरुत्रिकपार्श्वरूजा ज्वरः।
प्रलापोर्ध्वानिलग्लानिच्छर्दिपर्वास्थिभेदनम्॥30॥
वर्चोमूत्रग्रहाद्याः+च जायन्ते+अतिविलङ्घनात्।
कार्श्यम्+एव वरं स्थौल्यात् न हि स्थूलस्य भेषजम्॥31॥
बृंहणं लङ्घनं वा+अलम्+अतिमेदः+अग्निवातजित्।
मधुरस्निग्धसौहित्यैः+यत्+सौख्येन च नश्यति॥32॥
क्रशिमा स्थविमात्यन्तविपरीतनिषेवणैः।
योजयेत्+ बृंहणं तत्र सर्वं पानान्नभेषजम्॥33॥
अचिन्तया हर्षणेन ध्रुवं सन्तर्पणेन च।
स्वप्नप्रसङ्गात्+च कृशः+ वराहः+ इव पुष्यति॥34॥
न हि मांससमं किञ्चित्+अन्यत्+ देहबृहत्त्वकृत्।
मांसात्+अमांसं मांसेन सम्भृतत्वात्+विशेषतः॥35॥
गुरु चातर्पणं स्थूले विपरीतं हितं कृशे।
यवगोधूमम्+उभयोः+तद्योग्याहितकल्पनम्॥36॥
दोषगत्या+अतिरिच्यन्ते ग्राहिभेद्यादिभेदतः।

उपक्रमाः+ न ते द्वित्वात्+भिन्नाः+ अपि गदाः+ इव॥37॥

इति श्रीवैद्यपतिसिंहगुप्तसूनुश्रीमद्वाग्भटविरचितायाम्+अष्टाङ्गहृदयसंहितायां सूत्रस्थाने द्विविधोपक्रमणीयः+ नाम चतुर्दशः+अध्यायः॥14॥

पञ्चदशः+अध्यायः।

अथ+अतः शोधनादिगणसङ्ग्रहम्+अध्यायं व्याख्यास्यामः।

इति ह स्म+आहुः+आत्रेयादयः+ महर्षयः॥

मदनमधुकलम्बाः+ निम्बबिम्बीविशालाः+

त्रपुसकुटजमूर्वाः+ देवदाली कृमिघ्नम्।

विदुलदहनचित्राः कोशवत्यौ करञ्जः

कणलवणवचैलासर्षपाः+छर्दनानि॥1॥

निकुम्भकुम्भत्रिफलागवाक्षीस्नुक्शङ्खिनीनीलिनितिल्वकानि।

शम्याककम्पिल्लकहेमदुग्धा दुग्धं च मूत्रं च विरेचनानि॥2॥

मदनकुटजकुष्ठदेवदालीमधुकवचादशमूलदारुरास्नाः।

यवमिशिकृतवेधनं कुलत्था मधु लवणं त्रिवृता निरूहणानि॥3॥

वेल्लापामार्गव्योषदार्वीसुराला

बीजं शैरीषं बार्हतं शैग्रवं च।

सारः+ माधूकः सैन्धवं तार्क्ष्यशैलं

त्रुट्यौ पृथ्वीका शोधयन्ति+उत्तमाङ्गम्॥4॥

भद्रदारु नतं कुष्ठं दशमूलं बलाद्वयम्।

वायुं वीरतरादिः+च विदार्यादिः+च नाशयेत्॥5॥

दूर्वा+अनन्ता निम्बवासा+आत्मगुप्ता

गुन्द्रा+अभीरुः शीतपाकी प्रियङ्गुः।

न्यग्रोधादिः पद्मकादिः स्थिरे द्वे

पद्मं वन्यं सारिवादिः+च पित्तम्॥6॥

आरग्वधादिः+अर्कादिः+मुष्ककाद्यः+असनादिकः।

सुरसादिः समुस्तादिः+वत्सकादिः+बलासजित्॥7॥

जीवन्ती काकोल्यौ मेदे द्वे मुद्गमाषपर्ण्यौ च।

ऋषभकजीवकमधुकं च+इति गणः+ जीवनीयाख्यः॥8॥

विदारिपञ्चाङ्गुलवृश्चिकालीवृश्चीवदेवाह्वयशूर्पपर्ण्यः।

कण्डूकरी जीवनह्रस्वसंज्ञे द्वे पञ्चके गोपसुता त्रिपादी॥9॥

विदार्यादिः+अयं हृद्यः+ बृंहणः+ वातपित्तहा।

शोषगुल्माङ्गमर्दोर्ध्वश्वासकासहरः+ गणः॥10॥

सारिवोशीरकाश्मर्यमधूकशिशिरद्वयम्।
यष्टी परूषकं हन्ति दाहपित्तास्रतृड्ज्वरान्॥11॥
पद्मकपुण्ड्रौ वृद्धितुगद्ध्र्यः
शृङ्ग्यमृता दश जीवनसंज्ञाः।
स्तन्यकराः+ घ्नन्तीरणपित्तं
प्रीणनजीवनबृंहणवृष्याः॥12॥
परूषकं वरा द्राक्षा कट्फलं कतकात् फलम्।
राजाह्वं दाडिमं शाकं तृण्मूत्रामयवातजित्॥13॥
अञ्जनं फलिनी मांसी पद्मोत्पलरसाञ्जनम्।
सैलामधुकनागाह्वं विषान्तर्दाहपित्तनुत्॥14॥
पटोलकटुरोहिणीचन्दनं
मधुस्रवगुडूचिपाठान्वितम्।
निहन्ति कफपित्तकुष्ठज्वरान्
विषं वमिमरोचकं कामलाम्॥15॥
गुडूचीपद्मकारिष्टधानकारक्तचन्दनम्।
पित्तश्लेष्मज्वरच्छर्दिदाहतृष्णाघ्नम्+अग्निकृत्॥16॥
आरग्वधेन्द्रयवपाटलिकाकतिक्तानिम्बामृतामधुरसास्रुववृक्षपाठाः।
भूनिम्बसैर्यकपटोलकरञ्जयुग्मसप्तच्छदाग्निसुषवीफलबाणघोण्टाः॥17॥
आरग्वधादिः+जयति छर्दिकुष्ठविषज्वरान्।
कफं कण्डूं प्रमेहं च दुष्टव्रणविशोधनः॥18॥
असनतिनिशभूर्जश्वेतवाहप्रकीर्याः
खदिरकदरभण्डीशिंशिपामेषशृङ्ग्यः।
त्रिहिमतलपलाशा जोङ्गकः शाकशालौ
क्रमुकधवकलिङ्गच्छागकर्णाश्वकर्णाः॥19॥
असनादिः+विजयते श्वित्रकुष्ठकफक्रिमीन्।
पाण्डुरोगं प्रमेहं च मेदोदोषनिबर्हणः॥20॥
वरुणसैर्यकयुग्मशतावरीदहनमोरटबिल्वविषाणिकाः।
द्विबृहतीद्विकरञ्जजयाद्वयं बहलपल्लवदर्भरुजाकराः॥21॥
वरुणादिः कफं मेदः+ मन्दाग्नित्वं नियच्छति।
आढ्यावातं शिरःशूलं गुल्मं च+अन्तः सविद्रधिम्॥22॥
ऊषकस्तुत्थकं हिङ्गु कासीसद्वयसैन्धवम्।
सशिलाजतु कृच्छ्राश्मगुल्ममेदः कफापहम्॥23॥

बेल्लन्तरारणिकबूकवृषाश्मभेदगोकण्टकेत्कटसहाचरबाणकाशाः।

वृक्षादनीनलकुशद्वयगुण्ठगुन्द्राभल्लूकमोरटकुरण्टकरम्भपार्थाः॥24॥

वर्गः+ वीरतराद्यः+अयं हन्ति वातकृतान् गदान्।

अश्मरीशर्करामूत्रकृच्छ्राघातरुजाहरः॥25॥

रोध्रशाबरकरोध्रपलाशा

जिङ्गिणीसरलकट्फलयुक्ताः।

कुत्सिताम्बकदलीगतशोकाः।

सैलवालुपरिपेलवमोचाः॥26॥

एषः+ रोध्रादिकः+ नाम मेदः कफहरः+ गणः।

योनिदोषहरः स्तम्भी वर्ण्यः+ विषविनाशनः॥27॥

अर्कालर्कौ नागदन्ती विशल्या

भार्ङ्गी रास्ना वृश्चिकाली प्रकीर्या।

प्रत्यक्पुष्पी पीततैलोदकीर्या

श्वेतायुग्मं तापसानां च वृक्षः॥28॥

अयम्+अर्कादिकः+ वर्गः कफमेदोविषापहः।

कृमिकुष्ठप्रशमनः+ विशेषात्+व्रणशोधनः॥29॥

सुरसयुगफणिज्जं कालमाला विडङ्गं

खरबुसवृषकर्णीकट्फलं कासमर्दः।

क्षवकसरसिभार्ङ्गीकार्मुकाः काकमाची

कुलहलविषमुष्टीभूः+तृणः+ भूतकेशी॥30॥

सुरसादिः+गणः श्लेष्ममेदः कृमिनिषूदनः।

प्रतिश्यायारुचिश्वासकासघ्नः+ व्रणशोधनः॥31॥

मुष्ककस्नुग्वराद्वीपिपलाशधवशिंशिपाः।

गुल्ममेहाश्मरीपाण्डुमेदः+अर्शः कफशुक्रजित्॥32॥

वत्सकमूर्वाभार्ङ्गीकटुका मरीचं घुणप्रिया च गण्डीरम्।

एला पाठा+अजाजी कट्वङ्गफलाजमोदसिद्धार्थवचाः॥33॥

जीरकहिङ्गुविडङ्गं पशुगन्धा पञ्चकोलकं हन्ति।

चलकफमेदः पीनसगुल्मज्वरशूलदुर्नाम्नः॥34॥

वचाजलददेवाह्वनागरातिविषाभयाः

हरिद्राद्वययष्ट्याह्वकलशीकुटजोद्भवाः॥35॥

वचाहरिद्रादिगणावामातीसारनाशनौ।

मेदः कफाढ्यपवनस्तन्यदोषनिबर्हणौ॥36॥

प्रियङ्गुपुष्पाञ्जनयुग्मपद्माः
पद्मात्+रजः+ योजनवल्ल्यनन्ता।
मानद्रुमः+ मोचरसः समङ्गा
पुन्नागशीतं मदनीयहेतुः॥37॥
अम्बष्ठा मधुकं नमस्करी
नन्दीवृक्षपलाशकच्छुराः।
रोध्रं धातकिबिल्वपेशिके
कट्वङ्गः कमलोद्भवं रजः॥38॥
गणौ प्रियङ्ग्वम्बष्ठादी पक्वातीसारनाशनौ।
सन्धानीयौ हितौ पित्ते व्रणानाम्+अपि रोपणौ॥39॥
मुस्तावचाग्निद्विनिशा द्वितिक्ताभल्लातपाठात्रिफलाविषाख्याः।
कुष्ठं त्रुटी हैमवती च योनिस्तन्यामयघ्ना मलपाचनाः+च॥40॥
न्यग्रोधपिप्पलसदाफलरोध्रयुग्मं जम्बूद्वयार्जुनकपीतनसोमवल्काः।
प्लक्षाम्रवञ्जुलपियालपलाशनन्दीकोलीकदम्बविरलामधुकं मधूकम्॥41॥
न्यग्रोधादिः+गणः+ व्रण्यः सङ्ग्राही भग्नसाधनः।
मेदः पित्तास्रतृड्दाहयोनिरोगनिबर्हणः॥42॥
एलायुग्म तुरुष्ककुष्ठफलिनीमांसीजलध्यामकं
स्पृक्काचोरकचोचपत्रतगरस्थौणेयजातीरसाः।
शुक्तिः+व्याघ्रनखः+अमराह्वम्+अगुरुः श्रीवासकः कुङ्कुमं
चण्डागुग्गुलुदेवधूपखपुराः पुन्नागनागाह्वयम्॥43॥
एलादिकः+ वातकफौ विषं च विनियच्छति।
वर्णप्रसादनः कण्डूपिटिकाकोठनाशनः॥44॥
श्यामादन्तीद्रवन्तीक्रमुककुटरणाशङ्खिनीचर्मसाह्वा
स्वर्णक्षीरीगवाक्षीशिखरिरजनकच्छिन्नरोहाकरञ्जाः।
बस्तान्त्री व्याधिघातः+ बहलबहुरसः+तीक्ष्णवृक्षात् फलानि
श्यामाद्यः+ हन्ति गुल्मं विषमरुचिकफौ हृद्रुजं मूत्रकृच्छ्रम्॥45॥
त्रयस्त्रिंशत्+इति प्रोक्ताः+ वर्गाः+तेषु तु+अलाभतः।
युञ्ज्यात्+तद्विधम्+अन्यत्+च द्रव्यं जह्यात्+अयौगिकम्॥46॥
एते वर्गाः+ दोषदूष्याद्यपेक्ष्य
कल्कक्वाथस्नेहलेहादियुक्ताः।
पाने नस्ये+अन्वासने+अन्तः+बहिः+वा
लेपाभ्यङ्गैः+घ्नन्ति रोगान् सुकृच्छ्रान्॥47॥

इति श्रीवैद्यपतिसिंहगुप्तसूनुश्रीमद्वाग्भटविरचितायाम्+अष्टाङ्गहृदयसंहितायां सूत्रस्थाने शोधनादिगणसङ्ग्रहः+ नाम पञ्चदशः+अध्यायाः॥15॥

षोडशः+अध्यायः

अथ+अतः स्नेहविधिम्+अध्यायं व्याख्यास्यामः।

इति ह स्म+आहुः+आत्रेयादयः+ महर्षयः।

गुरुशीतसरस्निग्धमन्दसूक्ष्ममृदुद्रवम्।

औषधं स्नेहनं प्रायः+ विपरीतं विरूक्षणम्।1॥

सर्पिः+मज्जा वसा तैलं स्नेहेषु प्रवरं मतम्।

तत्र+अपि च+उत्तमं सर्पिः संस्कारस्य+अनुवर्तनात्॥2॥

माधुर्यात्+अविदाहित्वात्+जन्माद्येव च शीलनात्।

पित्तघ्नाः+ते यथापूर्वम्+इतरघ्नाः+ यथा+उत्तरम्॥3॥

घृतात्+तैलं गुरु वसा तैलात्+मज्जा ततः+अपि च।

द्वाभ्यां त्रिभिः+चतुर्भिः+तैः+यमकः+त्रिवृतः+ महान्॥4॥

स्वेद्यसंशोध्यामद्यस्त्रीव्यायामासक्तचिन्तकाः।

वृद्धबालाबलकृशाः+ रुक्षाः क्षीणास्त्ररेतसः॥5॥

वातार्तस्यन्दतिमिरदारुणप्रतिबोधिनः।

स्नेह्याः न तु+अतिमन्दाग्नितीक्ष्णाग्निस्थूलदुर्बलाः॥6॥

ऊरुस्तम्भातिसारामगलरोगगरोदरैः।

मूर्च्छाच्छर्द्यरुचिश्लेष्मतृष्णामद्यैः+च पीडिताः॥7॥

अपप्रसूता युक्ते च नस्ये बस्तौ विरेचने।

तत्र धीस्मृतिमेधादिकाङ्क्षिणां शस्यते घृतम्।

ग्रन्थिनाडीकृमिश्लेष्ममेदोमारुतरोगिषु।

तैलं लाघवदार्ढ्यार्थिक्रूरकोष्ठेषु देहिषु॥9॥

वातातपाध्वभारस्त्रीव्यायमक्षीणधातुषु।

रूक्षक्लेशक्षमात्यग्निवातावृतपथेषु च॥10॥

शेषौ वसा तु सन्ध्यस्थिमर्मकोष्ठरुजासु च।

तथा दग्धाहतभ्रष्टयोनिकर्णशिरोरुजि॥11॥

तैलं प्रावृषि वर्षान्ते सर्पिः+अन्यौ तु माधवे।

ऋतौ साधारणे स्नेहः शस्तः+अह्नि विमले रवौ॥12॥

तैलं त्वरायां शीते+अपि घर्मे+अपि च घृतं निशि।

निश्येव पित्ते पवने संसर्गे पित्तवती+अपि॥13॥

निशि+अन्यथा वातकफात्+रोगाः स्युः पित्ततः+ दिवा।

युक्त्या+अवचारयेत्+स्नेहं भक्ष्यादि+अन्नेन बस्तिभिः॥14॥
नस्य+अभ्यञ्जनगण्डूषमूर्द्धकर्णाक्षितर्पणैः।
रसभेदैककत्वाभ्यां चतुःषष्टिः+विचारणाः।15॥
स्नेहस्य+अन्याभिभूतत्वात्+अल्पत्वात्+च क्रमात्+स्मृताः।
यथा+उक्तहेत्वभावात्+च न+अच्छपेयः+ विचारणाः॥16॥
स्नेहस्य कल्पः सः+ श्रेष्ठः स्नेहकर्माशुसाधनात्।
द्वाभ्यां चतुर्भिः+अष्टाभिः+यामैः+जीर्यन्ति याः क्रमात्॥17॥
ह्रस्वमध्योत्तमा मात्राः+ताः+ताभ्यः+च ह्रसीयसीम्।
कल्पयेत्+वीक्ष्य दोषादीन् प्रागेव तु ह्रसीयसीम्॥18॥
ह्यस्तेन जीर्णः+ एव+अन्ने स्नेहः+अच्छः शुद्धये बहुः।
शमनः क्षुद्वतः+अनन्नः+ मध्यमात्रः+च शस्यते॥19॥
बृंहणः+ रसमद्याद्यैः सभक्तः+अल्पः हितः सः+ च।
बालवृद्धपिपासार्तस्नेहद्विण्मद्यशीलिषु॥20॥
स्त्रीस्नेहनित्यमन्दाग्निसुखितक्लेशभीरुषु।
मृदुकोष्ठाल्पदोषेषु काले च+उष्णे कृशेषु च॥21॥
प्राङ्मध्योत्तरभक्तः+असौ+अधोमध्योर्ध्वदेहजान्।
व्याधीन्+जयेत्+बलं कुर्यात्+अङ्गानां च यथाक्रमम्॥22॥
वारी+उष्णम्+अच्छे+अनु पिबेत् स्नेहे तत्+सुखपक्तये।
आस्योपलेपशुद्ध्यै च तौवरारुष्करे न तु॥23॥
जीर्णाजीर्णविशङ्कायां पुनः+उष्णोदकं पिबेत्।
तेन+उद्गारविशुद्धिः स्यात्+ततः+च लघुता रुचिः॥24॥
भोज्यः+अन्नं मात्रया पास्यन् श्वः पिबन् पीतवान्+अपि।
द्रवोष्णम्+अनभिष्यन्दि न+अतिस्निग्धम्+असङ्करम्॥25॥
उष्णोदकोपचारी स्यात्+ ब्रह्मचारी क्षपाशयः।
न वेगरोधी व्यायामक्रोधशोकहिमातपान्॥26॥
प्रवातयानयानाध्वभाष्यात्यासनसंस्थितीः।
नीचाति+उच्चोपधान्+आहः स्वप्नधूमरजांसि च॥27॥
यानि+अहानि पिबेत्+तानि तावन्ति+अन्यानि+अपि त्यजेत्।
सर्वकर्मसु+अयं प्रायः+ व्याधिक्षीणेषु च क्रमः॥28॥
उपचारः+तु शमने कार्यः स्नेहे विरिक्तवत्।
त्र्यहम्+अच्छं मृदौ कोष्ठे क्रूरे सप्तदिनं पिबेत्॥29॥
सम्यक्+स्निग्धः+अथवा यावत्+अतः सात्म्यी भवेत्+परम्।

वातानुलोम्यं दीप्तः+अग्निः+वर्चः स्निग्धम्+असंहतम्॥30॥
स्नेहोद्वेगः क्लमः सम्यक्+स्निग्धे रुक्षे विपर्ययः।
अतिस्निग्धे तु पाण्डुत्वं घ्राणवक्त्रगुदस्रवाः॥31॥
अमात्रया+अहितः+ काले मिथ्याहारविहारतः।
स्नेहः करोति शोफार्शस्तन्द्रास्तम्भविसंज्ञताः॥32॥
कण्डूकुष्ठज्वरोत्क्लेशशूलान्+आहभ्रमादिकान्।
क्षुत्तृष्णोल्लेखनस्वेदरूक्षपानान्नभेषजम्॥33॥
तक्रारिष्टखलोद्दालयवश्यामाककोद्रवम्।
पिप्पलीत्रिफलाक्षौद्रपथ्यागोमूत्रगुग्गुलु॥34॥
यथास्वं प्रतिरोगं च स्नेहव्यापदि साधनम्।
विरूक्षणे लङ्घनवत्+कृतातिकृतलक्षणम्॥35॥
स्निग्धद्रवोष्णधन्वोत्थरसभुक् स्वेदम्+आचरेत्।
स्निग्धः+त्र्यहं स्थितः कुर्यात्+विरेकं वमनं पुनः॥36॥
एकाहं दिनम्+अन्यत्+च कफम्+उत्क्लेश्य तत्करैः।
मांसला मेदुरा भूरिश्लेष्माणः+ विषम्+आग्नयः॥37॥
स्नेहोचिताः+च ये स्नेह्याः+तान् पूर्वं रूक्षयेत्+ततः।
संस्नेह्य शोधयेत्+एवं स्नेहव्यापत्+न जायते॥38॥
अलं मलान्+ईरयितुं स्नेहः+च+असात्म्यतां गतः।
बालवृद्धादिषु स्नेहपरिहारासहिष्णुषु॥39॥
योगान्+इमान्+अनुद्वेगान् सद्यः स्नेहान् प्रयोजयेत्।
प्राज्यमांसरसाः+तेषु पेया वा स्नेहभर्जिता॥40॥
तिलचूर्णः+च सस्नेहफाणितः कृशराः+ तथा।
क्षीरपेया घृताढ्योष्णा दध्नः+ वा सगुडः सरः॥41॥
पेया च पञ्चप्रसृता स्नेहैः+तण्डुलपञ्चमैः।
सप्त+एते स्नेहनाः सद्यः स्नेहाः+च लवणोल्बणाः॥42॥
तत्+हि+अभिष्यन्दि+अरूक्षं च सूक्ष्मम्+उष्णं व्यवायि च।
गुडानूपामिषक्षीरतिलमाषसुरादधि॥43॥
कुष्ठशोफप्रमेहेषु स्नेहार्थं न प्रकल्पयेत्।
त्रिफलापिप्पलीपथ्यागुग्गुल्वादिविपाचितान्॥44॥
स्नेहान् यथास्वम्+एतेषां योजयेत्+अविकारिणः।
क्षीणानां तु+आमयैः+अग्निदेहसन्धुक्षणक्षमान्॥45॥
दीप्तान्तराग्निः परिशुद्धकोष्ठः

प्रत्यग्रधातुः+बलवर्णयुक्तः।
दृढेन्द्रियः+ मन्दजरः शतायुः
स्नेहोपसेवी पुरुषः प्रदिष्टः॥46॥
इति श्रीवैद्यपतिसिंहगुप्तसूनुश्रीमद्वाग्भटविरचितायाम्+अष्टाङ्गहृदयसंहितायां सूत्रस्थाने स्नेहविधिः+नाम षोडशः+अध्यायः॥16॥
सप्तदशः+अध्यायः।
अथः+अतः स्वेदविधिम्+अध्यायं व्याख्यास्यामः।
इति ह स्म+आहुः+आत्रेयादयः+ महर्षयः॥
स्वेदः+तापोपनाहोष्मद्रवभेदात्+चतुर्विधः।
तापः+अग्नितप्तवसनफालहस्ततलादिभिः॥1॥
उपनाहः+ वचाकिण्वशताह्वादेवदारुभिः।
धान्यैः समस्तैः+गन्धैः+च रास्नैः+अण्डजटामिषैः॥2॥
उद्रिक्तलवणैः स्नेहचुक्रतक्रपयः प्लुतैः।
केवले पवने श्लेष्मसंसृष्टे सुरसादिभिः॥3॥
पित्तेन पद्मकाद्यैः+तु साल्वणाख्यैः पुनः पुनः।
स्निग्धोष्णवीर्यैः+मृदुभिः+चर्मपट्टैः+अपूतिभिः॥4॥
अलाभे वातजित्पत्रकौशेयाविकशाटकैः।
बद्धं रात्रौ दिवा मुञ्चेत्+मुञ्चेत्+रात्रौ दिवाकृतम्॥5॥
ऊष्मा तु+उत्कारिकालोष्ट कपालोपलपांसुभिः।
पत्रभङ्गेन धान्येन करीषसिकतातुषैः॥6॥
अनेकोपायसन्तप्तैः प्रयोज्यः+ देशकालतः।
शिग्रुवारणकैरण्डकरञ्जसुरसार्जकात्॥7॥
शिरीषवासावंशार्कमालतीदीर्घवृन्ततः।
पत्रभङ्गैः+वचाद्यैः+च मांसैः+च+अनूपवारिजैः॥8॥
दशमूलेन च पृथक् सहितैः+वा यथामलम्।
स्नेहवद्भिः सुराशुक्तवारिक्षीरादिसाधितैः॥9॥
कुम्भीः+गलन्तीः+नाडीः+वा पूरयित्वा रुजार्दितम्।
वाससा+आच्छादितं गात्रं स्निग्धं सिञ्चेत्+यथासुखम्॥10॥
तैः+एव वा द्रवैः पूर्णं कुण्डं सर्वाङ्गगे+अनिले।
अवगाह्य+आतुरः+तिष्ठेत्+अर्शः कृच्छ्रादिरुक्षु च॥11॥
निवाते+अन्तर्बहिः स्निग्धः+ जीर्णान्नः स्वेदम्+आचरेत्।
व्याधिव्याधितदेशर्तुवशात्+मध्यवरावरम्॥12॥

कफार्तः+ रूक्षणं रूक्षः+ रूक्षः स्निग्धं कफानिले।
आमाशयगते वायौ कफे पक्वाशयाश्रिते॥13॥
रूक्षपूर्वं तथा स्नेहपूर्वं स्थानानुरोधतः।
अल्पं वङ्क्षणयोः स्वल्पं दृङ्मुष्कहृदये न वा॥14॥
शीतशूलक्षये स्विन्नः+ जाते+अङ्गानां च मार्दवे।
स्यात्+शनैः+मृदितः स्नातः+ततः स्नेहविधिं भजेत्॥15॥
पित्तास्रकोपतृण्मूर्च्छास्वराङ्गसदनभ्रमाः।
सन्धिपीडा ज्वरः श्यावरक्तमण्डलदर्शनम्॥16॥
स्वेदातियोगात्+शर्दिः+च तत्र स्तम्भनम्+औषधम्।
विषक्षाराग्न्यतीसारच्छर्दिमोहातुरेषु च॥27॥
स्वेदनं गुरु तीक्ष्णोष्णं प्रायः स्तम्भनम्+अन्यथा।
द्रवस्थिरसरस्निग्धरूक्षसूक्ष्मं च भेषजम्॥18॥
स्वेदनं स्तम्भनं श्लक्ष्णं रूक्षसूक्ष्मसरद्रवम्।
प्रायः+तिक्तं कषायं च मधुरं च समासतः॥19॥
स्तम्भितः स्यात्+बले लब्धे यथोक्तामयसङ्क्षयात्।
स्तम्भत्वक्स्नायुसङ्कोचकम्पहृद्वाग्घनुग्रहैः॥20॥
पादौष्ठत्वक्करैः श्यावैः+अतिस्तम्भितम्+आदिशेत्।
न स्वेदयेत्+अतिस्थूलरूक्षदुर्बलमूर्च्छितान्॥21॥
स्तम्भनीयक्षतक्षीणक्षाममद्यविकारिणः।
तिमिरोदरवीसर्पकुष्ठशोषाढ्यरोगिणः॥22॥
पीतदुग्धदधिस्नेहमधून् कृतविरेचनान्।
भ्रष्टदग्धगुदग्लानिक्रोधशोकभयार्दितान्॥23॥
क्षुत्तृष्णाकामलापाण्डुमेहिनः पित्तपीडितान्।
गर्भिणीं पुष्पितां सूतां मृदु च+आत्ययिके गदे॥24॥
श्वासकासप्रतिश्यायहिध्माध्मानविबन्धिषु।
स्वरभेदानिलव्याधिश्लेष्मामस्तम्भगौरवे॥25॥
अङ्गमर्दकटीपार्श्वपृष्ठकुक्षिहनुग्रहे।
महत्त्वे मुष्कयोः खल्याम्+आयामे वातकण्टके॥26॥
मूत्रकृच्छ्रार्बुदग्रन्थिशुक्राघाताढ्यमारुते।
स्वेदं यथायथं कुर्यात्+तदौषधविभागतः॥27॥
स्वेदः+ हितः+तु+अनाग्नेयः+ वाते मेदः कफावृते।
निवातं गृहम्+आयासः+ गुरुप्रावरणं भयम्॥28॥

उपनाहाहवक्रोधा भूरिपानं क्षुधा+आतपः॥28 1/2॥
स्नेहक्लिन्नाः कोष्ठगाः+ धातुगाः+ वा
स्रोतोलीनां ये च शाखास्थिसंस्थाः।
दोषाः स्वेदैः+ते द्रवीकृत्य कोष्ठं
नीताः सम्यक् शुद्धिभिः+निर्ह्रियन्ते॥29॥
इति श्रीवैद्यपतिसिंहगुप्तसूनुश्रीमद्वाग्भटविरचितायाम्+अष्टाङ्गहृदयसंहितायां सूत्रस्थाने स्वेदविधिः+नाम सप्तदशः+अध्यायः॥17॥

अष्टादशः+अध्यायः

अथः+अतः+ वमनविरेचनविधिम्+अध्यायं व्याख्यास्यामः।
इति ह स्म+आहुः+आत्रेयादयः+ महर्षयः॥
कफे विदध्यात्+वमनं संयोगे वा कफोल्बणे।
तद्वत्+विरेचनं पित्ते विशेषेण तु वामयेत्॥1॥
नवज्वरातिसाराधःपित्तासृग्राजयक्ष्मिणः।
कुष्ठमेहापचीग्रन्थिश्लीपदोन्मादकासिनः॥2॥
श्वासहृल्लासवीसर्पस्तन्यदोषोर्ध्वरोगिणः।
अवाम्या गर्भिणी रूक्षः क्षुधितः+ नित्यदुःखितः॥3॥
बालवृद्धकृशस्थूलहृद्रोगिक्षतदुर्बलाः।
प्रसक्तवमथुप्लीहतिमिरक्रिमिकोष्ठिनः॥4॥
ऊर्ध्वप्रवृत्तवाय्वस्रदत्तबस्तिहतस्वराः।
मूत्राघाति+उदरी गुल्मी दुर्वमः+अत्यग्निः+अर्शसः॥5॥
उदावर्तभ्रमाष्ठीलापार्श्वरुग्वातरोगिणः।
ऋते विषगराजीर्णविरुद्धाभ्यवहारतः॥6॥
प्रसक्तवमथोः पूर्वे प्रायेण+आमज्वरः+अपि च।
धूमान्तैः कर्मभिः+वर्ज्याः सर्वैः+एव तु+अजीर्णिनः॥7॥
विरेकसाध्या गुल्मार्शोविस्फोटव्यङ्गकामलाः।
जीर्णज्वरोदरगरच्छर्दिप्लीहहलीमकाः॥8॥
विद्रधिः+तिमिरं काचः स्यन्दः पक्वाशयव्यथा।
योनिशुक्राश्रयाः+ रोगाः कोष्ठगाः कृमयः+ व्रणाः॥9॥
वातास्रम्+ऊर्ध्वगं रक्तं मूत्राघातः शकृत्+ग्रहः।
वाम्याः+च कुष्ठमेहाद्याः न तु रेच्यः+ नवज्वरी॥10॥
अल्पाग्न्यधोगपित्तास्रक्षतपाय्वतिसारिणः।
सशल्यास्थापितक्रूरकोष्ठातिस्निग्धशोषिणः॥11॥

अथ साधारणे काले स्निग्धस्विन्नं यथाविधि।
श्वः+वम्यम्+उत्क्लिष्टकफं मत्स्यमाषतिलादिभिः॥12॥
निशां सुप्तं सुजीर्णान्नं पूर्वाह्णे कृतमङ्गलम्।
निरन्नम्+ईषत्+स्निग्धं वा पेयया पीतसर्पिषम्॥13॥
वृद्धबालाबलक्लीबभीरून् रोगानुरोधतः।
आकण्ठं पायितान्+मद्यं क्षीरम्+इक्षुरसं रसम्॥14॥
यथाविकारविहितां मधुसैन्धवसंयुताम्।
कोष्ठं विभज्य भैषज्यमात्रां मन्त्राभिमन्त्रिताम्।15॥
"ब्रह्मदक्षाश्विरुद्रेन्द्रभूचन्द्रार्कानिलानलाः।
ऋषयः सौषधिग्रामा भूतसङ्घाः+च पान्तु वः॥16॥
रसायनम्+इव+ऋषीणाम्+अमराणाम्+इव+अमृतम्।
सुधा+इव+उत्तमनागानां भैषज्यम्+इदम्+अस्तु ते॥17॥
ॐनमः+ भगवते भैषज्यगुरवे वैडूर्यप्रभराजाय।
तथा+आगताया+अर्हते सम्यक्+सम्बुद्धाय। तत्+यथा।
ॐभैषज्ये भैषज्ये महाभैषज्ये समुद्गते स्वाहा॥"
प्राङ्मुखं पाययेत् पीतः+ मुहूर्त्तम्+अनुपालयेत्।
तन्मनाः जातहृल्लासप्रसेकः+छर्दयेत्+ततः॥18॥
अङ्गुलिभ्याम्+अनायस्तः+ नालेन मृदुना+अथवा॥
गलताल्वरुजन् वेगान्+अप्रवृत्तान् प्रवर्तयन्॥19॥
प्रवर्त्तयन् प्रवृत्तान्+च जानुतुल्यासने स्थितः।
उभे पार्श्वे ललाटे च वमतः+च+अस्य धारयेत्॥20॥
प्रपीडयेत्+तथा नाभिं पृष्ठं च प्रतिलोमतः।
कफे तीक्ष्णोष्णकटुकैः पित्ते स्वादुहिमैः+इति॥21॥
वमेत् स्निग्धाम्ललवणैः संसृष्टे मरुता कफे।
पित्तस्य दर्शनं यावत्+छेदः+ वा श्लेष्मणः+ भवेत्॥22॥
हीनवेगः कणाधात्रीसिद्धार्थलवणोदकैः।
वमेत्+पुनः पुनः तत्र वेगानाम्+अप्रवर्तनम्॥23॥
प्रवृत्तिः सविबन्धा वा केवलस्य+ओषधस्य वा।
अयोगः+तेन निष्ठीवकण्डूकोठज्वरादयः॥24॥
निर्विबन्धं प्रवर्तन्ते कफपित्तानिलाः क्रमात्।
(मनःप्रसादः स्वास्थ्यं च+अवस्थानं च स्वयं भवेत्।
वैपरीत्यम्+अयोगानां न च+अतिमहती व्यथा॥१॥)

सम्यक्+योगे अतियोगे तु फेनचन्द्रकरक्तवत्॥25॥

वमितं क्षामता दाहः कण्ठशोषः+तमः+ भ्रमः।

घोरा वाय्वामया मृत्युः+जीवशोणितनिर्गमात्॥26॥

सम्यक्+योगेन वमितं क्षणम्+आश्वास्य पाययेत्।

धूमत्रयस्य+अन्यतमं स्नेहाचारम्+अथ+आदिशेत्॥27॥

ततः सायं प्रभाते वा क्षुद्वान् स्नातः सुखाम्बुना।

भुञ्जानः+ रक्तशाल्यन्नं भजेत्+पेयादिकं क्रमम्॥28

पेयां विलेपीम्+अकृतं कृतं च यूषं रसं त्रीन्+उभयं तथा+एकम्।

क्रमेण सेवेत नरः+अन्नकालान् प्रधानमध्यावरशुद्धिशुद्धः॥29॥

यथा+अणुः+अग्निः+तृणगोमयाद्यैः सन्धुक्ष्यमाणः+ भवति क्रमेण।

महान् स्थिरः सर्वपचः+तथा+एव शुद्धस्य पेयादिभिः+अन्तराग्निः॥30॥

जघन्यमध्यप्रवरे तु वेगाः+चत्वारः+ इष्टा वमने षडष्टौ।

दश+एव ते द्वित्रिगुणाः+ विरेके प्रस्थः+तथा स्यात्+ द्विचतुर्गुणः+च॥31॥

पित्तावसानं वमनं विरेकात्+अर्द्धं कफान्तं च विरेकम्+आहुः।

द्वित्रान् सविट्कान्+अपनीय वेगान् मेयं विरेके वमने तु पीतम्॥32॥

अथ+एनं वामितं भूयः स्नेहस्वेदोपपादितम्।

श्लेष्मकाले गते ज्ञात्वा कोष्ठं सम्यक्+विरेचयेत्॥33॥

बहुपित्तः+ मृदुः कोष्ठः क्षीरेण+अपि विरिच्यते।

प्रभूतमारुतः क्रूरः कृच्छ्राच्छ्यामादिकैः+अपि॥34॥

कषायमधुरैः पित्ते विरेकः कटुकैः कफे।

स्निग्धोष्णलवणैः+वायौ+अप्रवृत्तौ तु पाययेत्॥35॥

उष्णाम्बुः+ स्वेदयेत्+अस्य पाणितापेन च+उदरम्।

उत्थाने+अल्पे दिने तस्मिन्+भुक्त्वा+अन्येद्युः पुनः पिबेत्॥36॥

अदृढस्नेहकोष्ठः+तु पिबेत्+ऊर्ध्वं दशाहतः।

भूयः+अपि+उपस्कृततनुः स्नेहस्वेदैः+विरेचनम्॥37॥

यौगिकं सम्यक्+आलोच्य स्मरन्+पूर्वम्+अनुक्रमम्।

हृत्कुक्ष्यशुद्धिः+अरुचिः+उत्क्लेशः श्लेष्मपित्तयोः॥38॥

कण्डूः+विदाहः पिटिकाः पीनसः+ वातविड्ग्रहः।

अयोगलक्षणं योगः+ वैपरीत्ये यथा+उदितात्॥39॥

विट्पित्तकफवातेषु निःसृतेषु क्रमात्+स्रवेत्।

निःश्लेष्मपित्तम्+उदकं श्वेतं कृष्णं सलोहितम्॥40॥

मांसधावनतुल्यं वा मेदःखण्डाभम्+एव वा।

गुदनिःसरणं तृष्णा भ्रमः+ नेत्रप्रवेशनम्॥41॥
भवन्ति+अतिविरिक्तस्य तथा+अतिवमनामयाः।
सम्यक्+विरिक्तम्+एनं च वमना+उक्तेन योजयेत्॥42॥
धूमवर्ज्येन विधिना ततः+ वमितवान्+इव।
क्रमेण+अन्नानि भुञ्जानः+ भजेत्+प्रकृतिभोजनम्॥43॥
मन्दवह्निम्+असंशुद्धम्+अक्षामं दोषदुर्बलम्।
अदृष्टजीर्णलिङ्गं च लङ्घयेत्+पीतभेषजम्॥44॥
स्नेहस्वेदौषधोत्क्लेशसङ्गैः+इति न बाध्यते।
संशोधनास्रविस्रावस्नेहयोजनलङ्घनैः॥45॥
याति+अग्निः+मन्दतां तस्मात् क्रमं पेयादिम्+आचरेत्।
स्रुताल्पपित्तश्लेष्माणं मद्यपं वातपैत्तिकम्॥46॥
पेयां न पाययेत्+तेषां तर्पणादिक्रमः+ हितः।
अपक्वं वमनं दोषान् पच्यमानं विरेचनम्॥47॥
निर्हरेत्+वमनस्य+अतः पाकं न प्रतिपालयेत्।
दुर्बलः+ बहुदोषः+च दोषपाकेन यः स्वयम्॥48॥
विरिच्यते भेदनीयैः+भोज्यैः+तम्+उपपादयेत्।
दुर्बलः शोधितः पूर्वम्+अल्पदोषः कृशः+ नरः॥49॥
अपरिज्ञातकोष्ठः+च पिबेत्+मृद्वल्पम्+औषधम्।
वरं तत्+असकृत्+पीतम्+अन्यथा संशयावहम्॥50॥
हरेत्+बहून्+चलान् दोषान्+अल्पानल्पान् पुनः पुनः।
दुर्बलस्य मृदुद्रव्यैः+अल्पान् संशमयेत्+तु तान्॥51॥
क्लेशयन्ति चिरं ते हि हन्युः+वा+एनम्+अनिर्हृताः।
मन्दाग्निं क्रूरकोष्ठं च सक्षारलवणैः+धृतैः॥52॥
सन्धुक्षिताग्निं विजितकफवातं च शोधयेत्।
रूक्षबह्वनिलक्रूरकोष्ठव्यायामशीलिनाम्॥53॥
दीप्ताग्नीनां च भैषज्यम्+अविरेच्य+एव जीर्यति।
तेभ्यः+ बस्तिं पुरा दद्यात्+ततः स्निग्धं विरेचनम्॥54॥
शकृत्+निर्हृत्य वा किञ्चित्+तीक्ष्णाभिः फलवर्तिभिः।
प्रवृत्तं हि मलं स्निग्धः+ विरेकः+ निर्हरेत्+सुखम्॥55॥
विषाभिघातपिटिकाकुष्ठशोफविसर्पिणः।
कामलापाण्डुमेहार्तान्+न+अतिस्निग्धान् विशोधयेत्॥56॥
सर्वान् स्नेहविरेकैः+च रूक्षैः+तु स्नेहभावितान्।

कर्मणां वमनादीनां पुनः+अपि+अन्तरे+अन्तरे॥57॥

स्नेहस्वेदौ प्रयुञ्जीत स्नेहम्+अन्ते बलाय च।

मलः+ हि देहात्+उत्क्लेश्य ह्रियते वाससः+ यथा॥58॥

स्नेहस्वेदैः+तथा+उत्क्लिष्टः शोध्यते शोधनैर्मलः।

स्नेहस्वेदौ+अनभ्यस्य कुर्यात्+संशोधनं तु यः॥59॥

दारु शुष्कम्+इव+आनामे शरीरं तस्य दीर्यते॥59 1/2॥

बुद्धिप्रसादं बलम्+इन्द्रियाणां

धातुस्थिरत्वं ज्वलनस्य दीप्तिम्।

चिरात्+च पाकं वयसः करोति।

संशोधनं सम्यक्+उपास्यमानम्॥60॥

इति श्रीवैद्यपतिसिंहगुप्तसूनुश्रीमद्वाग्भटविरचितायाम्+अष्टाङ्गहृदयसंहितायां सूत्रस्थाने वमनविरेचनविधिः+नाम+अष्टादशः+अध्यायः॥18॥

एकोनविंशः+अध्यायः

अथ+अतः+ बस्तिविधिम्+अध्यायं व्याख्यास्यामः।

इति ह स्म+आहुः+आत्रेयादयः+ महर्षयः।

वातोल्बणेषु दोषेषु वाते वा बस्तिः+इष्यते।

उपक्रमणां सर्वेषां सः+अग्रणीः+त्रिविधः+तु सः॥1॥

निरूहः+अन्वासनं बस्तिः+उत्तरः+तेन साधयेत्।

गुल्मानाहखुडप्लीहशुद्धातीसारशूलिनः॥2॥

जीर्णज्वरप्रतिश्यायशुक्रानिलमलग्रहान्।

बध्मार्श्मरीरजोनाशान् दारुणान्+च+अनिलामयान्॥3॥

अनास्थाप्यः+तु+अतिस्निग्धः क्षतोरस्कः+ भृशं कृशः।

आमातिसारी वमिमान् संशुद्धः+ दत्तनावनः॥4॥

श्वासकासप्रसेकार्शोहिध्माध्मानाल्पवह्नयः।

शूनपायुः कृताहारः+ बद्धच्छिद्रोदकोदरी॥5॥

कुष्ठी च मधुमेही च मासान् सप्त च गर्भिणी।

आस्थाप्याः+ एव च+अन्वास्या विशेषात्+अतिवह्नयः॥6॥

रूक्षाः केवलवातार्ताः न+अनुवास्याः+ते एव च।

ये+अनास्थाप्याः+तथा पाण्डुकामलामेहपीनसाः॥7॥

निरन्नप्लीहविड्भेदिगुरुकोष्ठकफोदराः।

अभिष्यन्दिभृशस्थूलकृमिकोष्ठाढ्यमारुताः॥8॥

पीते विषे गरे+अपच्यां श्लीपदी गलगण्डवान्।

तयोः+तु नेत्रं हेमादिधातुदार्वस्थिवेणुजम्॥9॥
गोपुच्छाकारम्+अच्छिद्रं श्लक्ष्णर्जु गुलिकामुखम्।
ऊने+अब्दे पञ्च पूर्णे+अस्मिन्+आसप्तभ्यः+अङ्गुलानि षट्॥10॥
सप्तमे सप्त तानि+अष्टौ द्वादशे षोडशे नव।
द्वादश+एव परं विंशात्+वीक्ष्य वर्षान्तरेषु च॥11॥
वयोबलशरीराणि प्रमाणम्+अभिवर्द्धयेत्।
स्वाङ्गुष्ठेन समं मूले स्थौल्येन+अग्रे कनिष्ठया॥12॥
पूर्णे+अब्दे+अङ्गुलम्+आदाय तदर्द्धार्द्धप्रवर्द्धितम्।
त्र्यङ्गुलं परमं छिद्रं मूले+अग्रे वहते तु यत्॥13॥
मुद्गं माषं कलायं च क्लिन्नं कर्कन्धुकं क्रमात्।
मूलच्छिद्रप्रमाणेन प्रान्ते घटितकर्णिकम्॥14॥
वर्त्या+अग्रे पिहितं मूले यथास्वं द्व्यङ्गुलान्तरम्।
कर्णिकाद्वितयं नेत्रे कुर्यात् तत्र च योजयेत्॥15॥
अजाविमहिषादीनां बस्तिं सुमृदितं दृढम्।
कषायरक्तं निश्छिद्रग्रन्थिगन्धशिरं तनुम्॥16॥
ग्रथितं साधु सूत्रेण सुखसंस्थाप्यभेषजम्।
बस्त्यभावे+अङ्कपादं वा न्यसेत्+वासः+अथवा घनम्॥17॥
निरूहमात्रा प्रथमे प्रकुञ्चः+ वत्सरे परम्।
प्रकुञ्चवृद्धिः प्रत्यब्दं यावत्+षट् प्रसृताः+ततः॥18॥
प्रसृतं वर्द्धयेत्+ऊर्ध्वं द्वादशाष्टादशस्य तु।
आसप्ततेः+इदं मानं दश+एव प्रसृताः परम्॥19॥
यथायथं निरूहस्य पादः+ मात्रा+अनुवासने।
आस्थाप्यं स्नेहितं स्विन्नं शुद्धं लब्धबलं पुनः॥20॥
अन्वासनार्हं विज्ञाय पूर्वम्+एव+अनुवासयेत्।
शीते वसन्ते च दिवा रात्रौ केचित्+ततः+अन्यदा॥21॥
अभ्यक्तस्नातम्+उचितात्+पादहीनं हितं लघु।
अस्निग्धरूक्षम्+अशितं सानुपानं द्रवादि च॥22॥
कृतचङ्क्रमणं मुक्तविण्मूत्रं शयने सुखे।
न+अत्युच्छ्रिते न च+उच्छीर्षे संविष्टं वामपार्श्वतः॥23॥
सङ्कोच्य दक्षिणं सक्थि प्रसार्य च ततः+अपरम्।
अथ+अस्य नेत्रं प्रणयेत्+स्निग्धे स्निग्धमुखं गुदे॥24॥
उच्छ्वास्य बस्तेः+वदने बद्धे हस्तम्+अकम्पयन्।

पृष्ठवंशं प्रति ततः+ न+अतिद्रुतविलम्बितम्॥25॥

न+अतिवेगं न वा मन्दं सकृत्+एव प्रपीडयेत्।

सावशेषं च कुर्वीत वायुः शेषे हि तिष्ठति॥26॥

दत्ते तु+उत्तानदेहस्य पाणिना ताडयेत्+स्फिजौ।

तत्पार्ष्णिभ्यां तथा शय्यां पादतः+च त्रिः+उत्क्षिपेत्॥27॥

ततः प्रसारिताङ्गस्य सोपधानस्य पार्ष्णिके।

आहन्यात्+मुष्टिना+अङ्गं च स्नेहेन+अभ्यज्य मर्दयेत्॥28॥

वेदनार्तम्+इति स्नेहः+ न हि शीघ्रं निवर्तते।

योज्यः शीघ्रं निवृत्ते+अन्यः स्नेहः+अतिष्ठन्+अकार्यकृत्॥29॥

दीप्ताग्निं तु+आगतस्नेहं सायाह्ने भोजयेत्+लघु।

निवृत्तिकालः परमः+त्रयः+ यामाः+ततः परम्॥30॥

अहोरात्रम्+उपेक्षेत परतः फलवर्तिभिः।

तीक्ष्णैः+वा बस्तिभिः कुर्यात्+यत्नं स्नेहनिवृत्तये॥31॥

अतिरौक्ष्यात्+अनागच्छत्+न चेत्+जाड्यादिदोषकृत्।

उपेक्षेत+एव हि ततः+अध्युषितः+च निशां पिबेत्।

प्रातः+नागरधान्याम्भः कोष्णं केवलम्+एव वा।

अन्वासयेत्+तृतीये+अह्नि पञ्चमे वा पुनः+च तम्॥33॥

यथा वा स्नेहपक्तिः स्यात्+अतः+अत्युल्बणमारुतान्।

व्यायामनित्यान् दीप्ताग्नीन् रूक्षान्+च प्रतिवासरम्॥34॥

इति स्नेहैः+त्रिचतुरैः स्निग्धे स्रोतोविशुद्धये।

निरूहं शोधनं युञ्ज्यात्+अस्निग्धे स्नेहनं तनोः॥35॥

पञ्चमे+अथ तृतीये वा दिवसे साधके शुभे।

मध्याह्ने किञ्चित्+आवृत्ते प्रयुक्ते बलिमङ्गले॥36॥

अभ्यक्तस्वेदितोत्सृष्टमलं न+अतिबुभुक्षितम्।

अवेक्ष्य पुरुषं दोषभेषजादीनि च+आदरात्॥37॥

बस्तिं प्रकल्पयेत्+वैद्यः+तद्विद्यैः+बहुभिः सह।

क्वाथयेत्+विंशतिपलं द्रव्यस्य+अष्टौ फलानि च॥37॥

ततः क्वाथात्+चतुर्थांशं स्नेहं वाते प्रकल्पयेत्।

पित्ते स्वस्थे च षष्ठांशम्+अष्टमांशं कफे+अधिके॥39॥

सर्वत्र च+अष्टमं भागं कल्कात्+भवति वा यथा।

न+अत्यच्छसान्द्रता बस्तेः पलमात्रं गुडस्य च॥40॥

मधुपद्मादिशेषं च युक्त्या सर्वं तदेकतः।

उष्णाम्बुकुम्भीबाष्पेण तप्तं खजसमाहतम्॥41॥
प्रक्षिप्य बस्तौ प्रणयेत्+पायौ न+अत्युष्णशीतलम्।
न+अतिस्निग्धं न वा रूक्षं न+अतितीक्ष्णं न वा मृदु॥42॥
न+अत्यच्छसान्द्रं न+ऊनातिमात्रं न+अपटु न+अति च।
लवणं तद्वदम्लं च पठन्ति+अन्ये तु तद्विदः॥43॥
मात्रां त्रिपलिकां कुर्यात्+स्नेहमाक्षिकयोः पृथक्।
कर्षार्द्धं माणिमन्थस्य स्वस्थे कल्कपलद्वयम्॥44॥
सर्वद्रवाणां शेषाणां पलानि दश कल्पयेत्।
माक्षिकं लवणं स्नेहं कल्कं क्वाथम्+इति क्रमात्॥45॥
आवपेत निरूहाणाम्+एष संयोजने विधिः।
उत्तानः+ दत्तमात्रे तु निरूहे तन्मना भवेत्॥46॥
कृतोपधानः सञ्जातवेगः+च+उत्कटकः सृजेत्।
आगतौ परमः कालः+ मुहूर्त्तः+ मृत्यवे परम्॥47॥
तत्र+आनुलोमिकं स्नेहक्षारमूत्राम्लकल्पितम्।
त्वरितं स्निग्धतीक्ष्णोष्णं बस्तिम्+अन्यं प्रपीडयेत्॥48॥
विदद्यात्+फलवर्तिं वा स्वेदनोत्रासनादि च।
स्वयम्+एव निवृत्ते तु द्वितीयः+ बस्तिः+इष्यते॥49॥
तृतीयः+अपि चतुर्थः+अपि यावत्+वा सुनिरूढता।
विरिक्तवत्+च योगादीन्+विद्यात् योगे तु भोजयेत्॥50॥
कोष्णेन वारिणा स्नातं तनुधन्वरसौदनम्।
विकाराः+ ये निरूढस्य भवन्ति प्रचलैः+मलैः॥51॥
ते सुखोष्णाम्बुसिक्तस्य यान्ति भुक्तवतः शमम्।
अथ वातार्दितं भूयः सद्यः+ एव+अनुवासयेत्॥52॥
सम्यक्+धीनातियोगाः+च तस्य स्युः स्नेहपीतवत्।
किञ्चित्+कालं स्थितः+ यः+च सपुरीषः+ निवर्तते॥53॥
सानुलोमानिलः स्नेहः+तत्सिद्धम्+अनुवासनम्।
एकं त्रीन् वा बलासे तु स्नेहबस्तीन् प्रकल्पयेत्॥54॥
पञ्च वा सप्त वा पित्ते नव+एकादश वा+अनिले।
पुनः+ततः+अपि+अयुग्मान्+तु पुनः+आस्थापनं ततः॥55॥
कफपित्तानिलेषु+अन्नं यूषक्षीररसैः क्रमात्।
वातघ्नौषधनिष्क्वाथत्रिवृतासैन्धवैः+युतः॥56॥
बस्तिः+एकः+अनिले स्निग्धः स्वाद्वम्लोष्णः+ रसान्वितः।

न्यग्रोधादिगणक्वाथपद्मकादिसितायुतौ॥57॥
पित्ते स्वादुहिमौ साज्यक्षीरेक्षुरसमाक्षिकौ।
आरग्वधादिनिष्क्वाथवत्सकादियुताः+त्रयः॥58॥
रूक्षाः सक्षौद्रगोमूत्राः+तीक्ष्णोष्णकटुकाः कफे।
त्रयः+ते सन्निपाते+अपि दोषान् घ्नन्ति यतः क्रमात्॥59॥
त्रिभ्यः परं बस्तिम्+अतः+ न+इच्छन्ति+अन्ये चिकित्सकाः।
न हि दोषः+चतुर्थः+अस्ति पुनः+दीयेत यं प्रति॥60॥
उत्क्लेशनं शुद्धिकरं दोषाणां शमनं क्रमात्।
त्रिधा+एव कल्पयेत्+वस्तिम्+इति+अन्ये+अपि प्रचक्षते॥61॥
दोषौषधादिबलतः सर्वम्+एतत्+प्रमाणयेत्।
सम्यक्+निरूढलिङ्गं तु न+असम्भाव्य निवर्तयेत्॥62॥
प्राक्स्नेहः+ एकः पञ्चान्ते द्वादशास्थापनानि च।
सान्वासनानि कर्म+एवं बस्तियः+त्रिंशत्+ईरिताः॥63॥
कालः पञ्चदशैकः+अत्र प्राक् स्नेहः+अन्ते त्रयः+तथा।
षट् पञ्चबस्त्यन्तरिताः योगः+अष्टौ बस्तयः+अत्र तु॥64॥
त्रयः+ निरूहाः स्नेहाः+च स्नेहौ+आद्यन्तयोः+उभौ।
स्नेहबस्तिं निरूहं वा न+एकम्+एव+अति शीलयेत्॥65॥
उत्क्लेशाग्निवधौ स्नेहात्+निरूहात्+मरुतः+ भयम्।
तस्मात्+निरूढः स्नेह्यः स्यात्+निरूह्यः+च+अनुवासितः॥66॥
स्नेहशोधनयुक्त्या+एवं बस्तिकर्म त्रिदोषजित्।
ह्रस्वया स्नेहपानस्य मात्रया योजितः समः॥67॥
मात्राबस्तिः स्मृतः स्नेहः शीलनीयः सदा च सः।
बालवृद्धाध्वभारस्त्रीव्ययामासक्तचिन्तकैः॥68॥
वातभग्नाबलाल्पाग्निनृपेश्वरसुखात्मभिः।
दोषघ्नः+ निष्परीहारः+ बल्यः सृष्टमलः सुखः॥69॥
बस्तौ रोगेषु नारीणां योनिगर्भाशयेषु च।
द्वित्रास्थापनशुद्धेभ्यः+ विदध्यात्+वस्तिम्+उत्तरम्॥70॥
आतुराङ्गुलमानेन तत्+नेत्रं द्वादशाङ्गुलम्।
वृत्तं गोपुच्छवत्+मूलमध्ययोः कृतकर्णिकम्॥71॥
सिद्धार्थकप्रवेशाग्रं श्लक्ष्णं हेमादिसम्भवम्।
कुन्दाश्वमारसुमनः पुष्पवृन्तोपमं दृढम्॥72॥
तस्य बस्तिः+मृदुलघुः+मात्रा शुक्तिः+विकल्प्य वा।

अथ स्नाताशितस्य+अस्य स्नेहबस्तिविधानतः॥73॥
ऋजोः सुखोपविष्टस्य पीठे जानुसमे मृदौ।
हृष्टे मेढ्रे स्थिते च+ऋजौ शनैः स्रोतोविशुद्धये॥74॥
सूक्ष्मां शलाकां प्रणयेत्+तया शुद्धे+अनुसेवनि।
आमेहनान्तं नेत्रं च निष्कम्पं गुदवत्+ततः॥75॥
पीडिते+अन्तर्गते स्नेहे स्नेहबस्तिक्रमः+ हितः।
बस्तीन्+अनेन विधिना दद्यात् त्रीन्+चतुरः+अपि वा॥76॥
अनुवासनवत्+शेषं सर्वम्+एव+अस्य चिन्तयेत्।
स्त्रीणाम्+आर्तवकाले तु योनिः+गृह्णाति+अपावृतेः॥77॥
विदधीत तदा तस्मात्+अनृतौ+अपि च+अत्यये।
योनिविभ्रंशशूलेषु योनिव्यापद्यसृग्दरे॥78॥
नेत्रं दशाङ्गुलं मुद्गप्रवेशं चतुरङ्गुलम्।
अपत्यमार्गे योज्यं स्यात्+ द्व्यङ्गुलं मूत्रवर्त्मनि॥79॥
मूत्रकृच्छ्रविकारेषु बालानां तु+एकम्+अङ्गुलम्।
प्रकुञ्चः+ मध्यमा मात्रा बालानां शुक्तिः+एव तु॥80॥
उत्तानायाः शयानायाः सम्यक् सङ्कोच्य सक्थिनी।
ऊर्ध्वजान्वाः+त्रिचतुरान्+अहोरात्रेण योजयेत्॥81॥
बस्तीन्+त्रिरात्रम्+एवं च स्नेहमात्रां विवर्द्धयन्।
त्र्यहम्+एव च विश्रम्य प्रणिदध्यात्+पुनः+त्र्यहम्॥82॥
पक्षात्+विरेकः+ वमिते ततः पक्षात्+निरूहणम्।
सद्यः+ निरूढः+च+अन्वास्यः सप्तरात्रात्+विरेचितः॥83॥
यथा कुसुम्भादियुतात्+तोयात्+रागं हरेत्+पटः।
तथा द्रवीकृतात्+देहात्+बस्तिः+निर्हरते मलान्॥84॥
शाखागताः कोष्ठगताः+च रोगाः+ मर्मोर्ध्वसर्वावयवाङ्गजाः+च।
ये सन्ति तेषां न तु कश्चित्+अन्यः+ वायोः परं जन्मनि हेतुः+अस्ति॥85॥
विट्श्लेष्मपित्तादिमलोच्चयानां विक्षेपसंहारकरः सः+ यस्मात्।
तस्य+अतिवृद्धस्य शमाय न+अन्यत्+वस्तेः+विना भेषजम्+अस्ति किञ्चित्॥86॥
तस्मात्+चिकित्सार्धः+ इति प्रदिष्टः कृत्स्ना चिकित्सा+अपि च बस्तिः+एकैः।
तथा निजागन्तुविकारकारिरक्तौषधत्वेन शिराव्यधः+अपि॥87॥
इति श्रीवैद्यपतिसिंहगुप्तसूनुश्रीमद्वाग्भटविरचितायाम्+अष्टाङ्गहृदसंहितायां सूत्रस्थाने बस्तिविधिः+नाम+एकोनविंशतितमः+अध्यायः॥19॥

## विंशः+अध्यायः

अथ+अतः+ नस्यविधिम्+अध्यायं व्याख्यास्यामः।
इति ह स्म+आहुः+आत्रेयादयः+ महर्षयः।
ऊर्ध्वजत्रुविकारेषु विशेषात्+नस्यम्+इष्यते।
नासा हि शिरसः+ द्वारं तेन तद्व्याप्य हन्ति तान्॥1॥
विरेचनं बृंहणं च शमनं च त्रिधा+अपि तत्।
विरेचनं शिरःशूलजाड्यस्यन्दगलामये॥2॥
शोफगण्डकृमिग्रन्थिकुष्ठापस्मारपीनसे।
बृंहणं वातजे शूले सूर्यावर्ते स्वरक्षये॥3॥
नासास्यशोषे वाक्सङ्गे कृच्छ्रबोधे+अवबाहुके।
शमनं नीलिकाव्यङ्गकेशदोषाक्षिराजिषु॥4॥
यथास्वं यौगिकैः स्नेहैः+यथास्वं च प्रसाधितैः।
कल्कक्वाथादिभिः+च+आद्यं मधुपद्वासवैः+अपि॥5॥
बृंहणं धन्वमांसोत्थरसासृक्खपुरैः+अपि।
शमनं योजयेत्+पूर्वैः क्षीरेण सलिलेन वा॥6॥
मर्शः+च प्रतिमर्शः+च द्विधा स्नेहः+अत्र मात्रया।
कल्काद्यैः+अवपीडः+तु सः+ तीक्ष्णैः+मूर्द्धरेचनः॥7॥
ध्मानं विरेचनः+चूर्णः+ युञ्ज्यात्+तं मुखवायुना।
षडङ्गुलद्विमुखया नाड्या भेषजगर्भया॥8॥
सः+ हि भूरितरं दोषं चूर्णत्वात्+अपकर्षति।
प्रदेशिन्यङ्गुलीपर्वद्वयात्+मग्नसमुद्धृतात्॥9॥
यावत्+पतति+असौ बिन्दुः+दशाष्टौ षट् क्रमेण ते।
मर्शस्य+उत्कृष्टमध्योना मात्राः+ताः+ एव च क्रमात्॥10॥
बिन्दुद्वयोनाः कल्कादेः योजयेत्+न तु नावनम्।
तोयमद्यगरस्नेहपीतानां पातुम्+इच्छताम्॥11॥
भुक्तभक्तशिरःस्नातस्नातुकामस्रुतासृजाम्।
नवपीनसवेगार्तसूतिकाश्वासकासिनाम्॥12॥
शुद्धानां दत्तबस्तीनां तथा+अनार्तवदुर्दिने।
अन्यत्र+आत्ययिकात्+व्याधेः अथ नस्यं प्रयोजयेत्॥13॥
प्रातः श्लेष्मणि मध्याह्ने पित्ते सायंनिशोः+चले।
स्वस्थवृत्ते तु पूर्वाह्णे शरत्कालवसन्तयोः।14॥
शीते मध्यन्दिने ग्रीष्मे सायं वर्षासु सातपे।
वाताभिभूते शिरसि हिध्मायाम्+अपतानके॥15॥

मन्यास्तम्भे स्वरभ्रंशे सायंप्रातः+दिने दिने।
एकाहान्तरम्+अन्यत्र सप्ताहं च तत्+आचरेत्॥16॥
स्निग्धस्विन्नोत्तमाङ्गस्य प्राक्कृतावश्यकस्य च।
निवातशयनस्थस्य जत्रूर्ध्वं स्वेदयेत् पुनः॥17॥
अथ+उत्तानर्जुदेहस्य पाणिपादे प्रसारिते।
किञ्चित्+उन्नतपादस्य किञ्चित्+मूर्द्धनि नामिते॥18॥
नासापुटं पिधाय+एकं पर्यायेण निषेचयेत्।
उष्णाम्बुतप्तं भैषज्यं प्रणाड्या पिचुना+अथवा॥19॥
दत्ते पादतलस्कन्धहस्तकर्णादि मर्दयेत्।
शनैः+उच्छिंघ्य निष्ठीवेत्+पार्श्वयोः+उभयोः+ततः॥20॥
आभेषजक्षयात्+एवं द्विः+त्रिः+वा नस्यम्+आचरेत्।
मूर्च्छायां शीततोयेन सिञ्चेत्+परिहरन् शिरः॥21॥
स्नेहं विरेचनस्य+अन्ते दद्यात्+दोषाद्यपेक्षया।
नस्यान्ते वाक्शतं तिष्ठेत्+उत्तानः धारयेत्+ततः॥22॥
धूमं पीत्वा कवोष्णाम्बुकवलान् कण्ठशुद्धये।
सम्यक्+स्निग्धे सुखोच्छ्वासस्वप्नबोधाक्षपाटवम्॥23॥
रूक्षे+अक्षिस्तब्धता शोषः+ नासास्ये मूर्द्धशून्यता।
स्निग्धे+अपि कण्डूगुरुताप्रसेकारुचिपीनसाः॥24॥
सुविरिक्ते+अक्षिलघुतावक्त्रस्वरविशुद्धयः।
दुर्विरिक्ते गदोद्रेकः क्षामता+अतिविरेचिते॥25॥
प्रतिमर्शः क्षतक्षामबालवृद्धसुखात्मसु।
प्रयोज्यः+अकालवर्षे+अपि न तु+इष्टः+ दुष्टपीनसे॥26॥
मद्यपीते+अबलश्रोत्रे कृमिदूषितमूर्द्धनि।
उत्कृष्टोत्क्लिष्टदोषे च हीनमात्रतया हि सः॥27॥
निशाहर्भुक्तवान्ताहःस्वप्नाध्वश्रमरेतसाम्।
शिरोभ्यञ्जनगण्डूषप्रस्रावाञ्जनवर्चसाम्॥28॥
दन्तकाष्ठस्य हासस्य योज्यः+अन्ते+असौ द्विबिन्दुकः।
पञ्चसु स्रोतसां शुद्धिः क्लमनाशः+त्रिषु क्रमात्॥29॥
दृग्बलं पञ्चसु ततः+ दन्तदार्ढ्यं मरुच्छमः।
न नस्यम्+ऊनसप्ताब्दे न+अतीताशीतिवत्सरे॥30॥
न च+ऊनाष्टादशे धूमः कवलः+ न+ऊनपञ्चमे।
न शुद्धिः+ऊनदशमे न च+अतिक्रान्तसप्ततौ॥31॥

आजन्ममरणं शस्तः प्रतिमर्शः+तु बस्तिवत्।

मर्शवत्+च गुणान् कुर्यात्+सः+ हि नित्योपसेवनात्॥32॥

न च+अत्र यन्त्रणा न+अपि व्यापद्भ्यः+ मर्शवत्+भयम्।

तैलम्+एव च नस्यार्थे नित्याभ्यासेन शस्यते॥33॥

शिरसः श्लेष्मधामत्वात्+स्नेहाः स्वस्थस्य न+इतरे।

आशुकृत्+चिरकारित्वं गुणोत्कर्षापकृष्टता॥34॥

मर्शे च प्रतिमर्शे च विशेषः+ न भवेत्+यदि।

कः+ मर्शं सपरीहारं सापदं च भजेत्+ततः॥35॥

अच्छपानविचाराख्यौ कुटीवातातपस्थिती।

अन्वासमात्रावस्ती च तद्वत्+एव विनिर्दिशेत्॥36॥

जीवन्तीजलदेवदारुजलदत्वक्सेव्यगोपीहिमं

दार्वीत्वङ्मधुकप्लवागुरुवरीपुण्ड्राह्वबिल्वोत्पलम्।

धावन्यौ सुरभिः स्थिरे कृमिहरं पत्रं त्रुटिं रेणुकां

किञ्जल्कं कमलाद्+बलां शतगुणे दिव्ये+अम्भसि क्वाथयेत्॥37॥

तैलात्+रसं दशगुणं परिशेष्य तेन

तैलं पचेत सलिलेन दश+एव वारान्।

पाके क्षिपेत्+च दशमे सममाजदुग्धं

नस्यं महागुणम्+उशन्ति+अणुतैलम्+एतत्॥38॥

घनोन्नतप्रसन्नत्वक्स्कन्धग्रीवास्यवक्षसः।

दृढेन्द्रियास्तपलिता भवेयुः+नस्यशीलिनः॥39॥

इति श्रीवैद्यपतिसिंहगुप्तसूनुश्रीमद्वाग्भटविरचितायाम्+अष्टाङ्गहृदयसंहितायां सूत्रस्थाने नस्यविधिः+नाम विंशः+अध्यायः॥20॥

एकविंशतितमः+अध्यायः

अथ+अतः+ धूमपानविधिम्+अध्यायं व्याख्यास्यामः।

इति ह स्म+आहुः+आत्रेयादयः+ महर्षयः।

जत्रूर्ध्वकफवातोत्थविकाराणाम्+अजन्मने।

उच्छेदाय च जातानां पिबेत्+धूमं सदा+आत्मवान्॥1॥

स्निग्धः+ मध्यः सः+ तीक्ष्णः+च वाते वातकफे कफे।

योज्यः+ न रक्तपित्तार्तिविरिक्तोदरमेहिषु॥2॥

तिमिरोर्ध्वानिलाध्मानरोहिणीदत्तबस्तिषु।

मत्स्यमद्यदधिक्षीरक्षौद्रस्नेहविषाशिषु॥3॥

शिरसि+अभिहते पाण्डुरोगे जागरिते निशि।

रक्तपित्तान्ध्यबाधिर्यतृण्मूर्च्छामदमोहकृत्॥4॥
धूमः+अकाले+अतिपीतः+ वा तत्र शीतः+ विधिः+हितः।
क्षुतजृम्भितविण्मूत्रस्त्रिसेवाशस्त्रकर्मणाम्॥5॥
हासस्य दन्तकाष्ठस्य धूमम्+अन्ते पिबेत्+मृदुम्।
कालेषु+एषु निशाहारनावनान्ते च मध्यमम्॥6॥
निद्रानस्याञ्जनस्नानच्छर्दितान्ते विरेचनम्।
वस्तिनेत्रसमद्रव्यं त्रिकोशं कारयेत्+ऋजु॥7॥
मूलाग्रे+अङ्गुष्ठकोलास्थिप्रवेशं धूमनेत्रकम्।
तीक्ष्मस्नेहनमध्येषु त्रीणि चत्वारि पञ्च च॥8॥
अङ्गुलानां क्रमात्+पातुः प्रमाणेन+अष्टकानि तत्।
ऋजूपविष्टः+तच्चेता विवृतास्यः+त्रिपर्ययम्॥9॥
पिधाय च्छिद्रम्+एकैकं धूमं नासिकया पिबेत्।
प्राक् पिबेत्+नासयोत्क्लिष्टे दोषे घ्राणशिरोगते॥10॥
उत्क्लेशनार्थं वक्त्रेण विपरीतं तु कण्ठगे।
मुखेन+एव+उद्वमेत्+धूमं नासया दृग्विघातकृत्॥11॥
आक्षेपमोक्षैः पातव्यः+ धूमः+तु त्रिः+त्रिभिः+त्रिभिः।
अह्नः पिबेत्+सकृत् स्निग्धं द्विः+मध्यं शोधनं परम्॥12॥
त्रिः+चतुः+वा मृदौ तत्र द्रव्याणि+अगुरुगुग्गुलु।
मुस्तस्थौणेयशैलेयनलदोशीरवालकम्॥13॥
वराङ्गकौन्तीमधुकबिल्वमज्जैलवालुकम्।
श्रीवेष्टकं सर्जरसः+ ध्यामकं मदनं प्लवम्॥14॥
शल्लकी कुङ्कुमं माषाः+ यवाः कुन्दुरुकः+तिलाः।
स्नेहः फलानां साराणां मेदः+ मज्जा वसा घृतम्॥15॥
शमने शल्लकी लाक्षा पृथ्वीका कमलोत्पलम्।
न्यग्रोधोदुम्बराश्वत्थप्लक्षरोध्रत्वचः सिता॥16॥
यष्टीमधुः सुवर्णत्वक् पद्मकं रक्तयष्टिका।
गन्धाः+च+अकुष्ठतगराः तीक्ष्णे ज्योतिष्मती निशा॥17॥
दशमूलमनोह्वालं लाक्षा श्वेता फलत्रयम्।
गन्धद्रव्याणि तीक्ष्णानि गणः+ मूर्द्धविरेचनः॥18॥
जले स्थिताम्+अहोरात्रम्+इषीकां द्वादशाङ्गुलाम्।
पिष्टैः+धूमौषधैः+एवं पञ्चकृत्वः प्रलेपयेत्॥19॥
वर्तिः+अङ्गुष्ठकस्थूला यवमध्या यथा भवेत्।

छायाशुष्कां विगर्भां तां स्नेहाभ्यक्तां यथायथम्॥20॥
धूमनेत्रार्पितां पातुम्+अग्निप्लुष्टां प्रयोजयेत्।
शरावसम्पुटच्छिद्रे नाडीं न्यस्य दशाङ्गुलाम्॥21॥
अष्टाङ्गुलां वा वक्त्रेण कासवान् धूमम्+आपिबेत्॥21 1/2॥
कासः श्वासः पीनसः+ विस्वरत्वं
पूतिः+गन्धः पाण्डुता केशदोषः।
कर्णास्याक्षिस्रावकण्ड्वर्तिजाड्यं
तन्द्रा हिध्मा धूमपं न स्पृशन्ति॥22॥
इति श्रीवैद्यपतिसिंहगुप्तसूनुश्रीमद्वाग्भटविरचितायाम्+अष्टाङ्गहृदयसंहितायां सूत्रस्थाने
धूमपानविधिः+नाम+एकविंशतितमः+अध्यायः॥21॥
द्वाविंशतितमः+अध्यायः।
अथ+अतः+ गण्डूषादिविधिम्+अध्यायं व्याख्यास्यामः।
इति ह स्म+आहुः+आत्रेयादयः+ महर्षयः।
चतुष्प्रकारः+ गण्डूषः स्निग्धः शमनशोधनौ।
रोपणः+च त्रयः+तत्र त्रिषु योज्याः+चलादिषु॥1॥
अन्त्यः+ व्रणघ्नः स्निग्धः+अत्र स्वाद्वम्लपटुसाधितैः।
स्नेहैः संशमनः+तिक्तकषायमधुरौषधैः॥2॥
शोधनः+तिक्तकट्वम्लपटूष्णैः रोपणः पुनः।
कषायतिक्तकैः तत्र स्नेहः क्षीरं मधूदकम्॥3॥
शुक्तं मद्यं रसः+ मूत्रं धान्याम्लं च यथायथम्।
कल्कैः+युक्तं विपक्वं वा यथास्पर्शं प्रयोजयेत्॥4॥
दन्तहर्षे दन्तचाले मुखरोगे च वातिके।
सुखोष्णम्+अथवा शीतं तिलकल्कोदकं हितम्॥5॥
गण्डूषधारणे नित्यं तैलं मांसरसः+अथवा।
ऊषादाहान्विते पाके क्षते च+आगन्तुसम्भवे॥6॥
विषे क्षाराग्निदग्धे च सर्पिः+धार्यं पयः+अथवा।
वैशद्यं जनयति+आशु सन्दधाति मुखे व्रणान्॥7॥
दाहतृष्णाप्रशमनं मधुगण्डूषधारणम्।
धान्याम्लम्+आस्यवैरस्यमलदौर्गन्ध्यनाशनम्॥8॥
तत्+एव+अलवणं शीतं मुखशोषहरं परम्।
आशु क्षाराम्बुगण्डूषः+ भिनत्ति श्लेष्मणः+चयम्॥9॥
सुखोष्णोदकगण्डूषैः+जायते वक्त्रलाघवम्।

निवाते सातपे स्विन्नमृदितस्कन्धकन्धरः॥10॥

गण्डूषम्+अपिबन् किञ्चित्+उन्नतास्यः+ विधारयेत्।

कफपूर्णास्यता यावत्+स्रवत्+घ्राणाक्षता+अथवा॥11॥

असञ्चार्यः+ मुखे पूर्णे गण्डूषः कवलः+अन्यथा।

मन्याशिरःकर्णमुखाक्षिरोगाः

प्रसेककण्ठामयवक्त्रशोषाः।

हृल्लासतन्द्रारुचिपीनसाः+च

साध्या विशेषात्+कवलग्रहेण॥12॥

कल्कः+ रसक्रिया चूर्णः+त्रिविधं प्रतिसारणम्।

युञ्ज्यात्+तत् कफरोगेषु गण्डूषविहितौषधैः॥13॥

मुखालेपः+त्रिधा दोषविषहा वर्णकृत्+च सः।

उष्णः+ वातकफे शस्तः शेषेषु+अत्यर्थशीतलः॥14॥

त्रिप्रमाणः+चतुर्भागत्रिभागार्धाङ्गुलोन्नतिः।

अशुष्कस्य स्थितिः+तस्य शुष्कः+ दूषयति च्छविम्॥15॥

तम्+आर्द्रयित्वा+अपनयेत्+तदन्ते+अभ्यङ्गम्+आचरेत्।

विवर्जयेत्+दिवास्वप्नभाष्याग्न्यातपशुक्क्रुधः॥16॥

न योज्यः पीनसे+अजीर्णे दत्तनस्ये हनुग्रहे।

अरोचके जागरिते सः+ तु हन्ति सुयोजितः॥17॥

अकालपलितव्यङ्गवलीतिमिरनीलिकाः।

कोलमज्जा वृषात्+मूलं शाबरं गौरसर्षपाः॥18॥

सिंहीमूलं तिलाः कृष्णाः+ दार्वीत्वक्+निस्तुषाः+ यवाः।

दर्भमूलहिमोशीरशिरीषमिशितण्डुलाः॥19॥

कुमुदोत्पलकह्लारदूर्वामधुकचन्दनम्।

कालीयकतिलोशीरमांसीतगरपद्मकम्॥20॥

तालीसगुन्द्रापुण्ड्राह्वयष्टीकाशनतागुरु।

इति+अर्धार्धोदिता लेपा हेमन्तादिषु षट् स्मृताः॥21॥

मुखालेपनशीलानां दृढं भवति दर्शनम्।

वदनं च+अपरिम्लानं श्लक्ष्णं तामरसोपमम्॥22॥

अभ्यङ्गसेकपिचवः+ बस्तिः+च+इति चतुर्विधम्।

मूर्धतैलं बहुगुणं तद्विद्यात्+उत्तरोत्तरम्॥23॥

तत्र+अभ्यङ्गः प्रयोक्तव्यः+ रौक्ष्यकण्डूमलादिषु।

अरूंषिकाशिरस्तोददाहपाकव्रणेषु तु॥24॥

परिषेकः पिचुः केशशातस्फुटनधूपने।
नेत्रस्तम्भे च बस्तिः+तु प्रसुप्तिः+अर्दितजागरे॥25॥
नासास्यशोषे तिमिरे शिरोरोगे च दारुणे।
विधिः+तस्य निषण्णस्य पीठे जानुसमे मृदौ॥26॥
शुद्धाक्तस्विन्नदेहस्य दिनान्ते गव्यमाहिषम्।
द्वादशाङ्गुलविस्तीर्णं चर्मपट्टं शिरःसमम्॥27॥
आकर्णबन्धनस्थानं ललाटे वस्त्रवेष्टिते।
चैलवेणिकया बद्ध्वा माषकल्केन लेपयेत्॥28॥
ततः+ यथाव्याधिशृतं स्नेहं कोष्णं निषेचयेत्।
ऊर्ध्वं केशभुवः+ यावत्+अङ्गुलम् धारयेत्+च तम्॥29॥
आवक्त्रनासिकोत्क्लेदात्+दशाष्टौ षट् चलादिषु।
मात्रासहस्राणि+अरुजे तु+एकं स्कन्धादि मर्दयेत्॥30॥
मुक्तस्नेहस्य परमं सप्ताहं तस्य सेवनम्।
धारयेत्+पूरणं कर्णे कर्णमूलं विमर्दयन्।
रुजः स्यात्+मार्दवं यावत्+मात्राशतम्+अवेदने॥31॥
यावत्+पर्येति हस्ताग्रं दक्षिणं जानुमण्डलम्।
निमेषोन्मेषकालेन समं मात्रा तु सा स्मृता॥32॥
कचसदनसितत्वपिञ्जरत्वं
परिफुटनं शिरसः समीररोगान्।
जयति जनयति+इन्द्रियप्रसादं
स्वरहनुमूर्द्धबलं च मूर्द्धतैलम्॥33॥
इति श्रीवैद्यपतिसिंहगुप्तसूनुश्रीमद्वाग्भटविरचितायाम्+अष्टाङ्गहृदयसंहितायां सूत्रस्थाने गण्डूषादिविधिः+नाम द्वाविंशः+अध्यायः॥22॥
त्रयोविंशः+अध्यायः।
अथ+अतः+ आश्चोतनाञ्जनविधिम्+अध्यायं व्याख्यास्यामः।
इति ह स्म+आहुः+आत्रेयादयः+ महर्षयः।
सर्वेषाम्+अक्षिरोगाणाम्+आदौ+आश्चोतनं हितम्।
रुक्तोदकण्डूघर्षाश्रुदाहरागनिबर्हणम्॥1॥
उष्णं वाते कफे कोष्णं तच्छीतं रक्तपित्तयोः।
निवातस्थस्य वामेन पाणिनोन्मील्य लोचनम्॥2॥
शुक्तौ प्रलम्बया+अन्येन पिचुवर्त्या कनीनिके।
दश द्वादश वा बिन्दून् द्व्यङ्गुलात्+अवसेचयेत्॥3॥

ततः प्रमृज्य मृदुना चैलेन कफवातयोः।

अन्येन कोष्णपानीयप्लुतेन स्वेदयेत्+मृदु॥4॥

अत्युष्णतीक्ष्णं रुग्रागदृङ्नाशायाक्षिसेचनम्।

अतिशीतं तु कुरुते निस्तोदस्तम्भवेदनाः॥5॥

कषायवर्त्मतां घर्षं कृच्छ्रात्+उन्मेषणं बहु।

विकारवृद्धिम्+अत्यल्पं संरम्भम्+अपरिस्रुतम्॥6॥

गत्वा सन्धिशिरोघ्राणमुखस्रोतांसि भेषजम्।

ऊर्ध्वगात्+नयने न्यस्तम्+अपवर्तयते मलान्॥7॥

अथ+अञ्जनं शुद्धतनोः+नेत्रमात्राश्रये मले।

पक्वलिङ्गे+अल्पशोफातिकण्डूपैच्छिल्यलक्षिते॥8॥

मन्दघर्षाश्रुरागे+अक्ष्णि प्रयोज्यं घनदूषिके।

आर्ते पित्तकफासृग्भिः+मारुतेन विशेषतः॥9॥

लेखनं रोपणं दृष्टिप्रसादनम्+इति त्रिधा।

अञ्जनं लेखनं तत्र कषायाम्लपटूषणैः॥10॥

रोपणं तिक्तकैः+द्रव्यैः स्वादुशीतैः प्रसादनम्।

तीक्ष्णाञ्जनाभिसन्तप्ते नयने तत्प्रसादनम्॥11॥

प्रयुज्यमानं लभते प्रत्यञ्जनसमाह्वयम्।

दशाङ्गुला तनुः+मध्ये शलाका मुकुलानना॥12॥

प्रशस्ता लेखने ताम्री रोपणे काललोहजा।

अङ्गुली च सुवर्णोत्था रूप्यजा च प्रसादने॥13॥

पिण्डः+ रसक्रिया चूर्णः+त्रिधा+एव+अञ्जनकल्पना।

गुरौ मध्ये लघौ दोषे तां क्रमेण प्रयोजयेत्॥14॥

हरेणुमात्रा पिण्डस्य वेल्लमात्रा रसक्रिया।

तीक्ष्णस्य द्विगुणं तस्य मृदुनः चूर्णितस्य च॥15॥

द्वे शलाके तु तीक्ष्णस्य तिस्रः+तत्+इतरस्य च।

निशि स्वप्ने न मध्याह्ने म्लाने न+उष्णगभस्तिभिः॥16॥

अक्षिरोगाय दोषाः स्युः+वर्धितोत्पीडितद्रुताः।

प्रातः सायं च तत्+शान्त्यौ व्यभ्रे+अर्के+अतः+अञ्जयेत्+सदा॥17॥

वदन्ति+अन्ये तु न दिवा प्रयोज्यं तीक्ष्णम्+अञ्जनम्।

विरेकदुर्बलं चक्षुः+आदित्यं प्राप्य सीदति॥18॥

स्वप्नेन रात्रौ कालस्य सौम्यत्वेन च तर्पिता।

शीतसात्म्या दृगाग्नेयी स्थिरतां लभते पुनः॥19॥

अत्युद्रिके बलासे तु लेखनीये+अथवा गदे।
कामम्+अह्नि+अपि न+अत्युष्णे तीक्ष्णम्+अक्ष्णि प्रयोजयेत्॥20॥
अश्मनः+ जन्म लोहस्य ततः+ एव च तीक्ष्णता।
उपघातः+अपि तेन+एव तथा नेत्रस्य तेजसः॥21॥
न रात्रौ+अपि शीते+अति नेत्रे तीक्ष्णाञ्जनं हितम्।
दोषम्+अस्रावयेत्+स्तब्धं कण्डूजाड्यादिकारि तत्॥22॥
न+अञ्जयेत्+भीतवमितविरिक्ताशितवेगिते।
क्रुद्धज्वरिततान्ताक्षिशिरोरुक्शोकजागरे॥23॥
अदृष्टे+अर्के शिरःस्नाते पीतयोः+धूममद्ययोः।
अजीर्णे+अग्न्यर्कसन्तप्ते दिवासुप्ते पिपासिते॥24॥
अति तीक्ष्णमृदुस्तोकबह्वच्छघनकर्कशम्।
अत्यर्थशीतलं तप्तम्+अञ्जनं न+अवचारयेत्॥25॥
अथ+अनुन्मीलयन् दृष्टिमन्तः सञ्चारयेत्+शनैः।
अञ्जिते वर्त्मनी किञ्चित्+चालयेत्+च+एवम्+अञ्जनम्॥26॥
तीक्ष्णं व्याप्नोति सहसा न च+उन्मेषनिमेषणम्।
निष्पीडनं च वर्त्मभ्यां क्षालनं वा समाचरेत्॥27॥
अपेत+औषधसंरम्भं निर्वृतं नयनं यदा।
व्याधिदोषर्तुयोग्याभिः+अद्भिः प्रक्षालयेत्+तदा॥28॥
दक्षिणाङ्गुष्ठकेन+अक्षि ततः+ वामं सवाससा।
ऊर्ध्ववर्त्मनि सङ्गृह्य शोध्यं वामेन च+इतरत्॥29॥
वर्त्मप्राप्तः+अञ्जनात्+दोषः+ रोगान् कुर्यात्+अतः+अन्यथा।
कण्डूजाड्ये+अञ्जनं तीक्ष्णं धूमं वा योजयेत् पुनः॥30॥
तीक्ष्णाञ्जनाभितप्ते तु चूर्णं प्रत्यञ्जनं हिमम्।
इति श्रीवैद्यपतिसिंहगुप्तसूनुश्रीमद्वाग्भटविरचितायाम्+अष्टाङ्गहृदयसंहितायां सूत्रस्थाने आश्चोतनाञ्जनविधिः+नाम त्रयोविंशः+अध्यायः॥23॥
चतुर्विंशतितमः+अध्यायः।
अथ+अतः+तर्पणपुटपाकविधिम्+अध्यायं व्याख्यास्यामः।
इति ह स्म+आहुः+आत्रेयादयः+ महर्षयः।
नयने ताम्यति स्तब्धे शुष्के रूक्षे+अभिघातिते।
वातपित्तातुरे जिह्मे शीर्णपक्ष्माविलेक्षणे॥1॥
कृच्छ्रोन्मीलशिराहर्षशिरोत्पाततमः+अर्जुनैः।
स्यन्दमन्थान्यतोवातवातपर्यायशुक्रकैः॥2॥

आतुरे शान्तरागाश्रुशूलसंरम्भदूषिके।
निवाते तर्पणं योज्यं शुद्धयोः+मूर्द्धकाययोः॥3॥
काले साधारणे प्रातः सायं वा+उत्तानशायिनः।
यवमाषमयीं पालीं नेत्रकोशात्+बहिः समाम्॥4॥
द्व्यङ्गुलोच्चां दृढां कृत्वा यथास्वं सिद्धम्+आवपेत्।
सर्पिः+निमीलिते नेत्रे तप्ताम्बुप्रविलायितम्॥5॥
नक्तान्ध्यवाततिमिरकृच्छ्रबोधादिके वसाम्।
आपक्ष्माग्रात्+अथ+उन्मेषं शनकैः+तस्य कुर्वतः॥6॥
मात्रां विगुणयेत्+तत्र वर्त्मसन्धिसितासिते।
दृष्टौ च क्रमशः+ व्याधौ शतं त्रीणि च पञ्च च॥7॥
शतानि सप्त च+अष्टौ च दश मन्थे दशानिले।
पित्ते षट् स्वस्थवृत्ते च बलासे पञ्च धारयेत्॥8॥
कृत्वा+अपाङ्गे ततः+ द्वारं स्नेहं पात्रे निगालयेत्।
पिबेत्+च धूमं न+इक्षेत व्योम रूपं च भास्वरम्॥9॥
इत्थं प्रतिदिनं वायौ पित्ते तु+एकान्तरं कफे।
स्वस्थे च द्व्यन्तरं दध्यात्+आतृप्तेः+इति योजयेत्॥10॥
प्रकाशक्षमता स्वास्थ्यं विशदं लघु लोचनम्।
तृप्ते विपर्ययः+अतृप्ते+अतितृप्ते श्लेष्मजा रुजः॥11॥
स्नेहपीता तनुः+इव क्लान्ता दृष्टिः+हि सीदति।
तर्पणानन्तरं तस्मात्+ दृग्बलाधानकारिणम्॥12॥
पुटपाकं प्रयुञ्जीत पूर्वोक्तेषु+एव यक्ष्मसु।
सः+ वाते स्नेहनः श्लेष्मसहिते लेखनः+ हितः॥13॥
दृग्दौर्बल्ये+अनिले पित्ते रक्ते स्वस्थे प्रसादनः।
भूशयप्रसहानूपमेदोमज्जवसामिषैः॥14॥
स्नेहनं पयसा पिष्टैः+जीवनीयैः+च कल्पयेत्।
मृगपक्षियकृन्मांसमुक्तायः+ताम्रसैन्धवैः॥15॥
स्रोतोजशङ्खफेनालैः+लेखनं मस्तुकल्कितैः।
मृगपक्षियकृन्मज्जवसान्त्रहृदयामिषैः॥16॥
मधुरैः सघृतैः स्तन्यक्षीरपिष्टैः प्रसादनम्।
बिल्वमात्रं पृथक् पिण्डं मांसभेषजकल्कयोः॥17॥
उरुबूकवटाम्भोजपत्रैः स्नेहादिषु क्रमात्।
वेष्टयित्वा मृदा लिप्तं धवधन्वनगोमयैः॥18॥

पचेत्+प्रदीप्तैः+अग्न्याभं पक्वं निष्पीड्य तद्रसम्।

नेत्रे तर्पणवत्+युञ्ज्यात् शतं द्वे त्रीणि धारयेत्॥19॥

लेखनस्नेहनान्त्येषु कोष्णौ पूर्वौ हिमः+अपरः।

धूमपः+अन्ते तयोः+एव योगाः+तत्र च तृप्तिवत्॥20॥

तर्पणं पुटपाकं च नस्य+अनर्हे न योजयेत्।

यावन्ति+अहानि युञ्जीत द्विः+ततः+ हितभाक्+भवेत्॥21॥

मालतीमल्लिकापुष्पैर्बद्धाक्षः+ निवसेत्+निशाम्॥21 1/2॥

सर्वात्मना नेत्रबलाय यत्नं

कुर्वीत नस्याञ्जनतर्पणाद्यैः।

दृष्टिः+च नष्टा विविधं जगत्+च

तमोमयं जायतः+ एकरूपम्॥22॥

इति श्रीवैद्यपतिसिंहगुप्तसूनुश्रीमद्वाग्भटविरचितायाम्+अष्टाङ्गहृदयसंहितायां सूत्रस्थाने तर्पणपुटपाकविधिः+नाम चतुर्विंशः+अध्यायः॥24॥

पञ्चविंशतितमः+अध्यायः।

अथ+अतः+ यन्त्रविधिम्+अध्यायं व्याख्यास्यामः।

इति ह स्म+आहुः+आत्रेयादयः+ महर्षयः।

नानाविधानां शल्यानां नानादेशप्रबाधिनाम्।

आहर्तुम्+अभ्युपायः+ यः+तद्यन्त्रं यत्+च दर्शने॥1॥

अर्शोभगन्दरादीनां शस्त्रक्षाराग्नियोजने।

शेषाङ्गपरिरक्षायां तथा बस्त्यादिकर्मणि॥2॥

घटिकालाबुशृङ्गं च जाम्बवौष्ठादिकानि च।

अनेकरूपकार्याणि यन्त्राणि विविधानि+अतः॥3॥

विकल्प्य कल्पयेत्+बुद्ध्या यथास्थूलं तु वक्ष्यते।

तुल्यानि कङ्कसिंहर्क्षकाकादिमृगपक्षिणाम्॥4॥

मुखैः+मुखानि यन्त्राणां कुर्यात्+तत्संज्ञकानि च।

अष्टादशाङ्गुलायामानि+आयसानि च भूरिशः॥5॥

मसूराकारपर्यन्तैः कण्ठे बद्धानि कीलकैः।

विद्यात्+स्वस्तिकयन्त्राणि मूले+अङ्कुशनतानि च॥6॥

तैः+दृढैः+अस्थिसंलग्नशल्याहरणम्+इष्यते।

कीलबद्धविमुक्ताग्रौ सन्दंशौ षोडशाङ्गुलौ॥7॥

त्वक्शिरास्नायुपिशितलग्नशल्यापकर्षणौ।

षडङ्गुलः+अन्यः+ हरणे सूक्ष्मशल्योपपक्ष्मणाम्॥8॥

मुचुण्डी सूक्ष्मदन्तर्जुर्मूले रुचकभूषणा।
गम्भीरव्रणमांसानाम्+अमर्मणः शेषितस्य च॥9॥
द्वे द्वादशाङ्गुले मत्स्यतालवत्+ द्व्येकतालके।
तालयन्त्रे स्मृते कर्णनाडीशल्यापहारिणी॥10॥
नाडीयन्त्राणि सुषिराणि+एकानेकमुखानि च।
स्रोतोगतानां शल्यानाम्+आमयानां च दर्शने॥11॥
क्रियाणां सुकरत्वाय कुर्यात्+आचूषणाय च।
तद्विस्तारपरीणाहदैर्घ्यं स्रोतः+अनुरोधतः॥12॥
दशाङ्गुलार्धनाहान्तः कण्ठशल्यावलोकिनी।
नाडी पञ्चमुखच्छिद्रा चतुष्कर्णस्य सङ्ग्रहे॥13॥
वारङ्गस्य द्विकर्णस्य त्रिच्छिद्रा तत्प्रमाणतः।
वारङ्गकर्णसंस्थानानाहदैर्घ्यानुरोधतः॥14॥
नाडीः+एवं विधाः+च+अन्या द्रष्टुं शल्यानि कारयेत्।
पद्मकर्णिकया मूर्ध्नि सदृशी द्वादशाङ्गुला॥15॥
चतुर्थसुषिरा नाडी शल्यनिर्घातिनी मता।
अर्शसां गोस्तनाकारं यन्त्रकं चतुरङ्गुलम्॥26॥
न+आहे पञ्चाङ्गुलं पुंसां प्रमदानां षडङ्गुलम्।
द्विच्छिद्रं दर्शने व्याधेः+एकच्छिद्रं तु कर्मणि॥17॥
मध्ये+अस्य त्र्यङ्गुलं छिद्रम्+अङ्गुष्ठोदरविस्तृतम्।
अर्धाङ्गुलोच्छ्रितोद्वृत्तकर्णिकं च तदूर्ध्वतः॥18॥
शम्याख्यं तादृक्+अच्छिद्रं यन्त्रम्+अर्शः प्रपीडनम्।
सर्वथा+अपनयेत्+ओष्ठं छिद्रात्+ऊर्ध्वं भगन्दरे॥19॥
घ्राणार्बुदार्शसाम्+एकच्छिद्रा नाड्यङ्गुलद्वया।
प्रदेशिनीपरीणाहा स्यात्+भगन्दरयन्त्रवत्॥20॥
अङ्गुलित्राणकं दान्तं वार्क्षं वा चतुरङ्गुलम्।
द्विच्छिद्रं गोस्तनाकारं तत्+वक्त्रविवृतौ सुखम्॥21॥
योनिव्रणेक्षणं मध्ये सुषिरं षोडशाङ्गुलम्।
मुद्राबद्धं चतुर्भित्तम्+अम्भोजमुकुलाननम्॥22॥
चतुःशलाकम्+आक्रान्तं मूले तत्+विकसेत्+मुखे।
यन्त्रे नाडीव्रणाभ्यङ्गक्षालनाय षडङ्गुले॥23॥
बस्तियन्त्राकृती मूले मुखे+अङ्गुष्ठकलायखे।
अग्रतः+अकर्णिके मूले निबद्धमृदुचर्मणी॥24॥

द्विद्वारा नलिका पिच्छनलिका वा+उदकोदरे।
धूमबस्त्यादियन्त्राणि निर्दिष्टानि यथायथम्॥25॥
त्र्यङ्गुलास्यं भवेत्+शृङ्गं चूषणे+अष्टादशाङ्गुलम्।
अग्रे सिद्धार्थकच्छिद्रं सुनद्धं चूचुकाकृति॥26॥
स्यात्+द्वादशाङ्गुलः+अलाबुः+नाहे तु+अष्टादशाङ्गुलः।
चतुः+त्र्यङ्गुलवृत्तास्यः+ दीप्तः+अन्तः श्लेष्मरक्तहृत्॥27॥
तद्वद्धटी हिता गुल्मविलयोन्नमने च सा।
शलाकाख्यानि यन्त्राणि नानाकर्माकृतीनि च॥28॥
यथायोगप्रमाणानि तेषाम्+एषणकर्मणी।
उभे गण्डूपदमुखे स्रोतोभ्यः शल्यहारिणी॥29॥
मसूरदलवक्त्रे द्वे स्याताम्+अष्टनवाङ्गुले।
शङ्कवः षट् उभौ तेषां षोडशद्वादशाङ्गुलौ॥30॥
व्यूहने+अहिफणावक्त्रौ द्वौ दशद्वादशाङ्गुलौ।
चालने शरपुङ्खास्यौ आहार्ये बडिशाकृती॥31॥
नतः+अग्रे शङ्कुना तुल्यः+ गर्भशङ्कुः+इति स्मृतः।
अष्टाङ्गुलायतः+तेन मूढगर्भं हरेत् स्त्रियाः॥32॥
अश्मर्याहरणं सर्पफणावद्वक्रमग्रतः।
शरपुङ्खमुखं दन्तपातनं चतुरङ्गुलम्॥33॥
कार्पासविहितोष्णीषाः शलाकाः षट् प्रमार्जने।
पायौ+आसन्नदूरार्थे द्वे दशद्वादशाङ्गुले॥34॥
द्वे षट्सप्ताङ्गुले घ्राणे द्वे कर्णे+अष्टनवाङ्गुले।
कर्णशोधनम्+अश्वत्थपत्रप्रान्तं स्रुवाननम्॥35॥
शलाकाजाम्बवौष्ठानां क्षारे+अग्नौ च पृथक् त्रयम्।
युञ्ज्यात् स्थूलाणुदीर्घाणां शलाकामन्त्रवर्ध्मनि॥36॥
मध्योर्ध्ववृत्तदण्डां च मूले च+अर्धेन्दुसन्निभाम्।
कोलास्थिदलतुल्यास्या नासार्शः+अर्बुददाहकृत्॥37॥
अष्टाङ्गुला निम्नमुखाः+तिस्रः क्षारौषधक्रमे।
कनीनीमध्यमानामीनखमानसमैः+मुखैः॥38॥
स्वं स्वम्+उक्तानि यन्त्राणि मेढ्रशुद्ध्यञ्जनादिषु।
अनुयन्त्राणि+अयस्कान्तरज्जुवस्त्राश्ममुद्गराः॥39॥
वध्रान्त्रजिह्वाबालाः+च शाखानखमुखद्विजाः।
कालः पाकः करः पादः+ भयं हर्षः+च तत्क्रियाः॥40॥

उपायवित्+प्रविभजेत्+आलोच्य निपुणं धियाः॥40 1/2॥

निर्घातनोन्मथनपूरणमार्गशुद्धिसंव्यूहनाहरणबन्धनपीडनानि।

आचूषणोन्नमननामनचालभङ्गव्यावर्तनर्जुकरणानि च यन्त्रकर्म॥ 41॥

विवर्तते साध्ववगाहते च

ग्राह्यं गृहीत्वा+उद्धरते च यस्मात्।

यन्त्रेषु+अतः कङ्कमुखं प्रधानं

स्थानेषु सर्वेषु+अधिकारि यत्+च॥42॥

इति श्रीवैद्यपतिसिंहगुप्तसूनुश्रीमद्वाग्भटविरचितायाम्+अष्टाङ्गहृदयसंहितायां सूत्रस्थाने यन्त्रविधिः+नाम पञ्चविंशतितमः+अध्यायः॥25॥

षड्विंशः+अध्यायः।

अथ+अतः शस्त्रविधिम्+अध्यायं व्याख्यास्यामः।

इति ह स्म+आहुः+आत्रेयादयः+ महर्षयः।

षड्विंशतिः सुकर्मारैः+घटितानि यथाविधि।

शस्त्राणि रोमवाहीनि बाहुल्येन+अङ्गुलानि षट्॥1॥

सुरूपाणि सुधाराणि सुग्रहाणि च कारयेत्।

अकरालानि सुध्मातसुतीक्ष्णावर्तिते+अयसि॥2॥

समाहितमुखाग्राणि नीलाम्भोजच्छवीनि च।

नामानुगतरूपाणि सदा सन्निहितानि च॥3॥

स्वोन्मानार्धचतुर्थांशफलानि+एकैकशः+अपि च।

प्रायः+ द्वित्राणि युञ्जीत तानि स्थानविशेषतः॥4॥

(मण्डलाग्रं वृद्धिपत्रम्+उत्पलाध्यर्द्धधारके।

सर्पैषण्यौ वेतसाख्यं शरार्यास्यत्रिकूर्चके॥1॥

कुशास्यं साटवदनमन्तर्वक्त्रार्धचन्द्रके(कम्)।

व्रीहिमुखं कुठारी च शलाकाङ्गुलिशस्त्रके॥2॥

बडिशं करपत्राख्यं कर्तरी नखशस्त्रकम्।

दन्तलेखनकं सूच्यः कूर्चः+ नाम खजाह्वयम्॥3॥

आरा चतुर्विधाकारा तथा स्यात्+कर्णवेधनी(नम्)॥)

मण्डलाग्रं फले तेषां तर्जन्यन्तः+नखाकृति।

लेखने छेदने योज्यं पोथकीशुण्डिकादिषु॥5॥

वृद्धिपत्रं क्षुराकारं छेदभेदनपाटने।

ऋज्वग्रम्+उन्नते शोफे गम्भीरे च तत्+अन्यथा॥6॥

नताग्रं पृष्ठतः+ दीर्घह्रस्ववक्त्रं यथाश्रयम्।

उत्पलाध्यर्धधाराख्ये भेदने छेदने तथा॥7॥
सर्पास्यं घ्राणकर्णार्शः+च्छेदने+अर्धाङ्गुलं फले।
गतेः+अन्वेषणे श्लक्ष्णा गण्डूपदमुखैषणी॥8॥
भेदनार्थे+अपरा सूचीमुखा मूलनिविष्टखा।
वेतसं व्यधने स्राव्ये शरार्यास्यत्रिकूर्चके॥9॥
कुशाटावदने स्राव्ये द्व्यङ्गुलं स्यात्+तयोः फलम्।
तद्वत्+अन्तर्मुखं तस्य फलम्+अध्यर्धम्+अङ्गुलम्॥10॥
अर्धचन्द्राननं च+एतत् तथा+अध्यर्धाङ्गुलं फले।
व्रीहिवक्त्रं प्रयोज्यं च तत्+शिरोदरयोः+व्यधे॥11॥
पृथुः कुठारी गोदन्तसदृशा+अर्धाङ्गुलानना।
तया+उर्ध्वदण्डया विध्येत्+उपर्यस्थ्नां स्थितां सिराम्॥12॥
ताम्री शलाका द्विमुखी मुखे कुरुबकाकृतिः।
लिङ्गनाशं तया विध्येत् कुर्यात्+अङ्गुलिशस्त्रकम्॥13॥
मुद्रिकानिर्गतमुखं फले तु+अर्धाङ्गुलायतम्।
योगतः+ वृद्धिपत्रेण मण्डलाग्रेण वा समम्॥14॥
तत्+प्रदेशिन्यग्रपर्वप्रमाणार्पणमुद्रिकम्।
सूत्रबद्धं गलस्रोतोरोगच्छेदनभेदने॥15॥
ग्रहणे शुण्डिकामर्दिः+बडिशं सुनताननम्।
छेदे+अस्थ्नां करपत्रं तु खरधारं दशाङ्गुलम्॥16॥
विस्तारे द्व्यङ्गुलं सूक्ष्मदन्तं सुत्सरुबन्धनम्।
स्नायुसूत्रकचच्छेदे कर्तरी कर्तरीनिभा॥17॥
वक्रर्जुधारं द्विमुखं नखशस्त्रं नवाङ्गुलम्।
सूक्ष्मशल्योद्धृतिच्छेदभेदप्रच्छानलेखने॥18॥
एकधारं चतुष्कोणं प्रबद्धाकृति च+एकतः।
दन्तलेखनकं तेन शोधयेत्+दन्तशर्कराम्॥19॥
वृत्ता गूढदृढाः पाशे तिस्रः सूच्यः+अत्र सीवने।
मांसलानां प्रदेशानां त्र्यस्रा त्र्यङ्गुलमायता॥20॥
अल्पमांसास्थिसन्धिस्थव्रणानां द्व्यङ्गुलायता।
व्रीहिवक्त्रा धनुः+वक्रा पक्वामाशयमर्मसु॥21॥
सा सार्धद्व्यङ्गुलां सर्ववृत्ताः+ताः+चतुरङ्गुलाः।
कूर्चः+ वृत्तैकपीठस्थाः सप्ताष्टौ वा सुबन्धनाः॥22॥
सः+ योज्यः+ नीलिकाव्यङ्गकेशशातेषु कुट्टने।

अर्धाङ्गुलमुखैः+वृत्तैः+अष्टाभिः कण्टकैः खजः॥23॥
पाणिभ्यां मथ्यमानेन घ्राणात्+तेन हरेत्+असृक्।
व्यधनं कर्णपालीनां यूथिकामुकुलाननम्॥24॥
आरार्धाङ्गुलवृत्तास्या तत्प्रवेशा तथा+उर्ध्वतः।
चतुरस्रा तया विध्येत्+शोफं पक्वामसंशये॥25॥
कर्णपालीं च बहलां बहलायाः+च शस्यते।
सूची त्रिभागसुषिरा त्र्यङ्गुला कर्णवेधनी॥26॥
जलौकः क्षारदहनकाचोपलनखादयः।
अलौहानि+अनुशस्त्राणि तानि+एवं च विकल्पयेत्॥27॥
अपराणि+अपि यन्त्रादीनि+उपयोगं च यौगिकम्।
उत्पाट्यपाट्यसीव्यैष्यलेख्यप्रच्छानकुट्टनम्॥28॥
छेद्यं भेद्यं व्यधः+ मन्थः+ ग्रहः+ दाहः+च तत्क्रियाः।
कुण्ठखण्डतनुस्थूलह्रस्वदीर्घत्ववक्रताः॥29॥
शस्त्राणां खरधारत्वम्+अष्टौ दोषाः प्रकीर्तिताः।
छेदभेदनलेख्यार्थं शस्त्रं वृन्तफलान्तरे॥30॥
तर्जनीमध्यमाङ्गुष्ठैः+गृह्णीयात्+सुसमाहितः।
विस्रावणानि वृन्ताग्रे तर्जन्या+अङ्गुष्ठकेन च॥31॥
तलप्रच्छन्नवृन्ताग्रं ग्राह्यं व्रीहिमुखं मुखे।
मूलेषु+आहरणार्थानि क्रियासौकर्यतः+अपरम्॥32॥
स्यात्+नवाङ्गुलविस्तारः सुघनः+ द्वादशाङ्गुलः।
क्षौमपत्रोर्णकौशेयदुकूलमृदुचर्मजः॥33॥
विन्यस्तपाशः सुस्यूतः सान्तरोर्णास्थशस्त्रकः।
शलाकापिहितास्यः+च शस्त्रकोशः सुसञ्चयः॥34॥
जलौकसः+तु सुखिनां रक्तस्रावाय योजयेत्।
दुष्टाम्बुमत्स्यभेकाहिशवकोथमलोद्भवाः॥35॥
रक्ताः श्वेताः+ भृशं कृष्णाः+चपलाः स्थूलपिच्छिलाः।
इन्द्रायुधविचित्रोर्ध्वराजयः+ रोमशाः+च ताः॥36॥
सविषा वर्जयेत् ताभिः कण्डूपाकज्वरभ्रमाः।
विषपित्तास्रनुत्+कार्यं तत्र शुद्धाम्बुजाः पुनः॥37॥
निर्विषाः शैवलश्यावा वृत्ता नीलोर्ध्वराजयः।
कषायपृष्ठाः+तन्वङ्ग्यः किञ्चित्+पीतोदराः+च याः॥38॥
ताः+ अपि+असम्यग्वमनात् प्रततं च निपातनात्।

सीदन्तीः सलिलं प्राप्य रक्तमत्ता इति त्यजेत्॥39॥
अथ+इतरा निशाकल्कयुक्ते+अम्भसि परिप्लुताः।
अवन्तिसोमे तक्रे वा पुनः+च+आश्वासिता जले॥40॥
लागयेत्+घृतमृत्स्तन्यरक्तशस्त्रनिपातनैः।
पिबन्तीः+उन्नतस्कन्धाः+छादयेत्+मृदुवाससा॥41॥
सम्पृक्ताद्+दुष्टशुद्धास्राज्जलौका दुष्टशोणितम्।
आदत्ते प्रथमं हंसः क्षीरं क्षीरोदकात्+इव॥42॥
(गुल्मार्शोविद्रधीन् कुष्ठवातरक्तगलामयान्।
नेत्ररुग्विषवीसर्पान् शमयन्ति जलौकसः॥१॥)
दंशस्य तोदे कण्ड्वां वा मोक्षयेत्+ वामयेत्+च ताम्।
पटुतैलाक्तवदनां श्लक्ष्णकण्डनरुषिताम्॥43॥
रक्षन् रक्तमदात्+भूयः सप्ताहं ताः+ न पातयेत्।
पूर्ववत् पटुता दार्ढ्यं सम्यग्वान्ते जलौकसाम्॥44॥
क्लमः+अतियोगात्+मृत्युः+वा दुर्वान्ते स्तब्धता मदः।
अन्यत्र+अन्यत्र ताः स्थाप्या घटे मृत्स्नाम्बुगर्भिणि॥45॥
लालादिकोथनाशार्थं सविषाः स्युः+तदन्वयात्।
अशुद्धौ स्रावयेत्+दंशान् हरिद्रागुडमाक्षिकैः॥46॥
शतधौताज्यपिचवः+ततः+ लेपाः+च शीतलाः।
दुष्टरक्तापगमनात्+सद्यः+ रागरुजां शमः॥47॥
अशुद्धं चलितं स्थानात्+स्तितं रक्तं व्रणाशये।
व्यम्लीभवेत्+पर्युषितं तस्मात्+तत्+स्रावयेत्+पुनः॥48॥
युञ्ज्यात्+नालाबुघटिका रक्ते पित्तेन दूषिते।
तासाम्+अनलसंयोगात्+ युञ्ज्यात्+तु कफवायुना॥49॥
कफेन दुष्टं रुधिरं न श्रृङ्गेण विनिर्हरेत्।
स्कन्नत्वात् वातपित्ताभ्यां दुष्टं श्रृङ्गेण निर्हरेत्॥50॥
गात्रं बद्ध्वोपरि दृढं रज्ज्वा पट्टेन वा समम्।
स्नायुसन्ध्यस्थिमर्माणि त्यजन् प्रच्छानम्+आचरेत्॥51॥
अधोदेशप्रविसृतैः पदैः+उपरिगामिभिः।
न गाढघनतिर्यग्भिः+न पदे पदम्+आचरन्॥52॥
प्रच्छानेन+एकदेशस्थं ग्रथितं जलजन्मभिः।
हरेत्+शृङ्गादिभिः सुप्तम्+असृक्+व्यापि शिराव्यधैः॥53॥
प्रच्छानं पिण्डिते वा स्यात्+ अवगाढे जलौकसः।

त्वक्स्थे+अलाबुघटीशृङ्गं शिरैव व्यापके+असृजि॥54॥

वातादिधाम वा शृङ्गजलौकः+अलाबुभिः क्रमात्।

स्रुतासृजः प्रदेहाद्यैः शीतैः स्यात्+वायुकोपतः॥55॥

सतोदकण्डूः शोफः+तं सर्पिषा+उष्णेन सेचयेत्।

इति श्रीवैद्यपतिसिंहगुप्तसूनुश्रीमद्वाग्भटविरचितायाम्+अष्टाङ्गहृदयसंहितायां सूत्रस्थाने शस्त्रविधिः+नाम षड्विंशः+अध्यायः॥26॥

सप्तविंशः+अध्यायः।

अथ+अतः सिराव्यधविधिम्+अध्यायं व्याख्यास्यामः।

इति ह स्म+आहुः+आत्रेयादयः+ महर्षयः।

मधुरं लवणं किञ्चित्+अशीतोष्णम्+असंहतम्।

पद्मेन्द्रगोपहेमाविशशलोहितलोहितम्॥1॥

लोहितं प्रभवः शुद्धं तनोः+तेन+एव च स्थितिः।

तत्+पित्तश्लेष्मलैः प्रायः+ दूष्यते कुरुते ततः॥2॥

विसर्पविद्रधिप्लीहगुल्माग्निसदनज्वरान्।

मुखनेत्रशिरोरोगमदतृड्लवणास्यताः॥3॥

कुष्ठवातास्रपित्तास्रकट्वम्लोद्गिरणभ्रमान्।

शीतोष्णस्निग्धरूक्षाद्यैः+उपक्रान्ताः+च ये गदाः॥4॥

सम्यक्+साध्याः+ न सिध्यन्ति ते च रक्तप्रकोपजाः।

तेषु स्रावयितुं रक्तम्+उद्रिक्तं व्यधयेत्+सिराम्॥5॥

न तु+ऊनषोडशातीतसप्तत्यब्दस्रुतासृजाम्।

अस्निग्धास्वेदितात्यर्थस्वेदितानिलरोगिणाम्॥6॥

गर्भिणीसूतिकाजीर्णपित्तास्रश्वासकासिनाम्।

अतिसारोदरच्छर्दिपाण्डुसर्वाङ्गशोफिनाम्॥7॥

स्नेहपीते प्रयुक्तेषु तथा पञ्चसु कर्मसु।

न+अयन्त्रितां सिरां विध्येत्+न तिर्यक्+ना+अपि+अनुत्थिताम्॥8॥

न+अतिशीतोष्णवाताभ्रेषु+अन्यत्र+अत्ययिकात्+गदात्।

शिरोनेत्रविकारेषु ललाट्यां मोक्षयेत्+सिराम्॥9॥

अपाङ्ग्याम्+उपनास्यां वा कर्णरोगेषु कर्णजाम्।

नासारोगेषु नासाग्रे स्थितां नासाललाटयोः॥10॥

पीनसे मुखरोगेषु जिह्वौष्ठहनुतालुगाः।

जत्रूर्ध्वग्रन्थिषु ग्रीवाकर्णशङ्खशिरःश्रिताः॥11॥

उरोपाङ्गललाटस्था उन्मादे+अपस्मृतौ पुनः।

हनुसन्धौ समस्ते वा सिरां भ्रूमध्यगामिनीम्॥12॥
विद्रधौ पार्श्वशूले च पार्श्वकक्षास्तनान्तरे।
तृतीयके+अंसयोः+मध्ये स्कन्धस्य+अधः+चतुर्थके॥13॥
प्रवाहिकायां शूलिन्यां श्रोणितः+ द्व्यङ्गुले स्थिताम्।
शुक्रमेढ्रामये मेढ्रे ऊरुगां गलगण्डयोः॥14॥
गृध्रस्यां जानुनः+अधस्तात्+ऊर्ध्वं वा चतुरङ्गुले।
इन्द्रबस्तेः+अधः+अपच्यां द्व्यङ्गुले चतुरङ्गुले॥15॥
ऊर्ध्वं गुल्फस्य सक्थ्यर्तौ तथा क्रोष्टुकशीर्षके।
पाददाहे खुडे हर्षे विपाद्यां वातकण्टके॥16॥
चिप्पे च द्व्यङ्गुले विध्येत्+उपरि क्षिप्रमर्मणः।
गृध्रस्याम्+इव विश्वाच्यां यथा+उक्तानाम्+अदर्शने॥17॥
मर्महीने यथासन्ने देशे+अन्यां व्यधयेत् सिराम्।
अथ स्निग्धतनुः सज्जसर्वोपकरणः+ बली॥18॥
कृतस्वस्त्ययनः स्निग्धरसान्नप्रतिभोजितः।
अग्नितापातपस्विन्नः+ जानूच्चासनसंस्थितः॥।19॥
मृदुपट्टात्तकेशान्तः+ जानुस्थापितकूर्परः।
मुष्टिभ्यां वस्त्रगर्भाभ्यां मन्ये गाढं निपीडयेत्॥20॥
दन्तप्रपीडनोत्कासगण्डाध्मानानि च+आचरेत्।
पृष्ठतः+ यन्त्रयेत्+च+एनं वस्त्रम्+आवेष्टयत्+नरः॥21॥
कन्धरायां परिक्षिप्य न्यस्यान्तर्वामतर्जनीम्।
एषः+अन्तर्मुखवर्ज्यानां सिराणां यन्त्रणे विधिः॥22॥
ततः+ मध्यमया+अङ्गुल्या वैद्यः+अङ्गुष्ठविमुक्तया।
ताडयेत् उत्थितां ज्ञात्वा स्पर्शात्+वा+अङ्गुष्ठपीडनैः॥23॥
कुठार्या लक्षयेत्+मध्ये वामहस्तगृहीतया।
फलोद्देशे सुनिष्कम्पं सिरां तद्वत्+च मोक्षयेत्॥24॥
ताडयन् पीडयन्+च+एनां विध्येत्+ व्रीहिमुखेन तु।
अङ्गुष्ठेन+उन्नमय्याग्रे नासिकाम्+उपनासिकाम्॥25॥
अभ्युन्नतविदष्टाग्रजिह्वस्य+अधः+तदाश्रयाम्।
यन्त्रयेत्+स्तनयोः+ऊर्ध्वं ग्रीवाश्रितसिराव्यधे॥26॥
पाषाणगर्भहस्तस्य जानुस्थे प्रसृते भुजे।
कुक्षेः+आरभ्य मृदिते विध्येत्+बद्धोर्ध्वपट्टके॥27॥
विध्येत्+धस्तशिरां बाहौ+अनाकुञ्चितकूर्परे।

बद्ध्वा सुखोपविष्टस्य मुष्टिम्+अङ्गुष्ठगर्भिणम्॥28॥

ऊर्ध्वं वेध्यप्रदेशात्+च पट्टिकां चतुरङ्गुले।

विध्येत्+आलम्बमानस्य बाहुभ्यां पार्श्वयोः सिराम्॥29॥

प्रहृष्टे मेहने जङ्घासिरां जानुनि+अकुञ्चिते।

पादे तु सुस्थिते+अधस्तात्+जानुसन्धेः+निपीडिते॥30॥

गाढं कराभ्याम्+आगुल्फं चरणे तस्य च+उपरि।

द्वितीये कुञ्चिते किञ्चित्+आरूढे हस्तवत्+ततः॥31॥

बद्ध्वा विध्येत्+सिराम् इत्थम्+अनुक्तेषु+अपि कल्पयेत्।

तेषु तेषु प्रदेशेषु तत्+तत्+यन्त्रम्+उपायवित्॥32॥

मांसले निक्षिपेत्+देशे व्रीह्यास्यं व्रीहिमात्रकम्।

यवार्धम्+अस्थ्नाम्+उपरि सिरां विध्यन् कुठारिकाम्॥33॥

सम्यक्+विद्धा स्रवेत्+धारां यन्त्रे मुक्ते तु न स्रवेत्।

अल्पकालं वहति+अल्पं दुर्विद्धा तैलचूर्णनैः॥34॥

सशब्दम्+अतिविद्धा तु स्रवेत्+ दुःखेन धार्यते।

भीमूर्च्छायन्त्रशैथिल्यकुण्ठशस्त्रातितृप्तयः॥35॥

क्षामत्ववेगितास्वेदा रक्तस्य+अस्रुतिहेतवः।

असम्यक्+अस्रे स्रवति वेल्लव्योषनिशानतैः॥36॥

सागारधूमलवणतैलैः+दिह्यात्+शिरामुखम्।

सम्यक्+प्रवृत्ते कोष्णेन तैलेन लवणेन च॥37॥

अग्रे स्रवति दुष्टास्रं कुसुम्भात्+इव पीतिका।

सम्यक्+स्रुत्वा स्वयं तिष्ठेत्+शुद्धं तत्+इति न+आहरेत्॥38॥

यन्त्रं विमुच्य मूर्च्छायां वीजिते व्यजनैः पुनः।

स्रावयेत्+मूर्च्छति पुनः+तु+अपरेद्युः+त्र्यहे+अपि वा॥39॥

वातात्+श्यावारुणं रूक्षं वेगस्राव्यच्छफेनिलम्।

पित्तात् पीतासितं विस्रम्+अस्कन्दि+औष्ण्यात्+सचन्द्रिकम्॥40॥

कफात् स्निग्धम्+असृक्+पाण्डु तन्तुमत्+पिच्छिलं घनम्।

संसृष्टलिङ्गं संसर्गात् त्रिदोषं मलिनाविलम्॥41॥

अशुद्धौ बलिनः+अपि+अस्रं न प्रस्थात्+स्रावयेत्+परम्।

अतिस्रुतौ हि मृत्युः स्यात्+दारुणा वा चलामयाः॥42॥

तत्र+अभ्यङ्गरसक्षीररक्तपानानि भेषजम्।

स्रुते रक्ते शनैः+यन्त्रम्+अपनीय हिमाम्बुना॥43॥

प्रक्षाल्य तैलप्लोताक्तं बन्धनीयं सिरामुखम्।

अशुद्धं स्रावयेत्+भूयः सायम्+अह्नि+अपरे+अपि वा॥44॥
स्नेहोपस्कृतदेहस्य पक्षात्+वा भृशदूषितम्।
किञ्चित्+हि शेषे दुष्टास्रे न+एव रोगः+अतिवर्तते॥45॥
सशेषम्+अपि+अतः+ धार्यं न च+अतिस्रुतिम्+आचरेत्।
हरेत्+शृङ्गादिभिः शेषं प्रसादम्+अथवा नयेत्॥46॥
शीतोपचारपित्तास्रक्रियाशुद्धिविशोषणैः।
दुष्टं रक्तम्+अनुद्रिक्तम्+एवम्+एव प्रसादयेत्॥47॥
रक्ते तु+अतिष्ठति क्षिप्रं स्तम्भनीम्+आचरेत्+क्रियाम्।
रोध्रप्रियङ्गुपत्तङ्गमाषयष्ट्याह्वगैरिकैः॥48॥
मृत्कपालाञ्जनक्षौममषीक्षीरित्वगङ्कुरैः।
विचूर्णयेत्+व्रणमुखं पद्मकादिहिमं पिबेत्॥49॥
ताम्+एव वा सिरां विध्येत्+व्यधात्+तस्मात्+अनन्तरम्।
सिरामुखं वा त्वरितं दहेत्+तप्तशलाकया॥50॥
उन्मार्गगा यन्त्रनिपीडनेन स्वस्थानम्+आयान्ति पुनः+न यावत्।
दोषाः प्रदुष्टाः+ रुधिरं प्रसन्नाः+तावत्+हिताहारविहारभाक् स्यात्॥51॥
न+अत्युष्णशीतं लघु दीपनीयं रक्ते+अपनीते हितम्+अन्नपानम्।
तदा शरीरं हि+अनवस्थितासृक्+अग्निः+विशेषात्+इति रक्षितव्यः॥52॥
प्रसन्नवर्णेन्द्रियम्+इन्द्रियार्थान्+इच्छन्तम्+अव्याहतपक्तृवेगम्।
सुखान्वितं पुष्टिबलोपपन्नं विशुद्धरक्तं पुरुषं वदन्ति॥53॥
इति श्रीवैद्यपतिसिंहगुप्तसूनुश्रीमद्वाग्भटविरचितायाम्+अष्टाङ्गहृदयसंहितायां सूत्रस्थाने शिराव्यधविधिः+नाम सप्तविंशः+अध्यायः॥27॥
अष्टाविंशतितमः+अध्यायः।
अथ+अतः शल्याहरणविधिम्+अध्यायं व्याख्यास्यामः।
इति ह स्म+आहुः+आत्रेयादयः+ महर्षयः।
वक्रर्जुतिर्यगूर्ध्वाधः शल्यानां पञ्चधा गतिः।
ध्यामं शोफरुजावन्तं स्रवन्तं शोणितं मुहुः॥1॥
अभ्युद्गतं बुद्बुदवत्+पिटिकोपचितं व्रणम्।
मृदुमांसं च जानीयात्+अन्तःशल्यं समासतः॥2॥
विशेषात्+त्वग्गते शल्ये विवर्णः कठिनायतः।
शोफः+ भवति मांसस्थे चोषः शोफः+ विवर्द्धते॥3॥
पीडनाक्षमता पाकः शल्यमार्गः+ न रोहति।
पेश्यन्तरगते मांसप्राप्तवत्+श्वयथुं विना॥4॥

आक्षेपः स्नायुजालस्य संरम्भस्तम्भवेदनाः।
स्नायुगे दुर्हरं च+एतत् सिराध्मानं सिराश्रिते॥5॥
स्वकर्मगुणहानिः स्यात्+स्रोतसां स्रोतसि स्थिते।
धमनीस्थे+अनिलः+ रक्तं फेनयुक्तम्+उदीरयेत्॥6॥
निर्याति शब्दवान् स्यात्+च हृल्लासः साङ्गवेदनः।
सङ्घर्षः+ बलवान्+अस्थिसन्धिप्राप्ते+अस्थिपूर्णता॥7॥
नैकरूपा रुजः+अस्थिस्थे शोफः तद्वत्+च सन्धिगे।
चेष्टानिवृत्तिः+च भवेत् आटोपः कोष्ठसंश्रिते॥8॥
आनाहः+अन्नशकृन्मूत्रदर्शनं च व्रणानने।
विद्यात्+मर्मगतं शल्यं मर्मविद्धोपलक्षणैः॥9॥
यथास्वं च परिस्रावैः+त्वगादिषु विभावयेत्।
रुह्यते शुद्धदेहानाम्+अनुलोमस्थितं तु तत्॥10॥
दोषकोपाभिघातादिक्षोभात्+भूयः+अपि बाधते।
त्वङ्नष्टे यत्र तत्र स्युः+अभ्यङ्गस्वेदमर्दनैः॥11॥
रागरुग्दाहसंरम्भाः+ यत्र च+आज्यं विलीयते।
आशु शुष्यति लेपः+ वा तत्+स्थानं शल्यवत्+वदेत्॥12॥
मांसप्रणष्टं संशुद्ध्या कर्शनात्+श्लथतां गतम्।
क्षोभात्+रागादिभिः शल्यं लक्षयेत् तद्वत्+एव च॥13॥
पेश्यस्थिसन्धिकोष्ठेषु नष्टम् अस्थिषु लक्षयेत्।
अस्थ्नाम्+अभ्यञ्जनस्वेदबन्धपीडनमर्दनैः॥14॥
प्रसारणाकुञ्चनतः सन्धिनष्टं तथा+अस्थिवत्।
नष्टे स्नायुशिरास्रोतोधमनीषु+असमे पथि॥15॥
अश्वयुक्तं रथं खण्डचक्रम्+आरोप्य रोगिणम्।
शीघ्रं नयेत्+ततः+तस्य संरम्भात्+शल्यम्+आदिशेत्॥16॥
मर्मनष्टं पृथक्+न+उक्तं तेषां मांसादिसंश्रयात्।
सामान्येन सशल्यं तु क्षोभिण्या क्रियया सरुक्॥17॥
वृत्तं पृथु चतुष्कोणं त्रिपुटं च समासतः।
अदृश्यशल्यसंस्थानं व्रणाकृत्या विभावयेत्॥18॥
तेषाम्+आहरणोपायौ प्रतिलोमानुलोमकौ।
अर्वाचीनपराचीने निर्हरेत्+तत्+विपर्ययात्॥19॥
सुखाहार्यं यतः+छित्त्वा ततः+तिर्यग्गतं हरेत्।
शल्यं न निर्घात्यम्+उरःकक्षावङ्क्षणपार्श्वगम्॥20॥

प्रतिलोम्+अमनुत्तुण्डं छेद्यं पृथुमुखं च यत्।
न+एव+आहरेत्+विशल्यघ्नं नष्टं वा निरुपद्रवम्॥21॥
अथ+आहरेत्+करप्राप्यं करेण+एव इतरत्+पुनः।
दृश्यं सिंहाहिमकरवर्मिकर्कटकाननैः॥22॥
अदृश्यं व्रणसंस्थानात्+ग्रहीतुं शक्यते यतः।
कङ्कभृङ्गाह्वकुररशरारीवायसाननैः॥23॥
सन्दंशाभ्यां त्वगादिस्थं तालाभ्यां सुषिरं हरेत्।
सुषिरस्थं तु नलकैः शेषं शेषैः+यथायथम्॥24॥
शस्त्रेण वा विशस्यादौ ततः+ निर्लोहितं व्रणम्।
कृत्वा घृतेन संस्वेद्य बद्ध्वा+आचारिकम्+आदिशेत्॥25॥
सिरास्नायुविलग्नं तु चालयित्वा शलाकया।
हृदये संस्थितं शल्यं त्रासितस्य हिमाम्बुना॥26॥
ततः स्थानान्तरं प्राप्तम्+आहरेत्+तत्+यथायथम्।
यथामार्गं दुराकर्षम् अन्यतः+अपि+एवम्+आहरेत्॥27॥
अस्थिदष्टे नरं पद्भ्यां पीडयित्वा विनिर्हरेत्।
इति+अशक्ये सुबलिभिः सुगृहीतस्य किङ्करैः॥28॥
तथा+अपि+अशक्ये वारङ्गं वक्रीकृत्य धनुर्ज्यया।
सुबद्धं वक्त्रकटके बध्नीयात्+सुसमाहितः॥29॥
सुसंयतस्य पञ्चाङ्ग्या वाजिनः कशया+अथ तम्।
ताडयेत्+इति मूर्धानं वेगेन+उन्नमयन् यथा॥30॥
उद्धरेत्+शल्यम् एवं वा शाखायां कल्पयेत्+तरोः।
बद्ध्वा दुर्बलवारङ्गं कुशाभिः शल्यम्+आहरेत्॥31॥
श्वयथुग्रस्तवारङ्गं शोफम्+उत्पीड्य युक्तितः।
मुद्गराहतया नाड्या निर्घात्य+उत्तुण्डितं हरेत्॥32॥
तैः+एव च+आनयेत्+मार्गम्+अमार्गोत्तुण्डितं तु यत्।
मृदित्वा कर्णिनां कर्णं नाड्यास्येन निगृह्य वा॥33॥
अयस्कान्तेन निष्कर्णं विवृतास्यम्+ऋजुस्थितम्।
पक्वाशयगतं शल्यं विरेकेण विनिर्हरेत्॥34॥
दुष्टवातविषस्तन्यरक्ततोयादि चूषणैः।
कण्ठस्रोतोगते शल्ये सूत्रं कण्ठे प्रवेशयेत्॥35॥
बिसेन+आत्ते ततः शल्ये बिसं सूत्रं समं हरेत्।
नाड्या+अग्नितापितां क्षिप्त्वा शलाकाम्+अप्स्थिरीकृताम्॥36॥

आनयेत्+जातुषं कण्ठात् जतुदिग्धाम्+अजातुषम्।
केशोन्दुकेन पीतेन द्रवैः कण्टकम्+आक्षिपेत्॥37॥
सहसा सूत्रबद्धेन वमतः तेन च+इतरत्।
अशक्यं मुखनासाभ्याम्+आहर्तुं परतः+ नुदेत्॥38॥
अप्पानस्कन्धघाताभ्यां ग्रासशल्यं प्रवेशयेत्।
सूक्ष्माक्षिव्रणशल्यानि क्षौमवालजलैः+हरेत्॥39॥
अपां पूर्णं विधुनुयात्+अवाक्शिरसम्+आयतम्।
वामयेत्+च+आमुखं भस्मराशौ वा निखनेत्+नरम्॥40॥
कर्णे+अम्बुपूर्णे हस्तेन मथित्वा तैलवारिणी।
क्षिपेत्+अधोमुखं कर्णं हन्यात्+वा+आचूषयेत वा॥41॥
कीटे स्रोतोगते कर्णं पूरयेत्+लवणाम्बुना।
सुक्तेन वा सुखोष्णेन मृते क्लेदहरः+ विधिः॥42॥
जातुषं हेमरूप्यादिधातुजं च चिरस्थितम्।
ऊष्मणा प्रायशः शल्यं देहजेन विलीयते॥43॥
मृद्वेणुदारुशृङ्गास्थिदन्तवालोपलानि न।
विषाणवेण्वयस्तालदारुशल्यं चिरात्+अपि॥44॥
प्रायः+ निर्भुज्यते तत्+हि पचति+आशु पलासृजी।
शल्ये मांसावगाढे चेत्+सः+ देशः+ न विदह्यते॥45॥
ततः+तं मर्दनस्वेदशुद्धिकर्षणबृंहणैः।
तीक्ष्णोपनाहपानान्नघनशस्त्रपदाङ्कनैः॥46॥
पाचयित्वा हरेत्+शल्यं पाटनैषणभेदनैः।
शल्यप्रदेशयन्त्राणाम्+अवेक्ष्य बहुरूपताम्॥47॥
तैः+तैः+उपायैः+मतिमान् शल्यं विद्यात्+तथा+आहरेत् ॥471/2 ॥
इति श्रीवैद्यपतिसिंहगुप्तसूनुश्रीमद्वाग्भटविरचितायाम्+अष्टाङ्गहृदयसंहितायां सूत्रस्थाने
शल्याहरणविधिः+नाम+अष्टाविंशः+अध्यायः॥28॥
एकोनत्रिंशः+अध्यायः।
अथ+अतः शस्त्रकर्मविधिम्+अध्यायं व्याख्यास्यामः।
इति ह स्म+आहुः+आत्रेयादयः+ महर्षयः।
व्रणः सञ्जायते प्रायः पाकात्+श्वयथुपूर्वकात्।
तम्+एव+उपचरेत्+तस्मात्+रक्षन् पाकं प्रयत्नतः॥1॥
सुशीतलेपसेकास्रमोक्षसंशोधनादिभिः।
शोफः+अल्पः+अल्पोष्मरुक् सामः सवर्णः कठिनः स्थिरः॥2॥

पच्यमानः+ विवर्णः+तु रागी बस्तिः+इव+आततः।
स्फुटति+इव सनिस्तोदः साङ्गमर्दविजृम्भिकः॥3॥
संरम्भारुचिदाहोषातृड्ज्वरानिद्रतान्वितः।
स्त्यानं विष्यन्दयति+आज्यं व्रणवत्+स्पर्शनासहः॥4॥
पक्वे+अल्पवेगता म्लानिः पाण्डुता वलिसम्भवः।
नामः+अन्तेषु+उन्नतिः+मध्ये कण्डूशोफादिमार्दवम्।
स्पृष्टे पूयस्य सञ्चारः+ भवेत्+बस्तौ+इव+अम्भसः।
शूलं न+ऋते+अनिलात्+दाहः पित्तात्+शोफः कफोदयात्॥6॥
रागः+ रक्तात्+च पाकः स्यात्+अतः+ दोषैः सशोणितैः।
पाके+अतिवृत्ते सुषिरः+तनुत्वक्+दोषभक्षितः॥7॥
वलीभिः+आचितः श्यावः शीर्यमाणतनूरुहः।
कफजेषु तु शोफेषु गम्भीरं पाकम्+एति+असृक्॥8॥
पक्वलिङ्गं ततः+अस्पष्टं यत्र स्यात्+शीतशोफता।
त्वक्सावर्ण्यं रुजः+अल्पत्वं घनस्पर्शत्वम्+अश्मवत्॥9॥
रक्तपाकम्+इति ब्रूयात्+तं प्राज्ञः+ मुक्तसंशयः।
अल्पसत्त्वे+अबले बाले पाकात्+वा+अत्यर्थम्+उद्धते॥10॥
दारणं मर्मसन्ध्यादिस्थिते च+अन्यत्र पाटनम्।
आमच्छेदे सिरास्नायुव्यापदः+असृगतिस्रुतिः॥11॥
रुजः+अतिवृद्धिः+दरणं विसर्पः+ वा क्षतोद्भवः।
तिष्ठन्+अन्तः पुनः पूयः सिरास्नाय्वसृगामिषम्॥12॥
विवृद्धः+ दहति क्षिप्रं तृणोलपम्+इव+अनलः।
यः+छिनत्ति+आमम्+अज्ञानात्+यः+च पक्वम्+उपेक्षते॥13॥
श्वपचौ+इव विज्ञेयौ तौ+अनिश्चितकारिणौ।
प्राक् शस्त्रकर्मणः+चेष्टं भोजयेत्+अन्नम्+आतुरम्॥14॥
पानपं पाययेत्+मद्यं तीक्ष्णं यः+ वेदनाक्षमः।
न मूर्च्छति+अन्नसंयोगात्+मत्तः शस्त्रं न बुध्यते॥15॥
अन्यत्र मूढगर्भाश्ममुखरोगोदरातुरात्।
अथ+आहृतोपकरणं वैद्यः प्राङ्मुखम्+आतुरम्॥16॥
सम्मुखः+ यन्त्रयित्वा+आशु न्यस्येत्+मर्मादि वर्जयन्।
अनुलोमं सुनिशितं शस्त्रम्+आपूयदर्शनात्॥17॥
सकृत्+एव+आहरेत्+तत्+च पाके तु सुमहति+अपि।
पाटयेत् द्व्यङ्गुलं सम्यक्+द्व्यङ्गुलत्र्यङ्गुलान्तरम्॥18॥

एषित्वा सम्यक्+एषिण्या परितः सुनिरूपितम्।
अङ्गुलीनालवालैः+वा यथादेशं यथाशयम्॥19॥
यतः+ गतां गतिं विद्यात्+उत्सङ्गः+ यत्र यत्र च।
तत्र तत्र व्रणं कुर्यात्+सुविभक्तं निराशयम्॥20॥
आयतं च विशालं च यथा दोषः+ न तिष्ठति।
शौर्यम्+आशुक्रिया तीक्ष्णं शस्त्रम्+अस्वेदवेपथू॥21॥
असम्मोहः+च वैद्यस्य शस्त्रकर्मणि शस्यते।
तिर्यक् छिन्द्यात्+ललाटभ्रूदन्तवेष्टकजत्रुणि॥22॥
कुक्षिकक्षाक्षिकूटौष्ठकपोलगलवङ्क्षणे।
अन्यत्र छेदनात्+तिर्यक् सिरास्नायुविपाटनम्॥23॥
शस्त्रे+अवचारिते वाग्भिः शीताम्भोभिः+च रोगिणम्।
आश्वास्य परितः+अङ्गुल्या परिपीड्य व्रणं ततः॥24॥
क्षालयित्वा कषायेण प्लोतेन+अम्भः+अपनीय च।
गुग्गुल्वगुरुसिद्धार्थहिङ्गुसर्जरसान्वितैः॥25॥
धूपयेत्+पटुषड्ग्रन्थानिम्बपत्रैः+घृतप्लुतैः।
तिलकल्काज्यमधुभिः+यथास्वं भेषजेन च॥26॥
दिग्धां वर्तिं ततः+ दद्यात्+तैः+एव+आच्छादयेत्+च ताम्।
घृताक्तैः सक्तुभिः+च+ऊर्ध्वं घनां कवलिकां ततः॥27॥
निधाय युक्त्या बध्नीयात्+पट्टेन सुसमाहितम्।
पार्श्वे सव्ये+अपसव्ये वा न+अधस्तात्+न+एव च+उपरि॥28॥
शुचिसूक्ष्मदृढाः पट्टाः कवल्यः सविकेशिकाः।
धूपिता मृदवः श्लक्ष्णा निर्वलीका व्रणे हिताः॥29॥
कुर्वीत+अनन्तरं तस्य रक्षां रक्षोनिषिद्धये।
बलिं च+उपहरेत्+तेभ्यः सदा मूर्ध्ना च धारयेत्॥30॥
लक्ष्मीं गुहाम्+अतिगुहां जटिलां ब्रह्मचारिणीम्।
वचां छत्राम्+अतिच्छत्रां दूर्वां सिद्धार्थकान्+अपि॥31॥
ततः स्नेहदिनेहोक्तं तस्य+आचारं समादिशेत्।
दिवास्वप्नः+ व्रणे कण्डूरागरुक्शोफपूयकृत्॥32॥
स्त्रीणां तु स्मृतिसंस्पर्शदर्शनैः+चलितस्रुते।
शुक्रे व्यवायजान् दोषान्+असंसर्गे+अपि+अवाप्नुयात्॥33॥
(व्रणे श्वयथुः+आयासात् स च रागः+च जागरात्।
तौ च रुक् च दिवासु+आपात्ताः+च मृत्युः+च मैथुनात्।1।)

भोजनं च यथासात्म्यं यवगोधूमषष्टिकाः।
मसूरमुद्गतुवरीजीवन्तीसुनिषण्णकाः॥34॥
बालमूलकवार्ताकतण्डुलीयकवास्तुकम्।
कारवेल्लककर्कोटपटोलकटुकाफलम्॥35॥
सैन्धवं दाडिमं धात्री घृतं तप्तहिमं जलम्।
जीर्णशाल्योदनं स्निग्धम्+अल्पम्+उष्णोदकोत्तरम्॥36॥
भुञ्जानः+ जाङ्गलैः+मांसैः शीघ्रं व्रणम्+अपोहति।
अशितं मात्रया काले पथ्यं याति जरां सुखम्॥37॥
अजीर्णात्+तु+अनिलादीनां विभ्रमः+ बलवान् भवेत्।
ततः शोफरुजापाकदाहानाहान्+अवाप्नुयात्॥38॥
नवं धान्यं तिलान् माषान् मद्यं मांसम्+अजाङ्गलम्।
क्षीरेक्षुविकृतीः+अम्लं लवणं कटुकं त्यजेत्।
यत्+च+अन्यत्+अपि विष्टम्भि विदाहि गुरु शीतलम्।
वर्गः+अयं नवधान्यादिः+व्रणिनः सर्वदोषकृत्॥40॥
मद्यं तीक्ष्णोष्णरूक्षाम्लम्+आशु व्यापादयेत्+व्रणम्।
वालोशीरैः+च वीज्येत न च+एनं परिघट्टयेत्॥41॥
न तुदेत्+न च कण्डूयेत्+चेष्टमानः+च पालयेत्।
स्निग्धवृद्धद्विजातीनां कथाः शृण्वन्मनःप्रियाः॥42॥
आशावान् व्याधिमोक्षाय क्षिप्रं व्रणम्+अपोहति।
तृतीये+अह्नि पुनः कुर्यात्+व्रणकर्म च पूर्ववत्॥43॥
प्रक्षालनादि दिवसे द्वितीये न+आचरेत्+तथा।
तीव्रव्यथः+ विग्रथितः+चिरात्+संरोहति व्रणः॥44॥
स्निग्धां रूक्षां श्लथां गाढां दुर्न्यस्तां च विकेशिकाम्।
व्रणे न दद्यात्+कल्कं वा स्नेहात्+क्लेदः+ विवर्द्धते॥45॥
मांसच्छेदः+अतिरुक्+रौक्ष्यात्+दरणं शोणितागमः।
श्लथातिगाढदुर्न्यासैः+व्रणवर्त्मावघर्षणम्॥46॥
सपूतिमांसं सोत्सङ्गं सगतिं पूयगर्भिणम्।
व्रणं विशोधयेत्+शीघ्रं स्थिता हि+अन्तर्विकेशिका॥47॥
व्यम्लं तु पाटितं शोफं पाचनैः समुपाचरेत्।
भोजनैः+उपनाहैः+च न+अतिव्रणविरोधिभिः॥48॥
सद्यः सद्योव्रणान् सीव्येत्+विवृतान्+अभिघातजान्।
मेदोजान्+लिखितान् ग्रन्थीन् ह्रस्वाः पालीः+च कर्णयोः॥49॥

शिरोक्षिकूटनासौष्ठगण्डकर्णोरुबाहुषु।
ग्रीवाललाटमुष्कस्फिङ्मेढ्रपायूदरादिषु॥50॥
गम्भीरेषु प्रदेशेषु मांसलेषु+अचलेषु च।
न तु वङ्क्षणकक्षादौ+अल्पमांसे चले व्रणान्॥51॥
वायुनिर्वाहिणः शल्यगर्भान् क्षारविषाग्निजान्।
सीव्येत्+चलास्थिशुष्कास्रतृणरोमापनीय तु॥52॥
प्रलम्बि मांसं विच्छिन्नं निवेश्य स्वनिवेशने।
सन्ध्यस्थि च स्थिते रक्ते स्नाय्वा सूत्रेण वल्कलैः॥53॥
सीव्येत्+न दूरे न+आसन्ने गृह्णन्+न+अल्पं न वा बहु।
सान्त्वयित्वा ततः+च+आर्तं व्रणे मधुघृतद्रुतैः॥54॥
अञ्जनक्षौमजमषीफलिनीशल्लकीफलैः।
सरोध्रमधुकैः+दिग्धे युञ्ज्यात्+बन्धादि पूर्ववत्॥55॥
व्रणः+ निःशोणितौष्ठः+ यः किञ्चित्+एव+अवलिख्य तम्।
सञ्जातरुधिरं सीव्येत्+सन्धानं हि+अस्य शोणितम्॥56॥
बन्धनानि तु देशादीन् वीक्ष्य युञ्जीत तेषु च।
आविकाजिनकौशेयम्+उष्णं क्षौमं तु शीतलम्॥57॥
शीतोष्णं तूलसन्तानकार्पासस्नायुवल्कजम्।
ताम्रायस्त्रपुसीसानि व्रणे मेदः कफाधिके॥58॥
भङ्गे च युञ्ज्यात्+फलकं चर्मवल्ककुशादि च।
स्वनामानुगताकारा बन्धाः+तु दश पञ्च च॥59॥
कोशस्वस्तिकमुत्तोलीचीनदामानुवेल्लितम्।
खट्वाविबन्धस्थगिकावितानोत्सङ्गगोष्फणाः॥60॥
यमकं मण्डलाख्यं च पञ्चाङ्गी च+इति योजयेत्।
(विदध्यात्+तेषु तेषु+एव कोशम्+अङ्गुलिपर्वसु।
स्वस्तिकं कर्णकक्षादिस्तनेषु+उक्तं च सन्धिषु॥1॥
मुत्तोलीं मेढ्रग्रीवादौ युञ्ज्यात्+चीनम्+अपाङ्गयोः।
सम्बाधे+अङ्गे तथा दामः+ शाखासु+एव+अनुवेल्लितम्॥2॥
खट्वां गण्डे हनौ शङ्खे विबन्धं पृष्ठकोदरे।
अङ्गुष्ठाङ्गुलिमेढ्राग्रे स्थगिकामन्त्रवृद्धिषु॥3॥
वितानं पृथुलाङ्गादौ तथा शिरसि च+ईरयेत्।
विलम्बिनि तथा+उत्सङ्गं नासौष्ठचिबुकादिषु॥4॥
गोष्फणं सन्धिषु तथा यमकं यमिके व्रणे।

वृत्ते+अङ्गे मण्डलाख्यं च पञ्चाङ्गीं च+ऊर्ध्वजत्रुषु॥5॥)
यः+ यत्र सुनिविष्टः स्यात्+तं तेषां तत्र बुद्धिमान्॥61॥
बध्नीयात्+गाढम्+ऊरुस्फिक्ककक्षावङ्क्षणमूर्धसु।
शाखावदनकर्णोरःपृष्ठपार्श्वगलोदरे॥62॥
समं मेहनमुष्के च नेत्रे सन्धिषु च श्लथम्।
बध्नीयात्+शिथिलस्थाने वातश्लेष्मोद्भवे समम्॥63॥
गाढम्+एव समस्थाने भृशं गाढं तदा+आशये।
शीते वसन्ते+अपि च तौ मोक्षणीयौ त्र्यहात्+त्र्यहात्॥64॥
पित्तरक्तोत्थयोः+बन्धः+ गाढस्थाने समः+ मतः।
समस्थाने श्लथः+ न+एव शिथिलस्य+आशये तथा॥65॥
सायंप्रातः+तयोः+मोक्षः+ ग्रीष्मे शरदि च+इष्यते।
अबद्धः+ दंशमशकशीतवातादिपीडितः॥66॥
दुष्टीभवेत्+चिरं च+अत्र न तिष्ठेत्+स्नेहभेषजम्।
कृच्छ्रेण शुद्धिं रूढिं वा याति रूढः+ विवर्णताम्॥67॥
बद्धः+तु चूर्णितः+ भग्नः+ विश्लिष्टः पाटितः+अपि वा।
छिन्नस्नायुसिरः+अपि+आशु सुखं संरोहति व्रणः॥68॥
उत्थानशयनाद्यासु सर्वेहासु न पीड्यते।
उद्दृत्तौष्ठः समुत्सन्नः+ विषमः कठिनः+अतिरुक्॥69॥
समः+ मृदुः+अरुक् शीघ्रं व्रणः शुध्यति रोहति।
स्थिराणाम्+अल्पमांसानां रौक्ष्यात्+अनुपरोहताम्॥70॥
प्रच्छाद्यम्+औषधं पत्रैः+यथादोषं यथर्तु च।
अजीर्णतरुणाच्छिद्रैः समन्तात्+सुनिवेशितैः॥71॥
धौतैः+अकर्कशैः क्षीरिभूर्जार्जुनकदम्बजैः।
कुष्ठिनाम्+अग्निदग्धानां पिटिका मधुमेहिनाम्॥72॥
कर्णिकाः+च+उन्दुरुविषे क्षारदग्धा विषान्विताः।
बन्धनीया न मांस्पाके गुदपाके च दारुणे॥73॥
शीर्यमाणाः सरुग्दाहाः शोफावस्थाविसर्पिणः।
अरक्षया व्रणे यस्मिन् मक्षिका निक्षिपेत्+कृमीन्॥74॥
ते भक्षयन्तः कुर्वन्ति रुजाशोफास्रसंस्रवान्।
सुरसादिं प्रयुञ्जीत तत्र धावनपूरणे॥75॥
सप्तपर्णकरञ्जार्कनिम्बराजादनत्वचः।
गोमूत्रकल्कितः+ लेपः सेकः क्षाराम्बुना हितः॥76॥

प्रच्छाद्य मांसपेश्या वा व्रणं तान्+आशु निर्हरेत्।
न च+एनं त्वरमाणः+अन्तः सदोषम्+उपरोहयेत्॥77॥
सः+अल्पेन+अपि+अपचारेण भूयः+ विकुरुते यतः।
रूढे+अपि+अजीर्णव्यायामव्यवायादीन् विवर्जयेत्॥78॥
हर्षं क्रोधं भयं च+अपि यावदा स्थैर्यसम्भवात्।
आदरेण+अनुवर्त्यः+अयं मासान् षट् सप्त वा विधिः॥79॥
उत्पद्यमानासु च तासु तासु वार्तासु दोषादिबलानुसारी।
तैः+तैः+उपायैः प्रयतः+चिकित्सेत्+आलोचयन् विस्तरम्+उत्तरोक्तम्॥80॥
इति श्रीवैद्यपतिसंहगुप्तसूनुश्रीमद्वाग्भटविरचितायाम्+अष्टाङ्गहृदयसंहितायां सूत्रस्थाने शस्त्रकर्मविधिः+नाम+एकोनत्रिंशः+अध्यायः॥29॥
त्रिंशः+अध्यायः
अथ+अतः क्षाराग्निकर्मविधिम्+अध्यायं व्यख्यास्यामः।
इति ह स्म+आहुः+आत्रेयादयः+ महर्षयः।
सर्वाशस्त्रानुशस्त्राणां क्षारः श्रेष्ठः+ बहूनि यत्।
छेद्यभेद्यादिकर्माणि कुरुते विषमेषु+अपि॥1॥
दुःखावचार्यशस्त्रेषु तेन सिद्धिम्+अयात्सु च।
अतिकृच्छ्रेषु रोगेषु यत्+च पाने+अपि युज्यते॥2॥
सः+ पेयः+अर्शोग्निसादाश्मगुल्मोदरगरादिषु।
योज्यः साक्षात्+मषश्वित्रबाह्यार्शः कुष्ठसुप्तिषु॥3॥
भगन्दरार्बुदग्रन्थिदुष्टनाडीव्रणादिषु।
न तु+उभयः+अपि योक्तव्यः पित्ते रक्ते चले+अबले॥4॥
ज्वरे+अतिसारे हृन्मूर्धरोगे पाण्ड्वामये+अरुचौ।
तिमिरे कृतसंशुद्धौ श्वयथौ सर्वगात्रगे॥5॥
भीरुगर्भिण्यृतुमतीप्रोद्वृत्तफलयोनिषु।
अजीर्णे+अन्ने शिशौ वृद्धे धमनीसन्धिमर्मसु॥6॥
तरुणास्थिसिरास्नायुसेवनीगलनाभिषु।
देशे+अल्पमासे वृषणमेढ्रस्रोतोनखान्तरे॥7॥
वर्त्मरोगात्+ऋते+अक्ष्णोः+च शीतवर्षोष्णदुर्दिने।
कालमुष्ककशम्याककदलीपारिभद्रकान्॥8॥
अश्वकर्णमहावृक्षपलाशास्फोतवृक्षकान्।
इन्द्रवृक्षार्कपूतीकनक्तमालाश्वमारकान्॥9॥
काकजङ्घाम्+अपामार्गम्+अग्निमन्थाग्नितिल्वकान्।

सार्द्रान् समूलशाखादीन् खण्डशः परिकल्पितान्॥10॥
कोशातकीः+चतस्रः+च शूकं नालं यवस्य च।
निवाते निचयीकृत्य पृथक् तानि शिलातले॥11॥
प्रक्षिप्य मुष्ककचये सुधाश्मानि च दीपयेत्।
ततः+तिलानां कुतलैः+दग्ध्वा+अग्नौ विगते पृथक्॥12॥
कृत्वा सुधाश्मनां भस्म द्रोणं तु+इतरभस्मनः।
मुष्ककोत्तरम्+आदाय प्रत्येकं जलमूत्रयोः॥13॥
गालयेत्+अर्धभारेण महता वाससा च तत्।
यावत्+पिच्छिलरक्ताच्छः+तीक्ष्णः+ जातः+तदा च तम्॥14॥
गृहीत्वा क्षारनिष्यन्दं पचेत्+लौह्यां विघट्टयन्।
पच्यमाने ततः+तस्मिन्+ताः सुधाभस्मशर्कराः॥15॥
शुक्तीः क्षीरपकं शङ्खनाभीः+च+आयसभाजने।
कृत्वा+अग्निवर्णान्+बहुशः क्षारोत्थे कुडवोन्मिते॥16॥
निर्वाप्य पिष्ट्वा तेन+एव प्रतीवापं विनिक्षिपेत्।
श्लक्ष्णं शकृत्+दक्षशिखिगृध्रकङ्ककपोतजम्॥17॥
चतुष्पात्+पक्षिपित्तालमनोह्वालवणानि च।
सबाष्पैः+च यदा+उत्तिष्ठेत्+बुद्बुदैः+लेहवत्+घनः।
अवतार्य तदा शीतः+ यवराशौ+अयोमये॥19॥
स्थाप्यः+अयं मध्यमः क्षारः+ न तु पिष्ट्वा क्षिपेत्+मृदौ।
निर्वाप्य+अपनयेत्+तीक्ष्णे पूर्ववत् प्रतिवापनम्॥20॥
तथा लाङ्गलिकादन्तिचित्रकातिविषावचाः।
स्वर्जिकाकनकक्षीरिहिङ्गुपूतीकपल्लवाः॥21॥
तालपत्री बिडं च+इति सप्तरात्रात्+परं तु सः।
योज्यः तीक्ष्णः+अनिलश्लेष्ममेदोजेषु+अर्बुदादिषु॥22॥
मध्येषु+एषु+एव मध्यः+अन्यः पित्तास्रगुदजन्मसु।
बलार्थं क्षीणपानीये क्षाराम्बु पुनः+आवपेत्॥23॥
न+अतितीक्ष्णमृदुः श्लक्ष्णः पिच्छिलः शीघ्रगः सितः।
शिखरी सुखनिर्वाप्यः+ न विष्यन्दी न च+अतिरुक्॥24॥
क्षारः+ दशगुणः शस्त्रतेजसोः+अपि कर्मकृत्।
आचूषन्+इव संरम्भात्+गात्रम्+अपीडयन्+इव॥25॥
सर्वतः+अनुसरन् दोषान्+उन्मुलयति मूलतः।
कर्म कृत्वा गतरुजः स्वयम्+एव+उपशाम्यति॥26॥

क्षारसाध्ये गदे छिन्ने लिखिते स्राविते+अथवा।
क्षारं शलाकया दत्त्वा प्लोतप्रावृतदेहया॥27॥
मात्राशतम्+उपेक्षेत तत्र+अर्शःसु+आवृताननम्।
हस्तेन यन्त्रं कुर्वीत वर्त्मरोगेषु वर्त्मनी॥28॥
निर्भुज्य पिचुना+आच्छाद्य कृष्णभागं विनिक्षिपेत्।
पद्मपत्रतनुः क्षारलेपः+ घ्राणार्बुदेषु च॥29॥
प्रत्यादित्यं निषण्णस्य समुन्नम्य+अग्रनासिकाम्।
मात्रा विधार्यः पञ्चाशत् तद्वत्+अर्शसि कर्णजे॥30॥
क्षारं प्रमार्जनेन+अनु परिमृज्य+अवगम्य च।
सुदग्धं घृतमध्वक्तं तत्+पयोमस्तुकाञ्जिकैः॥31॥
निर्वापयेत्+ततः साज्यैः स्वादुशीतैः प्रदेहयेत्।
अभिष्यन्दीनि भोज्यानि भोज्यानि क्लेदनाय च॥32॥
यदि च स्थिरमूलत्वात्+क्षारदग्धं न शीर्यते।
धान्याम्लबीजयष्ट्याह्वतिलैः+आलेपयेत्+ततः॥33॥
तिलकल्कः समधुकः+ घृताक्तः+ व्रणरोपणः।
पक्वजम्ब्वसितं सन्नं सम्यग्दग्धं विपर्यये॥34॥
ताम्रतातोदकण्ड्वाद्यैः+दुर्दग्धम् तं पुनः+दहेत्।
अतिदग्धे स्रवेत्+रक्तं मूर्च्छादाहज्वरादयः॥35॥
गुदे विशेषात्+विण्मूत्रसंरोधः+अतिप्रवर्तनम्।
पुंस्त्वोपघातः+ मृत्युः+वा गुदस्य शातनात्+ध्रुवम्॥36॥
नासायां नासिकावंशदरणाकुञ्चनोद्भवः।
भवेत्+च विषयाज्ञानम् तद्वत्+श्रोत्रादिकेषु+अपि॥37॥
विशेषात्+अत्र सेकः+अम्लैः+लेपः+ मधु घृतं तिलाः।
वातपित्तहरा चेष्टा सर्वा+एव शिशिरा क्रिया॥38॥
अम्लः+ हि शीतः स्पर्शेन क्षारः+तेन+उपसंहितः।
याति+आशु स्वादुतां तस्मात्+अम्लैः+निर्वापयेत्+तराम्॥39॥
(विषाग्निशस्त्राशनि मृत्युतुल्यः क्षारः+ भवेत्+अल्पम्+अतिप्रयुक्तः।
सः+ धीमता सम्यक्+अनुप्रयुक्तः+ रोगान्+निहन्यात्+अचिरेण घोरान्॥1॥)
अग्निः क्षारात्+अपि श्रेष्ठः+तत्+दग्धानाम्+असम्भवात्।
भेषजक्षारशस्त्रैः+च न सिद्धानां प्रसाधनात्॥40॥
त्वचि मांसे सिरास्नायुसन्ध्यस्थिषु सः+ युज्यते।
मषाङ्गग्लानिमूर्धार्तिमन्थकीलतिलादिषु॥41॥

त्वग्दाहः+ वर्तिगोदन्तसूर्यकान्तशरादिभिः।
अर्शोभगन्दरग्रन्थिनाडीदुष्टव्रणादिषु॥42॥
मांसदाहः+ मधुस्नेहजाम्बवौष्ठगुडादिभिः।
श्लिष्टवर्त्मनि+असृक्स्रावनील्यसम्यग्व्यधादिषु॥43॥
सिरादिदाहः+तैः+एव न दहेत्+क्षारवारितान्।
अन्तःशल्यासृज्यः+ भिन्नकोष्ठान् भूरिव्रणातुरान्॥44॥
सुदग्धं घृतम्+अध्वक्तं स्निग्धशीतैः प्रदेहयेत्।
तस्य लिङ्गं स्थिते रक्ते शब्दवत्+लसिकान्वितम्॥45॥
पक्वातालकपोताभं सुरोहं न+अतिवेदनम्।
प्रमाददग्धवत्+सर्वं दुर्दग्धात्यर्थदग्धयोः॥46॥
चतुर्धा तत्+तु तुच्छेन सह तुच्छस्य लक्षणम्।
त्वक्+विवर्णा+उष्यते+अत्यर्थं न च स्फोटसमुद्भवः॥47॥
सस्फोटदाहतीव्रोषं दुर्दग्धम् अतिदाहतः।
मांसलम्बनसङ्कोचदाहधूपनवेदनाः॥48॥
सिरादिनाशः+तृण्मूर्च्छाव्रणगाम्भीर्यमृत्यवः।
तुच्छस्य+अग्निप्रतपनं कार्यम्+उष्णं च भेषजम्॥49॥
स्त्याने+अस्रे वेदना+अत्यर्थं विलीने मन्दता रुजः।
दुर्दग्धे शीतमुष्णं च युञ्ज्यात्+आदौ ततः+ हिमम्॥50॥
सम्यग्दग्धे तवक्षीरिप्लक्षचन्दनगैरिकैः।
लिम्पेत्+साज्यामृतैः+ऊर्ध्वं पित्तविद्रधिवत्+क्रिया॥51॥
अतिदग्धे द्रुतं कुर्यात्+सर्वं पित्तविसर्पवत्।
स्नेहदग्धे भृशतरं रूक्षं तत्र तु योजयेत्॥52॥
(शस्त्रक्षाराग्नयः+ यस्मात्+मृत्योः परमम्+आयुधम्।
अप्रमत्तः+ भिषक् तस्मात्+तान् सम्यक्+अवचारयेत्॥1॥)
समाप्यते स्थानम्+इदं हृदयस्य रहस्यवत्।
अत्र+अर्थाः सूत्रिताः सूक्ष्माः प्रतन्यन्ते हि सर्वतः॥53॥
इति श्रीवैद्यपतिसिंहगुप्तसूनुश्रीमद्वाग्भटविरचितायाम्+अष्टाङ्गहृदयसंहितायां सूत्रस्थाने क्षाराग्निकर्मविधिः+नाम त्रिंशत्तमः+अध्यायः॥30॥
समाप्तं च+इदं प्रथमं सूत्रस्थानम्।